महीभृतां राज्ञां पर्वतानां च । मूर्ध्नि मस्तके सानुनि च । कृताभिषेकः विहित-राज्याभिषेकः स्वस्य सार्वभौमत्वात् स्वाज्ञया मांडलिकानां राज्याभिषेककारीत्यर्थः । कृतार्द्रभावश्च । अर्कबंधुः सूर्यवंशोत्पन्नः सूर्यप्रियश्च । स्फुटपुंडरीकः भ्राजमान-सितच्छत्रः विकसितशुभ्रकमलश्च । शुद्धाशयः निर्मलांतःकरणः स्वच्छोदकाधारश्च । अत्र उदकाधारत्वं योग्यतया विवक्षितम् । वा शब्दः उपमार्थे "वा स्याद्विकल्पो-पमयोः" इति मेदिनी । दयार्द्रचेताः दयया आर्द्रं चेतः यस्य स । एतादृशः नृपः । तत् कपिलपुरं ॥ ९ ॥

भूभृत्परार्ध्योऽपि सपक्ष एव । प्रवृत्तदानोऽपि मदानुपेतः ॥
ईशोऽपि नित्यं समदृष्टिपातः । सौम्यस्वभावोऽपि पृथुप्रतापः ॥१०॥

भूभृत्परार्ध्यः राजश्रेष्ठः पर्वतश्रेष्ठश्च । सपक्षः सबलः ससहायश्च । "पक्षोमासा-र्द्धके पार्श्वगृहे साध्यविरोधयोः । केशादेः परतो वृंदे बले सखिसहाययोः ।" इति मेदिनी । पक्षे सगरुत् । प्रवृत्तदानः वर्तमानवितरणः वर्तमानमदश्च । मदानुपेतः गर्वरहितः मदरहितश्च । ईशोपि स्वाम्यपि शंकरोऽपीति च । समदृ-ष्टिपातः निःपक्षपातः प्रजासु तुल्यवर्तन इति यावत् द्विनेत्रश्च । पृथुप्रतापो बहुल-प्रभावो बहुलतापदश्च ॥ १० ॥

भुजेन यस्याभिहताः पतन्तो ।
द्विषद्विपेन्द्राः समराङ्गणेषु ॥
उद्भा[6]न्तमुक्ताप्रकरैः शिरोभि- ।
र्भक्त्येव पुष्पाञ्जलिभिः प्रणेमुः ॥ ११ ॥

उ[7]ग्रप्रतापादवधूय शत्रून् । महा[8]न्धकारानिव तिग्मर[9]श्मिः ॥
उद्योतयामास ज[10]नं समन्तात् प्रदर्शयन्नाश्रयणीय[11]मार्ग[12]म् ॥ १२ ॥

उद्भ्रान्तमुक्ताप्रकरैः उद्गतमुक्तासमूहैः । ' करीन्द्रजीमूतवराहशंखमत्स्याहिशु-क्त्युद्भववेणुजानि । मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि ॥ इति प्रसिद्धेः ॥ ११ । १२ ॥

धर्मार्थकामा वित[12]तं मिथोऽन्यं । न[13] देशमाचक्रमुरस्य नीत्या ॥
विस्पर्धमाना इव तू[14]र्णसिद्धौ । स्व[15]गोचरे दीप्ततरा बभूवुः ॥१३॥

धर्मार्थकामाः अस्य नीत्या विततं अन्यदेशं न आचक्रमुः किंतु मिथः तूर्णं

१ J कृतस्त्वपादः. २ J कर्त्तस्यः ३ C अध्याशयो; J अध्यास वै. ४ C वा for यः. ५ C ०रीकं पुराधिराजं तद्दया०A पुराधिराज्यं. ६ J उत्क्रान्त०. ७ C अति for उग्र. ८ C महोपरागान् for महान्धकारान्. ९ C तिग्मभानुः. १० J जगत् for जनम्. ११ C मार्गान् for मार्गम्. १२ C विषयं. १३ C न वेशमा०. १४ C तूयासिद्धेः. १५ C सुगोचरे.

सत्वरं या सिद्धिः कार्यसिद्धिः तस्यां तूर्णसिद्धौ विस्पर्धमानाः इव स्वगोचरे दीप्ततरा बभूवुः इत्यन्वयः ॥ १३ ॥

उदा[1]रसंख्यैः सचिवैरसंख्यैः । कृताग्र[2]भावः स उदग्रभावः ॥
शशी यथा भैरकृतान्य[3]थाभः । शाक्येन्द्रराजः सुतरां रराज ॥१४॥

उदारसंख्यैः महासंख्यैः महाज्ञानैश्च यत्सांख्यैः प्राप्यते स्थानमित्यत्र संख्याशब्दस्य ज्ञानार्थस्य दृष्टत्वात् । असंख्यैः संख्यारहितैः ज्ञानरहितैश्चेति विरोधाभासः । कृताग्रभावः कृताग्रेसरत्वं तदग्रगामीति यावत् । उदारभावः उत्कृष्टस्वभावः उद्गताग्रसनाकश्च । भैः नक्षत्रैः । अकृता अन्यथा विपरीताभा कांतिर्यस्य सः अकृतभिन्नकांतिरित्यर्थः ॥ १४ ॥

तस्यातिशोभाविस्तृ[4]तातिशोभा । रविप्रभेवास्ततमःप्रभावा ॥
समग्रदेवीनिवहाग्रदेवी । बभूव मा[5]यापगतेव माया ॥ १५ ॥

तस्य शाक्येन्द्रराजस्य अतिशोभया अर्थात्स्वीयया विस्तृता प्रसृता अतिशोभा अर्थात् अन्यासां यया स्वतेजसा अन्यानपि तेजोयुतान् कुर्वतीत्यर्थः । अस्तः क्षिप्तः तमःप्रभावः अज्ञानप्रतापः तमोगुणप्रतापो वा यया । पक्षे अस्तांधकारप्रभावा एतादृशी रविप्रभेव संपूर्णकृताभिषेकस्त्रीसमूहाग्रविराजमाना एतादृशी बभूव । या अपगता अर्थात् विष्णोः दूरीभूता मेव लक्ष्मीरिव आसीत् इत्यर्थः ॥ १५ ॥

प्रजासु मातेव हितप्रवृत्ता । गुरौ जने भक्तिरिवानुवृत्ता ॥
लक्ष्मीरिवाधीशकुले कृताभा । जगत्यभूदुत्तमदेवता सा ॥ १६ ॥

अधीशकुले राजकुले लक्ष्मीरिव कृताभा या जगति उत्तमदेवता अभूत् ॥१६॥

कामं ख[6]लु स्त्रीचरितं तमिस्रं[7]मास्तां न तां प्राप्य तथा बभासे ॥
न[8] चन्द्रलेखामु[9]पलभ्य शुभ्रां । नक्तं सदा[10] कृष्णरुचं हि दृश्यते ॥१७॥

तमिस्रं तमोगुणयुक्तं अज्ञानादिव्याप्तमिति यावत् । तथा इंदुलेखाप्राप्त्यभावे यथा संतमसत्वं प्राप्नोति तथेत्यर्थः । अनेन तस्याः उत्कृष्टगुणशालित्वं व्यज्यते ॥ १७ ॥

अतीन्द्रिये स्वात्म[11]नि दुष्क्रि[12]योऽयं ।
मया जनं योजयितुं न शक्यः ॥
इतीव सूक्ष्मां प्र[13]कृतिं विहाय ।
धर्मेण साक्षान्निहिता[14]त्ममूर्तिः ॥ १८ ॥

---

१ J उदस्तसंख्यैः. २ J कृताग्र्यभा०. ३ C ०न्यथाभैः. ४ A वितता. ५ C ०देवता या J ०देवताभा. ६ J किल, C A सदा. ७ C ०मिस्रं । तथापि तां प्राप्य भृशं विरेजे. ८ C A न हीन्दुले०. ९ C ०पगम्य. १० C तथा संतमसत्वमेति. ११ C ० येनात्मनि. १२ C दुष्कुहो J दुःस्थितो. १३ J स्वतनुं for प्रकृतिं. १४ C ०द्विहिता स्वमूर्तिः.

अतींद्रिये इंद्रियागोचरे । स्वात्मनि स्वस्वरूपे धर्मस्वरूपे इत्यर्थः । धर्मस्वरूपं हि न केनापि इंद्रियेण ग्राह्यं भवति । दुःष्क्रियः दुष्कर्मा अयं जनः योजयितुं प्रवर्तयितुं मया न शक्यः । इतीव धर्मेण सूक्ष्मां अणुतरां स्वप्रकृतिं स्वस्वरूपं विहाय त्यक्त्वा साक्षात् स्वमूर्तिः धर्ममूर्तिः विहिता । मायादेवी धर्मस्य मूर्तिरेवेत्यर्थः । एतेन तस्याः सदाचारसंपन्नत्वं धर्मनिष्ठत्वं च द्योतितम् ॥ १८ ॥

च्युतो[1]ऽथ कायात्पु[2]षितात् त्रिलोकीमुद्योतयन्नुत्तमबोधिसत्वः ॥
विवेश तस्याः स्वत एव कुक्षौ । नन्दागुहायामिव नागराजः ॥१९॥

अथ पुषितात् पुष्टात् कायात् । अर्थात् शुद्धोदनस्येति गम्यते । च्युतः बीजरूपेण निर्गतः उत्तमः बोधः उत्तमज्ञानं तदस्यास्तीति उत्तमबोधि एतादृशं सत्वं चित्तं यस्य महाज्ञानीत्यर्थः । "सत्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मत्वे व्यवसायासु चित्तेषु" इति मेदिनी । नागराजः हस्तिश्रेष्ठः नंदागुहायां गौर्युदरे इव । "नंदा स्यादलिंजरे । गौर्यां तिथिविशेषे स्त्री" इति मेदिनी । तस्या मायादेव्याः कुक्षौ स्वत एव विवेश । परमदयालुत्वात् पूर्वं शुद्धोदनस्य देहे प्रविश्य अनंतरं बीजरूपेण तस्या उदरे स्वत एव प्रविवेशेत्यर्थः ॥ १९ ॥

धृत्वा हिमाद्रिधवलं गुरु[4] षड्विषाणं ।
दानाधिवासि[5]तकरं हि गजस्य रूपम् ॥
शुद्धोदनस्य वसुधाधिपतेर्महिष्याः ।
कुक्षिं विवेश स जगद्व्यसनक्षयाय ॥ २० ॥

षड्विषाणं षड्दन्तम् । दानाधिवासितमुखं मदशोभिवक्त्रं । हिमाद्रिः हिमालयः स इव धवलं शुभ्रं हिमाद्रितुल्यं शुभ्रमित्यर्थः ॥ २० ॥

र[6]क्षाविधानं प्रति लोकपाला ।
लोकैकनाथस्य दिवोऽभिजग्मुः ॥
सर्वत्र भान्तोऽपि हि चन्द्रपादा ।
भजन्ति कैलासगिरौ विवेशम् ॥ २१ ॥

रक्षाविधानं प्रति रक्षणकरणं प्रति तदुद्दिश्येत्यर्थः । लोकैकनाथस्य मायादेव्युदरप्रविष्टस्य भगवतः हि सर्वत्र भान्तोऽपि चंद्रपादाः चंद्रकिरणाः कैलासगिरौ विवेशं भजंति । महतां अपि समयविशेषेण स्वापकृष्टं सापेक्षत्वं भवतीत्यर्थः ॥ २१ ॥

मायापि तं कुक्षिगतं दधाना । विद्युद्विलासं जलदावलीव ॥
दानाभिवर्षैः परितो जनानां । दारिद्र्यक्लेशं शमयाञ्चकार ॥ २२ ॥

जलदावलीव मेघपंक्तिरिव । दानाभिवर्षैः वितरणवर्षणैः ॥ २२ ॥

---

१ J गतो. २ C ०त्तुषितात् J ०त्तुषिताधिभूतादुद्योतयन् लोकमिमं स्वभासा ॥. ३ C स्मृत. ४ A गुरुपाद्विषा० ५ C ०सितमुखं द्विरदस्य रूपम्. ६ J रक्षार्थमाजग्मुरथो दिशानां नाथाः स्वनाथस्य किमत्र चित्रम् ॥. ७ J भवान्ति. ८ J विवर्णाः A विशेषं. ९ C ०रिद्र्यतापं

सान्तःपुरजना देवी कदाचिदथ लम्बिनी[1] ॥
जगामानुमता[2] राज्ञा सम्भूतोत्तमदोहदा ॥ २३ ॥
शाखामालम्बमानायाः[3] पुष्पभारावलम्बिनीं[4] ॥
देव्याः[5] कुक्षिं विनिर्भिद्य[6] बोधिसत्वो विनिर्ययौ ॥ २४ ॥

लंबनं लंबः भावे घञ्। लंबनमित्यर्थः। लंबमानकंठाभरणविशेषः। लंबनं स्याल्ललंतिकेत्यमरः। स आस्ति अस्या लंबिनी लंबमानकंठाभरणयुक्तेति यावत्। अन्यत् स्पष्टं ॥ २३ ॥ २४ ॥

अथ[7] प्रसन्नश्च बभूव पुष्यस्तस्याश्च देव्या व्रत[8]दिव्यकान्त्याः ॥
पार्श्वात्सुतो लोकहिताय जज्ञे । निर्वेदनं[9] चैव निरामयं च ॥ २५ ॥
प्रातः पयोदादिव तिग्मभानुः । समुद्भवन्सोऽपि च मातृकुक्षेः ॥
स्फुरन्मयूखैर्विहतान्धकारैश्चकार लोकं कनकावदातम् ॥ २६ ॥

व्रतं नियमं गर्भपोषणार्थं विहिताहारादिभगवत्पूजादिश्च तेन दिव्या कांतिः यस्याः तस्याः। कुक्षिभेदने हि वेदना रोगादि च स्यात् इति। तन्निरासार्थमाह निर्वेदनं निरामयं चेति। भगवतकृपया वेदनादि न जातमित्यर्थः ॥ २५ ॥ ॥ २६ ॥

तं जातमात्रमथ काञ्चनयूपगौरः
प्रीत्या[11] सहस्रनयनः स्वकरै[12]रगृह्णात् ॥
मन्दारपुष्पनिकरैः सह तस्य मूर्ध्नि ।
खान्निर्मले च विनिपेततुरम्बुधारे ॥ २७ ॥

यूपः पशुबंधनार्थः यज्ञकाष्ठविशेषः। अनेन पावित्र्यं व्यजते। इंद्रसंबंधश्च अभिप्रेतो भवति। इंद्रो हि यज्ञे हविर्ग्रहणार्थं आयाति इति सुप्रसिद्धं इंद्रेण तत्स्वीकारानंतरं मंदारपुष्पैः सह तस्य मूर्ध्नि निर्मले उदकधारे निपेततुरित्यन्वयः ॥ २७ ॥

सुरप्रधानैः परिधार्यमाणो । देहांशुजालैरनुरञ्जयंस्तान् ॥
सन्ध्याभ्र[13]जालोपरिसन्निविष्टं । नवोडुराजं वि[14]जिगाय लक्ष्म्या ॥ २८ ॥

संध्याभ्रजालोपरि पितृप्रसूमेघसमूहोपरि लक्ष्म्या शोभया। सुरेषु प्रधानाः मुख्याः सुरप्रधानाः तै मुख्यदेवैरित्यर्थः ॥ २८ ॥

ऊरोर्यथोर्वस्य पृथोश्च हस्तान्मान्धातुरिन्द्रप्रतिमस्य मूर्ध्नः ॥
कक्षीवतश्चैव भुजांसदेशात्त[15]थाविधं तस्य बभूव जन्म ॥ २९ ॥

---

१ C A लुम्बिनीम्. २ J निनाय सहसा राज्ञा दोहदाऽऽकुलिता दिनाम् C ०गामानुमते गृहः. ३ J तमालशाखालम्बिन्याः. ४ C भरा. ५ J राज्ञ्याः. ६ C विभिद्याशु. ७ C ततः ८ J पुत्र. ९ C व्रतसंस्कृतायाः J धृतदि०. १० J न वेदना सूतिकृता बभूव. ११ C प्रीतः, १२ C शनकैः for स्वकरैः. १३ J शनकैः सन्ध्याभ्रनीले गगनं प्रविष्टम्।. १४ C A स for वि. १५ J ०थैव तस्याभवदग्रजन्म.

इंद्रप्रतिमस्य इंद्रतुल्यस्य मांधातुः कुक्षेः उदरैकदेशात् । कक्षीवतः ऋषिविशेषस्य भुजसंबंधि योंऽसदेशः तस्मात् । इमानि आख्यानानि पुराणेषु प्रसिद्धानि तत एव द्रष्टव्यानि ॥ २९ ॥

क्रमेण गर्भादभिनिर्गतः[1] सन् । बभौ च्युतः[2] खादिव योऽन्यजातः ॥
कल्पेष्वनेकेष्वपि[3] भावितात्मा । सं[4] संप्रजानन्सुषुवे[5] नमूढः[6] ॥३०॥

न मूढः नमूढः नैकध्वेत्यादिवत् न शब्देन सुप्सुपेति समासः । न शब्दस्य च निरोधार्थकत्वेन मूढविरुद्धः ज्ञानीति यावत् । अनेकेषु कल्पेषु संवर्तेषु शास्त्रेषु वा "कल्पः शास्त्रे विधौ न्याये" इति मेदिनी । भावितात्मा भावितो वासितः आत्मा अंतःकरणं यस्य अनेककल्पकारीत्यर्थः सकलशास्त्रवेत्ता वा अतएव संप्रजानन् इव योन्युत्पत्तिदुःखं जानन्निव अस्य जन्मादिषड्विकाराभावात् इव शब्दोपादानं । वस्तुतः-योनिजोत्पत्यादि दुःखमस्य नास्तीति यावत् । अतएव योन्यजातः एतादृशः सुषुवे क्रमेण गर्भात् अभिनिर्गतः सन् खाच्च्युत इव बभौ ॥ ३० ॥

दीप्त्या च धैर्येण श्रियाँ[7] रराज । बालो रविर्भूमिमिवावतीर्णः ॥
तथेति[8] दीप्तोऽपि निरीक्ष्यमाणो । जहार चक्षूंषि यथा शशाङ्कः ॥३१॥

दीप्त्येति । अनेन श्लोकोत्तरार्धेन अस्य प्रतापोऽपि लोकानामाल्हादक एव न तु पीडक इति सूचितं । अस्मिन्पद्ये 'धैर्येण श्रिया' इत्यत्र णकारस्य गुरुत्वं न दोषाय । तदुक्तं छंदप्रकाशे 'यदा तीव्रप्रयत्नेन संयोगादेरगौरवं । न छंदोभंग इत्याहुस्तददोषाय सूरयः' इति । अतएव 'प्राप्तनाभिह्रदमज्जनमासां' इति माघे ॥ ३१ ॥

स हि स्वगात्रप्रभयोज्ज्वलन्त्यां[9] । दीपप्रभां[10] भास्करवन्मुमोष ॥
महार्हजाम्बूनदचारुवर्णो । विद्योतयामास दिशश्च सर्वाः ॥ ३२ ॥

महार्हं महामूल्यं अत्युत्तममिति यावत् यत् जांबूनदं सुवर्णं तद्वत् चारुः सुंदरो वर्णो यस्य ॥ ३२ ॥

अनाकुलान्यब्जसमुद्गतानि । निष्पेषवन्त्यायतविक्रमाणि ॥
तथैव धीराणि पदानि सप्त । सप्तर्षिसंघैसदृशो[11] जगाम ॥ ३३ ॥

सप्तर्षिसंघोज्ज्वलभसदृशः सप्तर्षिनक्षत्रपुंजतुल्यः अनेन तेजस्विता सूचिता । सप्तपदानि जगामेत्यन्वयः । पदशब्दोऽत्र लक्षणया पादन्यासपरः । 'कालाध्वनोरत्यंतसंयोगे' इति द्वितीया । सप्तसंख्यांकपादन्यासपर्यंतं जगामेत्यर्थः । देवदत्तो दश पदानि गतः इति यावत् लोके प्रसिद्धोयं प्रयोगः । पदानि विशिनष्टि अनाकुलानीत्यादिना । अनाकुलानि अव्यग्राणि । अब्जवत् कमलवत् समुद्गतानि भूमौ

१ C निःसृतः. २ C गतः. ३ J ०ष्विव. ४ C यः. A प्रसन्ने न. ५ J पुपुषे न मौढ्यम्. ६ C न मूढ. ७ A रराज लक्ष्म्या. ८ C तथापि. ९ C ०लन्त्या. १० C दीपप्रभाम्. ११ C ०र्षितारा-

अंकितानि निष्पेषवंति पादलिप्तालक्तादिचूर्णवंति आयतः दीर्घः विक्रमः न्यासो येषां तानि धीराणि गंभीराणि ॥ ३३ ॥

बोधाय जातोऽस्मि जगद्धितार्थ-
मन्त्या[1] ममोत्पत्तिरियं धरित्र्याम्[2] ॥
चतुर्दिशं सिंहगतिर्विलोक्य ।
वाणीं स[3] भव्यार्थकरीमुवाच ॥ ३४ ॥

जगद्धितार्थं बोधाय जगद्धितफलकज्ञानायेत्यर्थः । अन्त्या चरमा । इतःपरं अवताराभावात् । अतः न लाभाय सर्वैः झटिति यतितव्यं । चतसृणां दिशां समाहाः चतुर्दिशं । भव्यार्थकरीं कुशलार्थप्रतिपादिकामित्यर्थः । इति बोधाय जातोऽस्मि । मम इयं उत्पत्तिरंत्या इत्याकारिकां वाणीं उवाचेत्यर्थः ॥ ३४ ॥

खात्प्रस्नुते चन्द्रमरीचिशुभ्रे । द्वे वारिधारे शिशिरोष्णवीर्ये ॥
शरीरसौख्यार्थमनूपमस्य[4] । निपेततुर्मूर्धनि तस्य दिव्ये[5] ॥ ३५ ॥

शिशिरोष्णे वीर्ये गुणैर्ययोस्ते । अनुत्तरस्य नास्ति उत्तरः श्रेष्ठो यस्मात् तस्य ॥ ३५ ॥

श्रीमद्वितानेकनकोज्[6]वलांगे । वैदूर्[7]यपादे शयने शयानम् ॥
[8]बुद्धं विपश्यन्नथ पद्महस्तो यक्षेश्वरः संमुदितः स तस्थौ ॥ ३६ ॥

श्रीमद्विताने महार्होल्लोचे । कनकवत् कनकेन वा उज्ज्वलानि अंगानि यस्य तस्मिन् । वैदूर्याणां रत्नविशेषाणां पादः तस्मिन् वैदूर्यमणिखचितपादे ॥ ३६ ॥

मायातनूजस्य दिवौकसः खे । यस्य प्रभा[9]वात्प्रणतैः शिरोभिः ॥
आधारयन् पांडुर[10]मातपत्रं । बुद्धाय[11] जेपुः परमाशिषश्च ॥ ३७ ॥

मायातनूजस्य मायादेवीपुत्रस्य । यस्य शुद्धोदनपुत्रस्य प्रभावात् प्रतापात् प्रणतैः शिरोभिः दिवौकसः खे पांडुरं आतपत्रं आधारयन् । बुद्धाय शौद्धोदनाय परमाशिषः जेपुश्च इत्यन्वयः ॥ ३७ ॥

महोरगा धर्मविशेषतर्षाद्बुद्धेष्वतीतेषु कृताधिकाराः ।
यं[12] व्याजयन् भक्तिविशिष्ट[13]चित्ता । मंदारपुष्पैः समवाकिरंश्च ॥ ३८ ॥

धर्मविशेषः पुण्यविशेषः तस्य तर्षः तृष्णा इच्छेति यावत् । अतीतेषु अतिक्रान्तेषु बुद्धेषु कृताधिकाराः एतादृशाः महोरगाः यं व्याजयन् च मंदारपुष्पैः समवाकिरन् ॥ ३८ ॥

---

१ C तथो. २ C ममेति. ३ C च. ४ C मनुत्तरस्य; A मनुत्तम॰. ५ C सौम्ये. ६ C ॰ज्ज्वल. ७ C डू. ८ A तद्वौ, यद्वौरवात्कांचनपद्म॰ A हस्ता यक्षेश्वरी संमुदितावतस्थे J ॰हस्ता यक्षाधिपाः संपरिवार्य तस्थुः. ९ J प्रतापानतमूर्धिभिश्च. १० C पाण्डर. ११ C बोधाय. १२ C यमव्यजन्. १३ ॰शिष्टनेत्रा.

तथागतोत्पत्तिगुणेन तुष्टाः । शुद्धाधिवासाश्च विशुद्धसत्त्वाः ।
देवा ननन्दुर्विगतेऽपि रागे । मग्नस्य दुःखे जगतो हितार्थे ॥३९॥

तथागतोत्पत्तिगुणेन बुद्धोत्पत्तिगुणेन । शुद्धे पवित्रे पुण्यप्राप्ये स्वर्गे इति यावत् । अधिकः वासो येषां । अतएव विशुद्धसत्वाः विशुद्धांतःकरणाः देवाः रागे प्रेम्णि विगतेपि तेषां पक्षपाताभावात् विरागित्वादेवमुक्तिः । दुःखे मग्नस्य जगतः हिताय ननंदुरित्यन्वयः । देवानां दयालुत्वात् दुःखाक्रांतजगदवमोचनाय देवा ननंदुरित्यर्थः ॥ ३९ ॥

यस्मिन्प्रसूते गिरिराजकीला । वाताहता नौरिव भूश्चचाल ।
सचंदना चोत्पलपद्मगर्भा । पपात वृष्टिर्गगनादनभ्रात् ॥ ४० ॥

यस्मिन्प्रसूते प्रादुर्भूते सति गिरिराजाः पर्वताः कीला इव यस्याः एतादृशी भूः भूमिः। सा हि पर्वतैरवष्टब्धेति पुराणेषु प्रसिद्धम्। अतएव ते भूधराः इति व्यपदिश्यन्ते। उत्पलपद्मे कमलविशेषे गर्भे यस्याः। अनभ्रात् अभ्ररहितात्। तज्जन्मनि अखिलं आश्चर्यकारकमासीदित्यर्थः ॥ ४० ॥

वाता ववुः स्पर्शसुखा मनोज्ञा ।
दिव्यानि सूनान्यवपातयन्तः ॥
सूर्यः स एवाभ्यधिकं चकासे ।
जज्वाल सौम्यार्चिरनीरितोऽग्निः ॥ ४१ ॥

स्पर्शसुखाः सुखः स्पर्शो येषां ते स्पर्शसुखाः। सुखस्पर्शा इत्यर्थः आहिताग्न्यादित्वात्परनिपातः । सूनानि पुष्पाणि । “सूनं प्रसवपुष्पयोः” इति मेदिनी । अनीरितः अप्रेरितः अध्यात इति यावत् । महतां जन्मनि हि एतानि जायन्ते ॥ ४१ ॥

प्रागुत्तरे चावसथप्रदेशे ।
कूपः स्वयं प्रादुरभूत्सितांबुः ॥
अंतःपुराण्युद्गतविस्मयानि ।
यस्मिन्क्रियास्तीर्थ इव प्रचक्रुः ॥ ४२ ॥

आवसथस्य गृहस्य प्रदेशे । प्राचः उत्तरे प्रागुत्तरे प्रागित्यत्र अचेर्लुगिति अस्तातेर्लुक् लुक्तद्धितेति ङीपोलुक् । प्राच्याः दिशः उत्तरे भागे इत्यर्थः । “पूर्वादिभ्यो नवभ्यो वेति स्मिन्नादेशाऽभावः । अंतःपुराणि अंतःपुरगतस्त्रियः मंचाः क्रोशंतीतिवत् तात्स्थात्ताच्छब्द्यं । यस्मिन् कूपे क्रियाः स्नानादिकाः । उद्गतविस्मयानि अतर्कितोत्पत्तेः संजाताश्चर्याणि ॥ ४२ ॥

---

१ C A ० गतस्यातिगु०— ०प्राद for प्रत्ति. २ C हिताय. ३ A सोत्पलत्रप्रगर्भा. ४ C ०गणा. ५ C वासांस्यव०. ६ C ०चकाशे. ७ C A ण्यागत.

धर्मार्थिभिर्भूतगणैश्च दिव्यैस्तद्दर्शनार्थं भृशमाप पूरः[1] ॥
कौतूहलेनैव च पादपानां[2] प्रपूजयामास सगन्धपुष्पैः ॥ ४३ ॥

धर्मार्थिभिः पुण्यार्थिभिः । भूतगणैः देवयोनिविशेषैः । पूरः कूपस्थजलपूर इत्यर्थः । कौतूहलेनैव विस्मयकारिभगवदवतारजन्यकौतुकेन । गंधपुष्पाणि गंधयुक्तपुष्पाणि । शाकप्रियपार्थिववत् समासः । गंधपुष्पैः सहिताः सगंधपुष्पाः तैः पादपैः वृक्षैः । यथा कश्चित् आप्तबांधवैः सह देवदर्शनादियात्रां करोति तत्रत्यं देवं स्वहस्तधृतपुष्पैः पूजयति च । एवमयं कूपस्थोदकपूरः भूतगणैः सह तत्रागत्य सतीरवर्तिपादपरूपहस्तधृतपुष्पैः तं पूजयामासेवेति तात्पर्यं ॥ ४३ ॥

पुष्पद्रुमाः[3] स्वं कुसुमं पुफुल्लुः । समीरणोद्भ्रामितदिक्सुगंधं ॥
सुसंभ्रमद्भृंगवधूपगीतं । भुजंगवृंदेन[4] च पीतवातं ॥ ४४ ॥

कुसुममिति जात्येकवचनं कुसुमानीत्यर्थः पुफुल्लुः प्रादुर्भावयांचक्रुः।अत्र फुल्लधातुरंतर्भावितण्यर्थः । समीरणेन उद्भ्रामितः प्रसारितः दिक्षु सुगंधो यस्य । सुसंभ्रमंत्यः इतस्ततो हिंडंत्यः या भृंगवध्वः तासां उपगीतं गुंजारवो यस्मिन् । भुजंगवृंदेन हेतुना पीतः प्राशितः वातः वायुः येन ॥ ४४ ॥

क्वचित्क्वणत्तूर्यमृदंगगीतै-
र्वीणामुकुंदामुरजादिभिश्च ।
स्त्रीभिश्चलत्कुंडलभूषिताभि-[5][6]
र्विराजितं चोभयपार्श्वतस्तत् ॥ ४५ ॥

तत् मायादेवीसुतोत्पत्तिस्थानं उभयपार्श्वतः उभयपार्श्वयोरित्यर्थः । उभौ च तौ पार्श्वौ च उभयपार्श्वौ तयोः उभयपार्श्वत इत्यत्र आद्यादित्वात्तसिः । विराजितं शोभितं कैरिति अपेक्षायामाह । क्वचित् क्वणंति शब्दायमानानि यानि तूर्याणि मृदंगाः गीतानि च तैः विराजितं क्वचित् वीणा मुढक्का । यशःपटहः मुरजः एते आदयो येषां । चलत्कुंडलभूषिताभिः स्त्रीभिः क्वचित् विराजितं । न चात्र मृदंगमुरजयोः पौनरुक्त्यं शक्यं एकः क्वणन् अपरः केवलमेव आसीदित्यन्वयः ॥४५॥

यद्राजशास्त्रं भृगुरंगिरा वा ।
न चक्रतुर्वंशकरावृषी तौ ॥
तयोः सुतौ तौ च विचक्रतुस्त-[7] ।
त्कालेन शुक्रश्चबृहस्पतिश्च ॥ ४६ ॥

पुत्रादिच्छेत्पराजयमितिन्यायेन क्वचित् पित्रादिभ्योपि पुत्रादयः विद्वांसो भवं-

---

१ C बलमाप पूरः; A बलभी पपार. २ पादपैश्च. ३ A पुष्पद्रुमाणां स्वकुसुमं पुफुल्ल. ४ भुजंगवृन्दाभिहितात्तवातम्. ५ C स्त्रीणां. ६ C ०तानाम्. ७ C ससर्जतुः.

तीति बोधनपूर्वकं अस्य माहात्म्यकथनार्थमनेकदृष्टान्तानाह—यद्राजशास्त्रमिति ॥ नीतिशास्त्रं वंशकरौ तौ ऋषी कौ तौ भृगुः अंगिरा वा न चक्रतुः तत् नीतिशास्त्रं तयोः भृग्वंगिरसोः सुतौः शुक्रः बृहस्पतिश्च विचक्रतुः ॥ ४६ ॥

सारस्वतश्चापि जगाद नष्टं ।
वेदं पुनर्यं ददृशुर्न पूर्वे ॥
व्यासस्तथैनं बहुधा चकार ।
न यं वसिष्ठः कृतवाञ्शक्तिः ॥ ४७ ॥

वल्मीकजातश्च ससर्ज पद्यं ।
जग्रंथ यन्न च्यवनो महर्षिः ॥
चिकित्सितं यच्च चकार नात्रिः ।
पश्चात्तदात्रेय ऋषिर्जगाद ॥ ४८ ॥

पूर्वे ऋषयः पराशरादयः यं वेदं न ददृशुः तं नष्टं वेदं सारस्वतः सरस्वती-तीरस्थः व्यासः एनं वेदं बहुधा जगाद। यं शक्तिः न कृतवान् तं वसिष्ठः चकार ॥ ४७ ॥ ॥ ४८ ॥

यच्च द्विजत्वं कुशिको न लेभे । तत्साधनं सूनुरवाप राजन् ॥
वेलां समुद्रे सगरश्च दध्रे । नेक्ष्वाकवो यां प्रथमं बबंधुः ॥ ४९ ॥

हे राजन् यत् द्विजत्वं कुशिकः एतन्नामकराजा न लेभे तत् सूनुः विश्वामित्रः अवाप प्राप । इक्ष्वाकवः इक्ष्वाकुवंशप्रभवाः यां वेलां समुद्रे प्रथमं न बबंधुः तां सगरः दध्रे ॥ ४९ ॥

आचार्यकं योगविधौ द्विजानामप्राप्तमन्यैर्जनको जगाम ॥
ख्यातानि कर्माणि च यानि शौरेः। शूरादयस्तेष्वबला बभूवुः॥५०॥

अन्यैः अप्राप्तं एतादृशं योगविधौ द्विजानां यत् आचार्यकं आचार्यत्वं तत् जनको जगाम । शौरेः श्रीकृष्णस्य यानि ख्यातानि कर्माणि तेषु शूरादयः अबलाः असमर्था बभूवुः ॥ ५० ॥

तस्मात्प्रमाणं न वयो न कालः ।
कश्चित् क्वचिच्छ्रैष्ठ्यमुपैति लोके ॥
राज्ञामृषीणां च हितानि तानि ।
कृतानि पूर्वैरकृतानि पुत्रैः ॥ ५१ ॥

एवं नृपः प्रत्यायितैर्द्विजैस्तैराश्वासितश्चाप्यभिनंदितश्च ॥
शंकामनिष्टां विजहौ मनस्तः प्रहर्षमस्मोद्धृशमारुरोह ॥ ५२ ॥

---

१ C पूर्वे. २ C ०वानशक्तिः. ३ C वाल्मिकीनादश्च. ४ C पुत्रैरकृतानि पूर्वैः. ५ C सेत्राधिकामा०.

नृपः शुद्धोदनः प्रत्यर्पितैः संजातानुभवैः तैः तत्रत्यैर्द्विजैः आश्वासितः अभिनंदितश्च सन् अनिष्टां शंकां किमेतत् कथमयं अयोनिजः उदरं भित्वा बहिर्यातः कथं वा कूपोत्पत्तिः कथं वा शीतोष्णोदकधारे एनं सेवेते किमिदं भूतं वा इत्याद्यनिष्टां आशंकां मनस्तः प्रजहौ ॥ ५१ । ५२ ॥

प्रीतश्च तेभ्यो द्विजसत्तमेभ्यः ।
सत्कारपूर्वं प्रददौ धनानि ॥
भूयादयं भूमिपतिर्यथोक्तो ।
यायाज्जरामेत्य वनानि चेति ॥ ५३ ॥

सत्कारः आदरः पूर्वो यस्मिन् कर्मणि यथास्यात्तथा । दानक्रियाविशेषणमेतत् । यथोक्तः उक्तप्रकारविशिष्टः । जरां वार्धक्यं । एत्य वनानि यायात् गच्छेत् । पूर्वे राजर्षयो हि पूर्वाऽवस्थायां सम्यक् राज्यं पालयित्वा उत्तरे वयसि ब्रह्मज्ञानार्थं अरण्यानि गत्वा तत्र तपआदिना देहसार्थक्यं चक्रुः । तद्वदयमपि करिष्यतीति तात्पर्यं ॥ ५३ ॥

अथो निमित्तैश्च तपोबलाच्च । तज्जन्म[1] जन्मांतकरस्य बुध्वा ॥
शाक्येश्वरस्यालयमाजगाम । सद्धर्मतर्षादसितो महर्षिः ॥ ५४ ॥

निमित्तैः पूर्वोक्तानेकविधशुभचिन्हैः । तपोबलात् योगसामर्थ्यात् । जन्मान्तकरस्य जन्ममरणादिरूपसंसारस्य अंतं नाशं करोतीति तथाभूतस्य परमेश्वरस्येत्यर्थः । तज्जन्म तमवतारमित्यर्थः । असितः असितनामकः । सद्धर्मतर्षात् उत्तमपुण्यादिलोभात् । शाक्येश्वरस्य पूर्वोक्तस्य ॥ ५४ ॥

स[2] ब्रह्मविद् ब्रह्मविदां ज्वलंतं । ब्राह्मया श्रिया चैव तपःश्रिया च ॥
राज्ञो गुरुर्गौरवसत्कृतं[3] तं[4] । प्रवेशयामास नरेन्द्रसद्म ॥ ५५ ॥

ब्राह्मया श्रिया ब्रह्मवर्चसेन । तपःश्रिया तपःसामर्थ्येन । ब्रह्मविदां मध्ये । ज्वलंतं देदीप्यमानं । गौरवसत्कृतं तं असितं । राज्ञः शुद्धोदनस्य । सः गुरुः उपाध्यायः । नरेंद्रसद्म राजगृहं । प्रवेशयामास । विदुषां आनयनं गुरुणा कर्तव्यं इति रीतिः शाकुंतलादौ स्पष्टा ॥ ५५ ॥

स पार्थिवान्तःपुरमेव[5] विद्वान् । कुमारजन्मागतहर्षवेगम् ॥
विवेश निःशंकतयैव[6] धीरस्तपःप्रकर्षाच्च जराश्रयाच्च ॥ ५६ ॥

स असितः । कुमारजन्मागतहर्षवेगं कुमारस्य जन्मना आगतो हर्षवेगो यस्य एतादृशं पार्थिवांतःपुरं निःशंकतया विवेश । निःशंकतया प्रवेशे हेतुभूतविशेषणे- धीरः विद्वानिति । तपः प्रकर्षात् जराश्रयात् इदमपि हेतुद्वयं प्रवेशे ज्ञेयं ॥ ५६ ॥

---

१ A तज्जन्मनाशौ स्वमतौ स बुध्वा. २ C A तं ३ C सन्त्क्रियाभ्यां. ४ C A स. ५ C पुरसन्निकर्षं— ६ C ०वेश धीरो बलसंज्ञयैव.

ततो नृपस्तं मुनिमासनस्थं । पाद्यार्घ्यपूर्वं प्रतिपूज्य सम्यक् ॥
निमंत्रयामास यथोपचारं । यथा वसिष्ठं स हि रन्तिदेवः ॥ ५७ ॥

पाद्यं च अर्घ्यं च ते पूर्वे यस्मिन् कर्मणि यथास्यात्तथा पाद्यार्घ्यपूर्वं उपचारान् अनतिक्रम्य इति यथोपचारं सम्यक् प्रतिपूज्य निमंत्रयामास बभाषे इत्यर्थः ॥ ५७ ॥

धन्योऽस्म्यनुग्राह्यमिदं कुलं मे ।
यन्मां दिदृक्षुर्भगवानुपेतः ॥
आज्ञाप्यतां किं करवाणि सौम्य ।
शिष्योऽस्मि विश्रंभयितुं त्वमर्हः ॥ ५८ ॥

बभाषे इत्युक्तं तदेवाह । धन्योऽस्मीत्यादिना । स्पष्टोऽर्थः ॥ ५८ ॥

एवं नृपेणोपनिमंत्रितः सन् । सर्वेण भावेन मुनिर्यथावत् ॥
स विस्मयोत्फुल्लविशालदृष्टिर्गंभीरधीराणि वचांस्युवाच ॥ ५९ ॥

उपनिमंत्रितः प्रार्थितः । यथावत् यथायथं । उवाचेत्यर्थः ॥ ५९ ॥

महात्मनि त्वय्युपपन्नमेतत् । प्रियातिथौ त्यागिनि धर्मकामे ॥
सत्वान्वयज्ञानवयोऽनुरूपा । स्निग्धा यदेवं मयि ते मतिःस्यात् ॥ ६० ॥

किमुवाच तदाह—महात्मनीत्यादिना । सत्वं अंतःकरणं अन्वयः सद्वंशः ज्ञानं बुद्धिः वयश्च एतेषामनुरूपा योग्या । यत् यस्मात् कारणात् ॥ ६० ॥

एतच्च तद्येन नृपर्षयस्ते धर्मेण सूक्ष्मेण धनान्यपास्य ॥
नित्यं यजंतो विधिवद्बभूवुस्तपोभिराढ्या विभवैर्दरिद्रा ॥ ६१ ॥

ते नृपर्षयः सूक्ष्मेण धर्मेण धनान्यपास्य त्यक्त्वा नित्यं विधिवत् यजन्तः तपोभिः आढ्याः युक्ताः च विभवैः ऐश्वर्यैः दरिद्राः बभूवुः इति यत् तदेतदित्यन्वयः ॥ ६१ ॥

प्रयोजनं यत्तु ममोपयाने । तन्मे शृणु प्रीतिमुपेहि च त्वं ॥
दिव्या मया दिव्यपथे श्रुता वाग् । बोधाय जातस्तनयस्तवेति ॥ ६२ ॥

मे मत्तः । तव तनयः बोधाय जातः इति दिव्या वाक् दिव्यपथे मया श्रुतेति अन्वयः ॥ ६२ ॥

श्रुत्वा वचस्तच्च मनश्च युक्त्वा ।
ज्ञात्वा निमित्तैश्च ततोऽस्म्युपेतः ॥
दिदृक्षया शाक्यकुलध्वजस्य ।
शक्रध्वजस्येव समुच्छ्रितस्य ॥ ६३ ॥

तत् आकाशवाणीरूपं वचः श्रुत्वा च मनः युक्त्वा अन्तःकरणमेकाग्रं कृत्वेत्यर्थः । निमित्तैः शुभचिह्नैः ज्ञात्वा अयं भगवानवतीर्ण इति ज्ञात्वेत्यर्थः समुच्छ्रितस्य शक्रध्वजस्येव शाक्यकुलध्वजस्य दिदृक्षया उपेतोऽस्मीत्यन्वयः ॥ ६३ ॥

---

१ C पुरा वशिष्ठं स इवान्ति०. २ C विश्रंभितुमर्हसीति. ३ C सूक्ष्माणि.

इत्येतदेवं वचनं निशम्य । प्रहर्षसंभ्रांतमतिर्नरेन्द्रः ॥
धात्र्यंकसुप्तं कुमरं प्रशान्तं । संदर्शयामास तपोधनाय ॥ ६४ ॥

धात्र्याः उपमातायाः अंके उत्संगे सुप्तं । स्पष्टमन्यत् ॥ ६४ ॥

चक्राङ्कपादं स तथा महर्षिर्जालावनद्धांगुलिपाणिपादं ॥
सोर्णभ्रुवं वारणबस्तिकोशं । सविस्मयं राजसुतं ददर्श ॥ ६५ ॥

चक्रं अंकः ययोस्तौ चक्रांकौ तौ पादौ यस्य तं अनेन महापुरुषत्वं दर्शितं एवमग्रेऽपि ज्ञेयं । जालं नवकलिकावृंदं तद्वत् अवनद्धाः संलग्नाः अंगुलयो यास्मिन् एतादृशं पाणिपादं यस्य तं । ऊर्णा भ्रूमध्यस्थ आवर्तः । "ऊर्णा मेषादिलोम्नि स्यादावर्ते चांतराभ्रुवोः " इत्यमरः । तेन सहिते भ्रुवौ यस्य सः तं । वारणस्येव हस्तिन इव बस्तिः कोशः नाभेरधोभागो यस्य तं । सविस्मयं साश्चर्यं । दुर्लभमहापुरुषलक्षणवैशिष्ट्यादाश्चर्यं ॥ ६५ ॥

धात्र्यंकसंविष्टमवेक्ष्य चैनं ।
देव्यंकसंविष्टमिवाग्निसूनुं ॥
बभूव पक्ष्मांतरितांचिताश्रु-
र्निश्वस्य चैवं त्रिदिवोन्मुखोऽभूत् ॥ ६६ ॥

देव्यंकसंविष्टं पार्वत्युत्संगोपविष्टं । अग्निसूनुं कार्तिकेयं । पक्ष्मभिः अक्षिलोमाभिः अन्तरितानि व्यवहितानि अंचितानि पूजितानि मनोहराणीत्यर्थः अश्रूणि यस्य । त्रिदिवे आकाशे उद्गतं मुखं यस्य आकाशावलोकनकारी ॥ ६६ ॥

दृष्ट्वासितं त्वश्रुपरिप्लुताक्षं । स्नेहाद्धि पुत्रस्य नृपश्चकम्पे ॥
सगद्गदं बाष्पनिरुद्धकंठः । पप्रच्छ तं प्राञ्जलिरानतांगः ॥ ६७ ॥

अश्रुपरिप्लुताक्षं असितं दृष्ट्वा बाष्पनिरुद्धकंठः बाष्पेण निरुद्धः कंठो यस्य ॥ ६७ ॥

स्वल्पान्तरं यस्य वपुर्मुने स्याद्बह्वद्भुतं यस्य च जन्मदीप्तं ॥
यस्योत्तमं भाविनमात्थ चार्थं । तं प्रेक्ष्य कुतस्तव धीर बाष्पः॥६८॥

हे धीर मुने यस्य स्वल्पावकाशं लघु इति यावत् एवमपि यस्य जन्म बह्वद्भुतं दीप्तं च यस्य भाविनं भविष्यत्कालिकं अर्थं प्रयोजनं उत्तमं आत्थ तं प्रेक्ष्य तव बाष्पः कुत इत्यन्वयः ॥ ६८ ॥

अपि स्थिरायुर्भगवन्कुमारः । कच्चिन्न शोकाय मम प्रसूतः ॥
लब्धः कथंचित्सलिलांजलिर्मे। न खल्विमं त्रांतुमुपैति कालः॥६९॥

स्वात्मजदर्शनेन अश्रुमुखं मुनिं वीक्ष्य भीतो नृपः पुत्रस्य अत्याहितमाशंक्य अनेकविकल्पान् करोति अपिस्विदित्यादिना । हे भगवन् कुमारः स्थिरायुः चिरायुः अपिस्वित् । मम शोकाय प्रसूतः न कच्चित् । मे मया कथंचित् सलिलांजलिः

---

१ C गति for मति. २ C आदाय धात्र्यंकगतं कुमारं. ३ C वां for तां. ४ C वं for व. ५ C ०ह्वात्तुपु०. ६ C बाष्पकषायकंठः. ७ C च for तं ८ C करम.त्तव. ९ C पातु. would not हर्तुं be better?

लब्धः । परलोके पुत्रः सलिलांजलिं दास्यति इत्यभिप्रायेण सलिलांजलिर्लब्ध इत्युक्तं । इमं पूर्वोक्तं सलिलांजलिं कालः मृत्युः पातुं खलु नोपैति इत्यन्वयः । विपत्तौ सलिलांजलेरभावात् तस्मिन् मृत्युपीतत्वोपचारः ॥ ६९ ॥

अस्त्यक्षयं[1] मे यशसो निधानं । कच्चिद्ध्रुवो मेऽन्वयसंप्रसारः[2] ॥
अपि प्रयास्यामि सुखं परत्र । सुप्तेऽपि पुत्रेऽनिमिषैकचक्षुः ॥७०॥

यशसः निधानं निधिः अपि अक्षयं । पुत्रसत्वे यशसोऽक्षयत्वमित्यर्थः । मेऽन्वयसंप्रसारः वंशविस्तारः ध्रुवः कच्चित् । अनिमिषं निमेषरहितं एकं चक्षुर्यस्य देवानां निमिषो नास्तित्यभिप्रायेण । अथवा पुत्रस्य 'पुत्रेण लोकं जयतीति श्रुत्या स्वर्गप्रदर्शकत्वात् चक्षूरूपत्वं । तस्मिन् पुत्रे जाग्रति स्वर्गदर्शनं निर्विवादमेव तस्मिन् सुप्तेपि तस्य विद्यमानत्वात् स्वर्गलोकदर्शनं भवति पुत्रसत्तैव स्वर्गप्रदर्शिका न तु तस्य जाग्रदवस्थे स्वर्गप्रदर्शिकेति नियमः । प्रसिद्धं नेत्रं तु उद्धाटितमेव वस्तुप्रदर्शकं न तु पिहितमपि वस्तुगत्या विद्यमानं पदार्थदर्शकं भवति इति लौकिकचक्षुरपेक्षया पुत्ररूपचक्षुषः विलक्षणत्वं प्रदर्शितमिति दिक् । मम पुत्रः चिरकालमपि जीवेत् इति प्रश्नाभिप्रायः ॥ ७० ॥

कच्चिन्नमेजातमफुल्लमेव ।
कुलप्रवालं परिशोषभागि ॥
क्षिप्रं विभो ब्रूहि न मेऽस्ति शांतिः ।
स्नेहं सुते वेत्सि हि बान्धवानां॥ ७१ ॥

हे विभो मे जातं कुलप्रवालं कुलांकुरः अफुल्लमेव अविकसितमेव परिशोषभागि परिशोषं शुष्कतां भजतीति परिशोषभागि शुष्कमित्यर्थः । न कच्चित् । तत् क्षिप्रं ब्रूहि । स्पष्टमन्यत् ॥ ७१ ॥

इत्यागतावेगमनिष्टबुद्ध्या । बुध्वा नरेन्द्रं स मुनिर्बभाषे ॥
मा भून्मतिस्ते नृप काचिदन्या । निःसंशयं तद्यदवोचमस्ति ॥७२॥

इति अनिष्टबुध्या आगतावेगं आगतसाध्वसं । नरेंद्रं बुध्वा सः मुनिः बभाषे हे नृप ते अन्या विपरिता काचित् मतिः बुद्धिः माभूत् । यत् अहं अवोचं तत् निःसंशयमस्तीत्यन्वयः ॥ ७२ ॥

नास्त्यान्यथात्वं प्रति विक्रिया मे ।
स्वां वंचनां तु प्रति विक्लवोऽस्मि[3] ॥
कालो हि मे यातुमयं च जातो[4] ।
जन्मक्षयस्यासुलभस्य बोद्धा ॥ ७३ ॥

यदि बालकस्य किंचिदत्याहितं नास्ति तर्हि बालावलोकनेन तव साश्रुत्वादि विक्रिया किंनिमित्ता इत्यपेक्षायामाह—नास्येति । अन्यथात्वं वैपरित्यं प्रति । स्वां वंचनां व्यर्थायुर्व्ययं प्रति विक्लवः विव्हलः अस्मि । तामेव वंचनां दर्शयति ।

---

१ C अप्य. २ C कुलहस्तसारः. ३ A स्ववंचनायाप्रतिदैन्यमस्ति । कालोह्यगाद्यातुमितीह बालो. ४ C जाति.

हि मे मम यातुं गंतुं कालः गमनस्य कालः इत्यर्थः । "काल समयवेलासु" इति तुमुन् । असुलभस्य दुर्लभस्य जन्मक्षयस्य मोक्षस्येत्यर्थः बोद्धा अयं जातः॥७३॥

विहाय राज्यं विषयेष्वनास्थ । स्तीव्रैर्हि[1] यत्नैरधिगम्य तत्वं ॥
जगत्ययं मोहतमो निहंतुंज्वलिष्यति ज्ञानमयो हि भानु[2]:॥७४॥

बालस्य भाविनमर्थं वर्णयाति विषयेषु अनास्थः अयं राज्यं विहाय तीव्रैः प्रयत्नैः तत्वमधिगम्य जगति मोहतमो निहन्तुं ज्ञानमयः सूर्यः ज्वलिष्यति हि ॥७४॥

दुःखार्णवाद्व्याधिविकीर्णफेनाज्जरातरंगान्मरणोग्रवेगात् ॥
उत्तारयिष्यत्ययमुह्यमान । मार्तं जगद्ज्ञानमहाप्लवेन ॥ ७५ ॥

दुःखार्णवात् दुःखसमुद्रात् व्याधयः एव विकीर्णो विक्षिप्ताः फेनो यस्मिन् । उह्यमानं निमज्जत् । ज्ञानमेव महाप्लवः महती नौका तयेत्यर्थः ॥ ७५ ॥

प्रज्ञांबुवेगां[3] स्थिरशीलवप्रां । समाधिशीतां व्रतचक्रवाकाम् ॥
अस्योत्तमां धर्मनदीं प्रवृत्तां । तृष्णार्दितः पास्यति जीवलोकः॥७६॥

प्रज्ञैव अंबु उदकं तस्य वेगो यस्यां । स्थिरं शीलं स्वभाव एव वप्रो तटं यस्याः । समाधिना शीतां शीतलां । व्रतानि नियमा एव चक्रवाका यस्यां । अस्य एतत् संबंधिनीं जन्मजनकभावः संवधः एतस्मादुत्पन्नामित्यर्थः । धर्मः पुण्यं ज्ञानं वा सैव नदी ताम् इत्यादि अन्वयः ॥ ७६ ॥

दुःखार्दितेभ्यो विषयावृतेभ्यः ।
संसारकांतारपथस्थितेभ्यः ॥
आख्यास्यति ह्येष विमोक्षमार्गं ।
मार्गप्रनष्टेभ्य इवाध्वंगेभ्यः ॥ ७७ ॥

संसार एव कांतारपथः दुर्गममार्गः तत्र स्थितेभ्यः मार्गः प्रनष्टो येषां । आहिताग्न्यादित्वात् परनिपातः । अध्वगेभ्यः पांथेभ्यः ॥ ७७ ॥

विदह्यमानाय जनाय लोके । रागाग्निनायं विषयेंधनेन ॥
प्रल्हादमाधास्यति धर्मवृष्ट्या । वृष्ट्या महामेघ इवातपांते ॥७८॥

लोके विषया एव इंधनानि यस्य तेन रागाग्निना विदह्यमानाय जनाय आतपांते ग्रीष्मांते वृष्ट्या महामेघ इव अयं धर्मवृष्ट्या प्रल्हादं आधास्यतीत्यन्वयः ॥७८॥

तृष्णार्गलं मोहतमःकपाटं । द्वारं प्रजानामपयानहेतु ॥
विपाटयिष्यत्त्ययमुत्तमेन । सद्धर्मताडेन दुरासदेन ॥ ७९ ॥

तृष्णैव अर्गला प्रतिबंधककाष्ठविशेषो यस्य । मोहतमः एवं कपाटं आच्छादनफलकं यस्य । अपयानहेतु अपकृष्टं यानं गमनं येन सः अपयानः कुमार्गः तस्य हेतु कारणं मार्गस्य कुत्सितत्वे हि कुत्सितं गमनं भवति । कुमार्गगमनसाधनं । विपाटयिष्यति द्वैधीकरिष्याति । दुरासदेन दुष्प्रापेन । सद्धर्म एव ताडः ताडनं तेन ॥ ७९ ॥

---

१ C तीव्रैः प्रयत्नै. २ C सूर्यः. ३ A कूलां

[1]मोहपाशैः परिवेष्टितस्य । दुःखाभिभूतस्य निराश्रयस्य ॥
लोकस्य सं[2]बोद्धय च धर्मराजः । करिष्यते बन्धनमोक्षमेषः ॥८०॥

संबोध्य ज्ञानं प्रापय्य एषः धर्मराजः लोकस्य बंधनमोक्षं करिष्यते ॥ ८० ॥

तन्मा कृथाः शोकमिमं प्रति त्वं ।
स सौम्य शो[3]च्यो हि मनुष्यलोके ॥
मोहेन वा कामसुखैर्मदाद्वा ।
यो नैष्ठिकं श्रोष्यति नास्य धर्मं ॥ ८१ ॥

तत् पूर्वोक्तप्रभावाद्धेतोः इमं प्रति शोकं मा कृथाः । तर्हि किं विषये शोकः कार्यः तं शोकविषयं दर्शयति । हे सौम्य मनुष्यलोके स शोच्यः यः मोहेन कामसुखैः मदाद्वा अस्य नैष्ठिकं धर्मं न श्रोष्यति स शोच्य इति पूर्वेण अन्वयः ॥ ८१ ॥

भ्रष्टस्य तस्माच्च गुणादतो मे ।
ध्यानानि लब्ध्वाप्यकृतार्थतैव ॥
धर्मस्य तस्याश्रवणादहं हि ।
मन्ये विपत्तिं त्रिदिवेऽपि वासम् ॥ ८२ ॥

अतः हेतोः तस्माद्गुणात् धर्मश्रवणरूपगुणात् भ्रष्टस्य मे ध्यानानि लब्ध्वापि अकृतार्थतैव । किंबहुना तस्य धर्मस्य अश्रवणात् त्रिदिवेऽपि वासं विपत्तिमहं मन्ये ॥ ८२ ॥

इति श्रुतार्थः ससुहृत्सदार- ।
स्त्यक्त्वा विषादं मुमुदे नरे[4]शः ॥
एवंविधोऽयं तनयो ममेति ।
मेने स हि स्वामपि सारवत्ताम् ॥ ८३ ॥

ससुहृत् समित्रः सदारः सस्त्रीकः । स्वां स्वीयां सारवत्तां श्रैष्ठ्यं मेने । एवंविधा प्रकारः यस्य सः विपूर्वकात् धाधातोः आतश्चोपसर्गे इति अङ् प्रत्ययः॥८३

आर्येण मार्गेण तु यास्यतीति । स[5]तैयं नरेन्द्रो हृदये चकार ॥
न ख[6]ल्वसावप्रियधर्मपक्षः । संताननाशात्तु भयं ददर्श ॥ ८४ ॥

आर्येण मार्गेण मोक्षमार्गेण यास्यतीति हृदये यावत् यदि आर्यमार्गगमनेन अस्य दुःखं जातं तर्हि अयं किं धर्मपथविरुद्ध इत्याशंक्याह—न खल्विति । असौ शुद्धोदनः प्रियधर्मपक्षः नेति न खलु किंतु प्रियधर्मपक्ष एव । नञ्द्वयस्य प्रकृतार्थदाढर्यबोधकत्वं तर्हि कुतो दुःखं इत्यत आह—संतानेति ॥ ८४ ॥

---

१ C स्वैर्मो०. २ C संबुध्य. ३ C शोच्ये. ४ C नरेंद्रः. ५ C चिंताविधेयं हृदयं च०. ६ C न खल्वसौ न प्रि० A न खल्वसौ च प्रि०.

अथ मुनिरसितो निवेद्य तत्त्वं। सुतनियतं सुतविक्लवाय राज्ञे ॥
स बहुमतमुदीक्ष्यमाणरूपः। पवनपथेन यथागतं जगाम ॥ ८५॥

अथ असितः मुनिः सुतविक्लवाय राज्ञे सुतविषये विव्हलाय शुद्धोदनाय सुतनियतं सुतसंबंधि अवश्यंभावि तत्वं याथ्यार्थं निवेद्य सबहुमतं बहुमानपुरःसरं यथा तथा उदीक्ष्यमाणरूपः अविलोकितस्वरूपः सन् पवनपथेन आकाशमार्गेण यथागतं जगाम ॥ ८५ ॥

कृतमतिरनुजासुतं च दृष्ट्वा। मुनिवचनश्रवणेऽपि तन्मतौ च ॥
बहुविधमनुकंपया स साधुः। प्रियसुतवद्विनियोजयांचकार॥८६॥

मायादेव्याः जेष्ठभ्राता तदानीं तत्रासीत्। सः अनुजायाः मायादेव्याः सुतं दृष्ट्वा मुनिवचनश्रवणे तन्मतौ तत्ज्ञाने कृता मतिः बुद्धिर्येन एतादृशः साधुः बहुविधं यथास्यात्तथा अनुकंपया दयया प्रियसुतवत् विनियोजयांचकार नियोजयामासेत्यर्थः ॥ ८६ ॥

नरपतिरपि पुत्रजन्मतुष्टो। विषयमतानि विमुच्य वंधनानि ॥
कुलसदृशमचीकरद्यथावत्। प्रियतनयस्तनयस्य जातकर्म ॥८७॥

विषयमतानि विषयासक्तिप्राप्तानि वंधनानि विमुच्य यथावत् यथाविधि कुलसदृशं कुलपरंपराऽनुरूपं ॥ ८७ ॥

दशसु परिगतेष्वहःसु चैवं। प्रयतमनाः परया मुदा परीतः ॥
अकुरुत जपहोममंगलाद्याः। परमतमाः स सुतस्य देवतेज्याः॥८८॥

प्रयतमनाः नियमितांतःकरणः परमतमाः सुतस्य सुतसंबंधिनीः देवतेज्याः देवतापूजनानि ॥ ८८ ॥

अपि च शतसहस्रपूर्णसंख्याः।
स्थिरबलवत्तनयाः सहेमशृंगीः ॥
अनुपगतजराः पयस्विनीर्गाः।
स्वयमददात्सुतवृद्धये द्विजेभ्यः ॥ ८९ ॥

तस्य दानं एकस्याः द्वयोर्वा गवोर्नासीत् किंतु शतं परिच्छिद्य सहस्रं परिच्छिद्य एवं समुदायदानं आसीत् इत्यर्थः। शतसहस्राभ्यां पूर्णा संख्या यासां। शतशः सहस्रशश्चेत्यर्थः। स्थिरबलवत्तनयाः बलाढ्यवत्साः अनुपगतजराः अप्राप्तजराः तरुणीरित्यर्थः ॥ ८९ ॥

बहुविधविषयास्ततो यतात्मा। स्वहृदयतोषकरीः क्रिया विधाय॥
गुणवति दिवसे शिवे मुहूर्ते। मतिमकरोन्मुदितः पुरप्रवेशे॥९०॥

बहुविधाः विषयाः कतर्व्याः यासां। स्वहृदयतोषकरीः अंतःकरणतोषकरीः। सत्कर्मकरणैः मनस्तोषो जायते इति अनुभवसिद्धमेतत्। गुणवति दिवसे पंचांगशुध्यादिगुणयुक्ते दिने शिवे मुहूर्ते संल्लग्ने ॥ ९० ॥

---

१ C तनय तन०. २ C परिणते.

द्विरदरदमयीमथ महार्हां ।
सितसितपुष्पभृतां मणिप्रदीपां ॥
अभजत शिविकां शिवाय देवी ।
तनयवती प्रणिपत्य देवताभ्यः ॥ ९१ ॥

द्विरदरदमयीं हस्तिदंतमयीं । महार्हां महामूल्यां । अतिशुभ्रपुष्पालंकृतां । हीरका एव प्रदीपा यस्यां । देवी माया ॥ ९१ ॥

पुरमथ पुरतः प्रवेश्य पत्नीं ।
स्थविरजनानुगतामपत्यनाथां ॥
नृपतिरपि जगाम पौरसंघै- ।
र्दिवममरैर्मघवानिवार्च्यमानः ॥ ९२ ॥

स्थविरजनैः वृद्धजनैः अनुगतां अनुयातां । अपत्यं नाथः यस्याः अपत्ययुक्तामित्यर्थः । अमरैः अर्च्यमानः मघवान् दिवमिव पौरसंघैः अर्च्यमानो नृपतिरपि पुरं जगाम ॥ ९२ ॥

भवनमथ विगाह्य शाक्यराजो ।
भव इव षण्मुखजन्मना प्रतीतः ॥
इदमिदमिति हर्षपूर्णवक्त्रो ।
बहुविधपुष्टियशस्करं व्यधत्त ॥ ९३ ॥

शाक्यराजः शुद्धोदनः षण्मुखजन्मना षडाननोत्पत्या प्रतीतः तुष्टः ख्यातो वा इदं इदमिति तत्कर्मनिर्देशः । हर्षेण आनंदेन पूर्णं व्याप्तं वक्त्रं मुखं यस्य । बहुविधं एतादृशं यत्पुष्टिकीर्तिकरं व्यधत्त कृतवान् । पुष्टिश्च यशश्च पुष्टियशसी ते करोतीति पुष्टियशस्करं बहुविधं च तत् पुष्टियशस्करं चेति विग्रहः ॥ ९३ ॥

इति नरपतिपुत्रजन्मवृद्ध्या ।
सजनपदं कपिलाह्वयं पुरं तत् ॥
धनदपुरमिवाप्सरोऽवकीर्णं ।
मुदितमभून्नलकूबरप्रसूतौ ॥ ९४ ॥

सजनपदः सदेशः । कपिलाह्वयं कपिलसंज्ञं तत् पुरं नरपतिपुत्रजन्मना नरपतेः राज्ञः पुत्रः तस्य यज्जन्म जननं तेन या वृद्धिः तया । नलकूबरप्रसूतौ नलकूबरोत्पत्तौ अप्सरोवकीर्णं धनदपुरमिव कुबेरनगरमिव मुदितमभूत ॥ ९४ ॥

इति श्रीबुद्धचरिते महाकाव्ये सर्वार्थसिद्धप्रसूतिर्नाम प्रथमः सर्गः

इति श्री ६४ पदवाक्यप्रमाणपारावारीणमहामहोपाध्यायश्रीगोपालचार्यांतेवासिना निगुडकरोपनामकनारायण(दत्तात्रेय)शर्मणा विरचितायां तत्वदीपिकाख्यायां बुद्धचरितसंक्षिप्तव्याख्यायां प्रथमः सर्गः ॥

१ C थो for थ.

द्वितीयः सर्गः ।

आजन्मनो[1] जन्मजरांतकस्य ।
तस्यात्मजस्यात्मविदः[2] स राजा ॥
अहन्यहन्यर्थगजाश्वमित्रै-।
र्वृद्धिं ययौ सिंधुरिवांबुवेगैः ॥ १ ॥

स राजा शुद्धोदनः । जन्म उत्पत्तिः जरा वार्ध्यक्यं विकारोपलक्षणमिदं तयोरंतकः नाशकः तस्य । आत्मानं स्वं शुद्धोदनं जयति गुणोत्कर्षेण इत्यात्मजित् । आत्मशब्दे उपपदे जिधातोः क्विप् प्रत्ययः तुगागमश्च । अथवा आत्मज्ञानी आत्मनः परमेश्वरस्य ज्ञानं तदस्यास्तीति आत्मज्ञानी । इनिप्रत्ययः । परमात्मावेत्ता । तस्य आत्मजस्य । आजन्मनः जन्मादारभ्य अंबुवेगैः सिंधुरिव अहन्यहनि प्रतिदिनं । गजाश्वमित्रैः वृद्धिं ययौ ॥ १ ॥

धनस्य रत्नस्य च तस्य तस्य । कृताकृतस्यैव च कांचनस्य ॥
जिगाय[3] चैकात्मनिधिर्नवापि[4] । मनोरथस्याप्यतिभारभूतान् ॥२॥

धनस्य रत्नस्य तस्य तस्य कृताकृतस्य हेमरूप्यस्य ' हेमरूप्ये कृताकृते ' इत्यमरः । कांचनस्य केवलसुवर्णस्य यः एकसंख्याकः आत्मनः निधिः शेवधिः स मनोरथस्यापि अतिभारभूतान् अतिशयश्चासौ भारश्च अतिभारः तं भूतान् प्राप्तान् । भूधातोः प्राप्त्यर्थात् कर्तरि क्तप्रत्ययः । अविषयानित्यर्थः । नवापि निधीन् जिगाय । एतेन राज्ञो निधेः अतिमहत्वं वर्णितम् ॥ २ ॥

यैः[5] पद्मयुक्तैश्च परद्विपेंद्रैर्न मंडलं शक्यमदो[6]ऽभियातुं ॥
मदोत्कटा हैमवता गजास्ते । विनापि यत्नादुपतस्थुरेनं ॥ ३ ॥

पद्मेन दंतबंधेन युक्तैः ' पद्मोऽस्त्री बिंदुजालेऽब्जे व्यूहे संख्यांतरे निधौ । गजानां दंतबंधेऽपि ' इति त्रिकाण्डशेषः । दंतबंधनेनापि आनेतुमशक्यैः इति बोधनार्थमिदं विशेषणं । द्विपेंद्रैः अदः मंडलं देशं अभियातुं प्राप्तुं न शक्यं । मदेन दानेन उत्कटाः हिमवति भवाः हैमवताः । ते पूर्वोक्ता गजाः यत्नं विनापि एनं शुद्धोदनमुपतस्थुः । अस्य आत्मजस्य आजन्मनः गजाश्वमित्रैः राजा वृद्धिं ययौ । इतियदुक्तं तत् अनेन श्लोकेन स्फुटीकृतम् एवमग्रेपि ज्ञेयं ॥ ३ ॥

नानांकचिह्नैर्नवहेमभांडैरभूषितैर्लंबसटैस्तथान्यैः ।
संचुक्षुभे चास्य पुरं तुरंगैर्बलेन मैत्र्या च धनेन चाप्तैः ॥ ४ ॥

---

१ A अजन्म०. २ C आत्मजितः. ३ C तदाहि नैका०. J तदाहि बन्ध्यर्थनिधीन०. ४ C निधीनन्नापि. ५ C ये पद्मकल्पैरपि च. ६ C शक्यमिहाभिनेतुं.

अस्य पुरं नाना अंकचिह्नानि शुभाशुभरेखाचिह्नानि येषां तैः । नवानि हेम्नः सुवर्णस्य भांडानि अश्वभूषा येषां तैः । 'भांडं पात्रे वणिङ्मूलधने भूषाश्वभूषयोः' इति मेदिनी । तथा अभूषितैः भूषणरहितैः लंबाः सटाः ग्रीवास्थकेशा येषां तैः अन्यैः भूषितान्यैरित्यर्थः तुरंगैः अश्वैः बलेन मैत्र्या धनेन च संचुक्षुभे इत्याद्यन्वयः ॥ ४ ॥

पुष्टाश्च तुष्टाश्च तदास्य राज्ये ।
साध्व्योऽरजस्का गुणवत्पयस्काः ॥
उदग्रवत्सैः सहिता बभूवु- ।
र्बह्व्यो बहुक्षीरदुहश्च गावः ॥ ५ ॥

साध्व्यः शोभनाः । नास्ति रजो यासां ताः शेषाद्बहुव्रीहीत्यनेन कप् प्रत्ययः । अरजस्काः रजोगुणरहिताः । रजःकार्यविक्षेपक्रोधादिरहिताः । गुणवत् गुणावहं पयो दुग्धं यासां । अत्रापि कप् उच्चवत्सैः सहिताः ॥ ५ ॥

मध्यस्थतां तस्य रिपुर्जगाम ।
मध्यस्वभावः प्रययौ सुहृत्वं ॥
विशेषतो दार्ढ्यमियाय मित्रं ।
द्वावस्य पक्षावपरस्तु नासीत्[1] ॥ ६ ॥

तस्य रिपुः मध्यस्थतां औदासीन्यं जगाम मध्यस्वभावः मध्यस्थः सुहृत्वं मित्रत्वं जगाम । एवं अस्य द्वौ मध्यस्थमित्ररूपौ पक्षौ आस्तां अपरः शत्रुपक्षस्तु नासीदित्यर्थः ॥ ६ ॥

तथास्य मंदानिलमेघशब्दः । सौदामिनी[2]कुंडलमंडितांगः ॥
विनाश्य[3] वर्षाशनिपातदोषं[4] । काले च देशे प्रववर्ष देवः ॥ ७ ॥

तथा पूर्वोक्तसल्लक्षणवत् अस्य संबंधसामान्ये षष्ठीयं । मंदौ अनिलमेघशब्दौ यस्मात् । अथवा मन्दानिलः मेघश्च एतद्द्वयं शब्दो यस्य । सौदामिनी विद्युत् सैव कुंडले ताभ्यां मंडितं अंगं यस्य । देवः वृष्टिकारकः इंद्रः । वर्षासु प्रावृट्काले यः अशनिपातः स एव दोषः तं अथवा वर्षणे यः अशनिपातः स एव दोषः तं विनाश्य काले वर्षादिकाले देशे धान्यावापयोग्यादिदेशे च प्रववर्ष ॥ ७ ॥

रुरोह सम्यक् फलवद्यथर्तु । तदाकृतेनापि कृषिश्रमेण ॥
ता एव चैवौषधयो रसेन । सारेण चैवाभ्यधिका बभूवुः ॥ ८ ॥

अकृतेनापि कृषिश्रमेण अभितः सर्वतः अधिकाः आधिक्यवत्यः उत्कर्षवत्यः इत्यर्थः । अन्यत् स्पष्टार्थम् ॥ ८ ॥

---

१ C ०स्तुनाशम्. २ C सौदामिनी. ३ C ०नाश्मव०. ४ C दोषैः.

शरीरसंदेहकरेऽपि काले । संग्रामसंमर्द इव प्रवृत्ते ॥
स्वस्थाः सुखं चैव निरामयं च । प्रजज्ञिरे गर्भधराश्च नार्यः॥ ९॥

शरीरसंदेहः जीवेद्वा न वेति संदेहः तं करोति संग्रामसंमर्दे इव काले प्रवृत्ते सति । एतादृशे रतिकाले प्रसूतिकाले च इति यावत् प्रजज्ञिरे प्रसूताः ॥९॥

तत्र[1] प्रभुभ्यो विभवेऽपि लभ्ये[2] ।
न प्रार्थयन्ते[3] स्म नराः परेभ्यः ॥
अभ्यार्थिताः[4] सूक्ष्मधनाः[5]स्तु नूनं ।
कदा न केचिद्विमुखा बभूव ॥ १० ॥

यत्र राज्ये । प्रभुभ्यः धनिकेभ्यः । नराः न प्रार्थयंते स्म । अभ्यर्थितः याचितः । सूक्ष्मधनोऽपि अल्पधनोपि । अयं दातृरूपः प्रभुः । विमुखः दानपराङ्मुखः ॥ १० ॥

द्वेष्यो[6]ऽनृजुर्बंधुषु नाप्यदाता । नैवाव्रतो नानृतको[7] न हिंस्रः ॥
आसीत्तदा कश्चन तस्य राज्ये । राज्ञो ययातेरिव नाहुषस्य॥ ११॥

बंधुषु बांधवेषु द्वेष्यः अनृजुः कुटिलश्च । अव्रतः व्रतबंधादिक्रियारहितः नियमरहितो वा। नास्ति अनृतं मिथ्याभाषणं यस्य स अनृतकः। निषेधार्थकेन न शब्देन बहुव्रीहिसमासे शेषिकः कप्प्रत्ययः । नानृतिक अत्र निषेधार्थकः न शब्दः पृथक् । अनृतिकः मिथ्यावादी । हिंस्रः घातुकः । नासीदिति प्रत्येकं संबध्यते । अन्यत् स्पष्टम् ॥ ११ ॥

उद्यानदेवायतनाश्रमाणां ।
कूपप्रपापुष्करिणीवनानाम् ॥
चक्रुः क्रियास्तत्र च धर्मकामाः ।
प्रत्यक्षतः स्वर्गमिवाभिलक्ष्य[8][9] ॥ १२ ॥

उद्यानदेवायतनं आक्रीडदेवालयं । प्रपा पानीयशालिका पुष्करिणी सरोवरं । धर्मकामाः पुण्यकामाः अभिलक्ष्य उद्दिश्य ॥ १२ ॥

मुक्तश्च दुर्भिक्षभयामयेभ्यो हृष्टो जनः स्वर्ग इवाभिरेमे ॥
पत्नीं पतिर्वा महिषी पतिं वा । परस्परं न व्यभिचेरतुश्च ॥१३॥

दुर्भिक्षं प्रसिद्धं भवं चोरादिभयं आमयो रोगः तेभ्यो मुक्तः इत्यन्वयः । न व्यभिचेरतुः मानसं शारीरं च व्यभिचारं तत्यजुः इत्यर्थः ॥ १३ ॥

---

१ C यच्च प्रतिभ्वो वि०. २ C शक्ये. ३ C ०यन्ति स्म. ४ C ०र्थितः ५ C धनोऽपि चायं तदा न कश्चिद्विमुखो. ६ C नाशो वधो बंधु०. ७ C नानृतिको. ८ C मित्रो-पलभ्य. ९ C स्वर्गमिवा.

कश्चित्सिषेवे रतये न कामं ।
कामार्थमर्थं न जुगोप कश्चित् ॥
कश्चिद्धनार्थं न चचार धर्मं ।
धर्माय कश्चिन्न चकार हिंसाम् ॥ १४ ॥

कश्चित् रतये कामं न सिषेवे । कश्चित् कामार्थं अर्थं न जुगोप । कश्चित् धनार्थं धर्मं न चचार । कश्चित् धर्माय हिंसां न चकार इत्यन्वयः ॥ १४ ॥

स्तेयादिभिर्नाप्यभितश्च त्रस्तं । स्वस्थं स्वचक्रं परचक्रमुक्तम् ॥
क्षेमं सुभिक्षं च बभूव तस्य । पुरेष्वरण्येषु तथैव राष्ट्रे ॥ १५ ॥

अभितः स्तेयादिभिः चौर्यादिभिः न त्रस्तं न पीडितं स्वचक्रं स्वराष्ट्रं । परचक्रमुक्तं शत्रुवर्जितं । स्पष्टमन्यत् ॥ १५ ॥

तदा हि तज्जन्मनि तस्य राज्ञो । मनोरिवादित्यसुतस्य राज्ये ॥
चचार हर्षः प्रणनाश पाप्मा । जज्वाल धर्मः कलुषं शशाम ॥१६॥

आदित्यसुतस्य मनोरिव तस्य राज्ञः राज्ये । तदा पुत्रजन्मकाले । तज्जन्मनि पुत्रजन्मनि निमित्तसप्तमीयं पुत्रजन्मनिमित्यमित्यर्थः ॥ १६ ॥

एवंविधा राजसुतस्य तस्य । सर्वार्थसिद्धिश्च यतो बभूव ॥
ततो नृपस्तस्य सुतस्य नाम । सर्वार्थसिद्धोऽयमिति प्रचक्रे ॥१७॥

एवंविधा प्रकारो यस्याः। 'विधाविधौ प्रकारे च' इत्यमरः । सर्वेषामर्थानां सिद्धिः सर्वार्थसिद्धिः । स्पष्टमन्यत् ॥ १७ ॥

देवी तु माया विबुधर्षिकल्पं । दृष्ट्वा विशालं तनयप्रभावम् ॥
जातं प्रहर्षं न शशाक वोढुं । ततो विनेष्टा त्रिदिवं जगाम ॥१८॥

विबुधर्षिकल्पं देवर्षितुल्यं इत्यर्थः एतादृशं विशालं महांतं तनयप्रभावं पुत्रसामर्थ्यम् ॥ १८ ॥

ततः कुमारं सुरगर्भकल्पं । स्नेहेन पूर्णेन च पुत्रवत्तं ॥
मातृष्वसा मातृसमप्रभावा । संवर्धयामास मुदा तदानीम् ॥१९॥

सुरगर्भकल्पं देवगर्भतुल्यं । मातृसमप्रभावा मातृतुल्यसामर्थ्या ॥ १९ ॥

ततः स बालार्क इवोदयस्थः । समीरितो वह्निरिवानिलेन ॥
क्रमेण सम्यग्ववृधे कुमारस्ताराधिपः पक्ष इवातमस्के ॥ २० ॥

उदयस्थः उदयाचलस्थः अनिलेन समीरितः संवर्द्धितः वह्निरिव । ताराधिपः चंद्रः । अतमस्के नास्ति तमः अंधकारो यस्मिन् शुक्ले इत्यर्थः ॥ २० ॥

---

१ C ०भिश्चाप्य. २ C नष्टं. ३ C पुराण्यरण्यानि यथैव. ४ C कलुषः. ५ C ततोऽविनाशाय दिवं. ६ C भावेन च निर्विशेषं. ७ यामात्मजवद्बभूव.

ततो महार्हाणि च चंदनानि ।
रत्नावलिश्चौषधिभिः सगर्भा ॥
मृगप्रयुक्तो रथकांश्च हैमा ।
आचक्रिरेऽस्मै सुहृदालयेभ्यः ॥ २१ ॥

महार्हाणि महामूल्यानि चंदनानि विलेपनानि । ओषधिभिः बालरक्षाकार्यौषधीभिः सगर्भा युक्ता इत्यर्थः एतादृशी रत्नावली रत्नमाला । मृगप्रयुक्तान् मृगैः ऊढान् । हैमान् सौवर्णान् रथकान् अल्परथकान् । अस्मै सर्वार्थसिद्धये सुहृदा मित्रेण कर्त्रा आलयेभ्य निजगृहेभ्यः आचक्रिरे आनीताः दत्ता इत्यर्थः । कर्मणि लिट् ॥ २१ ॥

वयोऽनुरूपाणि च भूषणानि ।
हिरण्मया हस्तिमृगाश्वकाश्च ॥
रथाश्च गावो वसनप्रयुक्ता ।
गंत्री च चामीकररूप्यचित्रा ॥ २२ ॥

वयोनुरूपाणि अल्पवयोयोग्यानि । हिरण्मयाः हिरण्यप्रचुराः हस्तिमृगाश्वकाः स्वल्पा गजमृगघोटकाः । अत्र मृगस्य सेनांगत्वाभावात् समाहारो न । वसनप्रयुक्ताः वस्त्ररचिताः । चामीकररूप्यचित्राः सुवर्णरूप्याभ्यां विचित्राः गन्त्रीः शकटिकाः वत्सैर्वोढुं शक्यशकटानीत्यर्थः । अत्र सुहृदा आचक्रिरे इति पूर्वश्लोकात्संवध्यते ॥ २२ ॥

एवं स तैस्तैर्विषयोपचारैर्वयोऽनुरूपैरुपचर्यमाणः ॥
बालोऽप्यबालप्रतिमो बभूव । धृत्या च शौचेन धिया श्रिया च ॥२३॥

स बालः एवं पूर्वोक्तप्रकारेण । वयोऽनुरूपैः वयोयोग्यैः । विषयोपचारैः विषयोपस्करणैः । उपचर्यमाणः उपक्रियमाणः बालोऽपि धृत्या धैर्येण शौचेन शुचितया धिया बुद्धया श्रिया लक्ष्म्या अबालप्रतिमः ज्ञातृतुल्यः बभूव ॥ २३ ॥

वयश्च कौमारमतीत्य मध्यं ।
संप्राप्य बालः स हि राजसूनुः ॥
अल्पैरहोभिर्बहुवर्षगम्या ।
जग्राह विद्याः स्वकुलानुरूपाः ॥ २४ ॥

बहुवर्षगम्याः बहुसंवत्सरप्राप्याः । स्वकुलानुरूपाः स्ववंशयोग्याः ॥ २४ ॥

---

१ CA ली. २ CA र्भाः. ३ C क्तान्. ४ C कां. ५ C मानाच०. ६ A सुहृदो गृहेभ्यः. ७ D मृगाः शुकाश्च. ८ CA. गंत्रीश्च. ९ CA ०त्राः.

नैःश्रेयसं तस्य तु भव्यमर्थं ।
श्रुत्वा पुरस्तादसितान्महर्षेः ॥
शुद्धोदनः शाक्यकुलर्धिमिच्छन्[1] ।
कामेषु संगं जनयांबभूव ॥ २५ ॥

नैःश्रेयसं मोक्षानुरूपं भव्यं अर्थं प्रयोजनम् ॥ २५ ॥

कुलात्ततोऽसौ[2] स्थिरशीलसंयुता-।
त्साध्वीं वपुर्ह्रीविनयोपपन्नां[3] ॥
यशोधरां नाम यशोविशालां ।
तुल्याभिधानां[4] श्रियमुद्व्ययुवाह[5] ॥ २६ ॥

कुलात् सत्कुलात् असौ सर्वार्थसिद्धः । स्थिरशीलसंयुतात् स्थिरस्वभावात् इ-त्यर्थः । वपुर्ह्रीविनयोपपन्नां वपुः सुंदरं शरीरं ह्रीः लज्जा विनयो नम्रता तैः उप-पन्नां युक्तां । यशसा विशालां विस्तृतां कीर्तिमतीमित्यर्थः । तुल्यं अभिधानं नाम यस्याः । अन्वर्थनाम्नीं इत्यर्थः । यशोधरां नाम यशोधरा इति प्रसिद्धां श्रियं लक्ष्मीं उद्व्ययुवाह ॥ २६ ॥

अनंतरं[6] भूमिपतेः प्रियोऽयं । सनत्कुमारप्रतिमः कुमारः ॥
सार्धं तया शाक्यनरेंद्रवध्वा । शच्या सहस्राक्ष इवाभिरेमे॥२७॥

सनत्कुमारप्रतिमः सनत्कुमारतुल्यः । शाक्यनरेंद्रस्य शुद्धोदनस्य वध्वा स्नुषया " वधूर्जाया स्नुषा स्त्री च ' इत्यमरः । अर्थात् स्वस्त्रिया ॥ २७ ॥

किंचिन्मनःक्षोभकरं प्रतीपं । कथं न[7] पश्येदिति सोऽनुचिंत्य ॥
वासं नृपो ह्यादिशति स्म तस्मै । हर्म्योदरेष्वेव न भूप्रचारं ॥ २८ ॥

मनःक्षोभकरं मनउद्वेगकरं । प्रतीपं विपरीतं विषयासक्तिविरुद्धमित्यर्थः । कथं न पश्येत् केन प्रकारेण एतस्य दृष्टिपथं न गच्छेत् इति स नृपः अनुचिंत्य वि-चार्य तस्मै सर्वार्थसिद्धाय हर्म्योदरेष्वेव हर्म्यमध्येष्वेव वासं आदिशति स्म । भूप्र-चारं न आदिशति स्म ॥ २८ ॥

ततः शरत्तोयदपांडुरेषु[8] । भूमौ विमानेषु[9] च रंजितेषु ॥
हर्म्यस्य[10] सर्वर्तुसुखाश्रयेषु । स्त्रीणामुदारै रेमे[11] रमते स्म तूर्यैः ॥ २९ ॥

ततः हर्म्यस्य शरत्तोयदपांडुरेषु शरत्कालिकाभ्रसितेषु भूमौ विमानेष्विव भूमि-स्थविमानेष्विव रंजितेषु नानावर्णरंजितेष्वित्यर्थः । सर्वर्तुसुखाश्रयेषु सर्वर्तुसु-खकारकाश्रयेषु स्त्रीणां उदारैः तूर्यैः वाद्यैः रमते स्म क्रीडां चकार ॥ २९ ॥

---

१ C कामेषु संगं जनयांबभूव वृद्धिर्भवच्छाक्यकुलस्य; A जनयन् ब० राज्ञः. २ C कुलात्ततोऽस्मै. ३ A वपुर्ही. ४ A उद्वाहयामास समाभिधानां ॥ ५ C ०यमाजुहाव. ६ C अथापरं भूमि०. ७ C च. ८ C पांडरे०. ९ C ष्विव. १० C हर्म्येषु. ११ C A विंजहार.

कलैर्हि चामीकरबद्धकक्ष्यैर्नारीकराग्राभिहतैर्मृदंगैः ॥
वराप्सरोनृत्यसमैश्च नृत्यैः । कैलासवत्तद्भवनं रराज ॥ ३० ॥

कलैः मधुरैः चामीकरबद्धकक्ष्यैः सुवर्णखचितकक्ष्यैः । नारीकराग्राभिहतैः स्त्रीहस्ताग्रताडितैः एतादृशैः मृदंगैः मुरजैः । वराप्सरोनृत्यसमैः उत्तमाप्सरोनृत्यसमैः उत्तमाप्सरोनृत्यतुल्यैः नृत्यैः कैलासपर्वतवत् तत् भवनं रराज ॥ ३० ॥

वाग्भिः कलाभिर्ललितैश्च भावैर्मदैः सखेलैर्मधुरैश्च हासैः ॥
भ्रुवोंचितैरर्धनिरीक्षितैश्च । तं तत्र नार्यो रमयां बभूवु ॥ ३१ ॥

भ्रुवोंचितैः अंचितैः पूजितैः । पूजनार्थादंचधातोः क्तप्रत्ययः । उन्नयनादिक्रियाभिरिति फलितोऽर्थः । भ्रूवांचितैरितिपाठे भ्रुकुटिप्रलंभनैः खेलया कंदुकादिक्रीडनेन सह इति सखेलैः हासविशेषणमिदं । अर्थनिरीक्षितैः कटाक्षावलोकनैः । अत्र चतुर्थतृतीयचरणयोर्व्यत्यासे माधुर्यविशेषः ॥ ३१ ॥

ततश्च कामागमपंडिताभिः । स्त्रीभिर्गृहीतो रतिकर्कशाभिः ॥
विमानपृष्ठान्न महीं जगाम । विमानपृष्ठादिव विश्वकर्मा ॥ ३२ ॥

कामागमः कामशास्त्रं तत्र पंडिताभिः विदुषीभिः । रतिकर्कशाभिः विमानपृष्ठात् सार्वभौमगृहपृष्ठात् । 'विमानं व्योमयाने स्यात् सार्वभौमगृहेऽपि च।' इति मेदिनी । विमानपृष्ठात् व्योमयानपृष्ठात् ॥ ३२ ॥

नृपस्तु तस्यैव विवृद्धिहेतोस्तद्भाविनार्थेन च चोद्यमानः ॥
शमेऽभिरेमे विरराम पापाद्भेजे दमं संविबभाज साधून् ॥ ३३ ॥

तस्यैव सर्वार्थसिद्धस्यैव । विवृद्धिहेतोः उत्कर्षहेतोः । तद्भाविना तत्करिष्यमाणेन अर्थेन कार्येण चोद्यमानः प्रेर्यमाणः शमे शांतौ अभिरेमे । पापात् विरराम । दमं भेजे । साधुभ्यो धनं ददौ इत्यर्थः ॥ ३३ ॥

नाधीरवत् कामसुखे ससंजे । न संररंजे विषये जगत्यां ॥
धृत्येंद्रियाश्वांश्चपलान् विजिग्ये । बंधूंश्च पौरांश्च गुणैर्जिगाय ॥ ३४ ॥

अधीरवत् अज्ञवत् । कामसुखेन ससंजे । जगत्यां विषये न ररंजे न रक्तोऽभूत् । चपलान् इंद्रियाश्वान् धृत्या धैर्येण विजिग्ये । अन्यत्स्पष्टं ॥ ३४ ॥

नाध्यैष्ट दुःखाय परस्य विद्यां । ज्ञानं शिवं यत्तु तदध्यगीष्ट ॥
स्वाभ्यःप्रजाभ्यो हि यथा तथैव । सर्वप्रजाभ्यः शिवमाशशंसे ॥ ३५ ॥

परस्य परसंबंधिनीं ज्ञानरतिरिक्ताविषयप्रातिपादिकामित्यर्थः । विद्यां दुःखाय

---

१ C हारैः for भावैः. २ C. तं तत्र नार्यो रमयांबभूवुर्भ्रूवांचितैरर्धनिरीक्षितैश्च A नर्तनै for वांचितैः ३ C० श्रयपं०. ४ C पुण्य for विश्व. ५ C विषमं जनन्यां.

दुःखकारणाय न अध्यैष्ट । ज्ञानरतिरिक्तविद्याद्यध्ययने हि अभिमानादिसंसार-दुःखं प्रसज्येत इति तां नाध्यैष्टेत्यर्थः । प्रजाभ्यः संततिभ्यः प्रकृतिभ्यो वा । सर्वप्रजाभ्यः सर्वलोकेभ्यः । 'प्रजास्यात्संततौ जने' इति कोशः ॥ ३५ ॥

तं भासुरं चांगिरसाधिदेवं ।
यथावदानर्च तदायुषे सः ॥
जुहाव हव्यान्यकृशे कृशानौ ।
ददौ द्विजेभ्यः कृशनं च गाश्च ॥ ३६ ॥

भासुरं तेजस्विनं मुख्यं गुरुं । तदायुषे सर्वसिद्धार्थायुःप्राप्तये । अकृशे स्थूले प्रदीप्ते इत्यर्थः कृशानौ अग्नौ । कृशनं सुवर्णं । अत्र कनकमितिपाठः साधुः सुवर्ण-वाचिकृशनशब्दस्य लोके प्रयोगानुपलब्धे । गाः धेनूः ॥ ३६ ॥

सस्नौ शरीरं पवितुं मनश्च । तीर्थांबुभिश्चैव गुणांबुभिश्च ॥
वेदोपदिष्टं सममात्मजं च । सोमं पपौ शांतिसुखं च हार्दं ॥३७॥

शरीरं मनश्च पवितुं पवित्रीकर्तुं क्रमेण तीर्थांबुभिः तीर्थोदकैः गुणांबुभिः गुणाः शांत्यादयः त एव अंबूनि तैः सस्नौ स्नातवान् । तीर्थांबुभिः शरीरं पवि-त्रीकृतवान् शांत्यादिभिः मनश्च पवित्रीकृतवान् इत्यर्थः । वेदोपदिष्टं सोमं यज्ञ-विशेषसोमरसं आत्मजं आत्मज्ञानोत्पन्नं आत्मनः आत्मविषयकज्ञानात् जातं । आ-त्मशब्द आत्मविषयकज्ञाने लाक्षणिकः । तस्मिन् उपपदे जनधातोः अन्येष्वपि दृश्यते इति डप्रत्ययः । हार्दं हृदये वर्तमानं शांतिसुखं च इति सममेव पपौ । यज्ञयागादिकर्तापि अभिमानशून्यतया आत्मानंदभोक्ताऽप्यासीदित्यर्थः ॥ ३७ ॥

सांत्वं बभाषे न च नार्थवद्य- ।
ज्जजल्प तत्त्वं न च विप्रियं यत् ॥
सांत्वं ह्यतत्त्वं परुषं च तत्त्वं ।
ह्रियाशकन्नात्मन एव वक्तुम् ॥ ३८ ॥

यत् सांत्वं अर्थवत् न एतादृशं न बभाषे । किंतु तात्विकार्थविशिष्टं सांत्व-मुवाचेत्यर्थः । यत् तत्त्वमपि विप्रियं न तज्जजल्प । तत्त्वमपि प्रियं यथा भवति तथा जंजल्पे त्यर्थः । हि यस्मात् यत् सांत्वं तत् अतत्त्वं तत्त्ववादरहितं भवति । तत्त्वं परुषं भवति । इति आत्मन एव ह्रिया वक्तुं नाशकत् । किंतु पूर्वोक्तरीत्या अवददित्यर्थः ॥ ३८ ॥

इष्टेष्वनिष्टेषु च कार्यवत्सु ।
न रागदोषाश्रयतां प्रपेदे ॥

---

१ A ०मात्मजेन.

शिवं सिषेवेऽव्यवहारलब्धं ।
अन्यद्धि मेने न तथा यथावत् ॥ ३९ ॥

इष्टेषु सुहृत्सु अनिष्टेषु शत्रुषु च । उभयविधेषु कार्यवत्सु कार्यार्थिषु । रागौ प्रेममात्सर्ये ते एव दोषौ तदाश्रयतां न प्रपेदे । 'रागोऽनुरागे मात्सर्ये' इति कोशः। व्यवहारेण प्रजासु नीतिदर्शनेन लब्धं । तथा पूर्वोक्तवत् अन्यत् उक्तातिरिक्तं इष्टेषु प्रेमवत्वादि यथावत् यथायोग्यं न मेने ॥ ३९ ॥

आशावतेश्चाभिगतस्य सद्यो । देयांबुभिस्तर्षमचेच्छिदिष्ट ॥
युद्धादृते वृत्तपरश्वधेनारिदर्पमुद्धृत्तमबेभिदिष्ट ॥ ४० ॥

आशावतः इच्छावतः अभिगतस्य प्राप्तस्य याचकस्येत्यर्थः । देयानि दानानि तान्येव अंबूनि तैः तर्षं इच्छां अचेच्छिदिष्ट छेदितवान् । छिद् धातोर्यङन्ताल्लुङ् । युद्धादृते युद्धं विना वृत्तं सदाचारः स एव परश्वधः कुठारः तेन उद्वृत्तं अरिदर्पं शत्रुदर्पं अबेभिदिष्ट पुनः पुनः भिन्नवान् । 'अतृणे पतितो वह्निः स्वयमेवोपशाम्यति' इति न्यायेन एतस्य शांतस्वभावत्वे विरोधिद्वितीयाभावात् शत्रूणां गर्वः स्वयमेव शांतः अभूत् इत्यर्थः । हि दर्पमिति पाठे हि शब्दः पादपूरणार्थः हेत्वर्थो वा ॥ ४० ॥

एकं विनिन्ये स जुगोप सप्त । सप्तैव तत्याज ररक्ष पंच ॥
प्राप त्रिवर्गं बुबुधे त्रिवर्गं । जज्ञे द्विवर्गं प्रजहौ द्विवर्गम् ॥४१॥

एकं मनः राज्यं वा विनिन्ये शिक्षितवान् । सप्त राज्यांगानि जुगोप । सप्त त्वगादिसप्तधातून् तत्याज तत्र अनास्थ आसीदित्यर्थः । पञ्च प्राणान् ररक्ष । त्रिवर्गं धर्मार्थकामान् प्राप । त्रिवर्गं बुद्धिस्थानक्षयान् बुबुधे । द्विवर्गं चिज्जडद्वयं जज्ञे ज्ञातवान् । द्विवर्गं सुखदुःखादिद्वंद्वानि प्रजहौ तत्याज ॥ ४१ ॥

कृतागसोऽपि प्रतिपद्य वध्या-
न्नाँजंघनीन्नापि रुषा ददर्श ॥
बबन्ध सांत्वेन च रज्जुभिस्तां-
स्त्यागोऽपि तेषां ह्यनपायदृष्टः ॥ ४२ ॥

कृतागसः कृतापराधान् अतएव वध्यान् वधार्हान् एतादृशानपि नाजंघनीत् न हिंसितवान् इत्यर्थः । केवलं न हिंसितवान् इति न किंतु रुषापि न ददर्श । तर्हि किं तांस्तथैव तत्याज नेत्याह—सांत्वेन सांत्वनरूपरज्जुभिः बबंध संयोजितवान् । कदाचित् त्यागप्रसंगेपि तेषां पूर्वोक्तानां त्यागोपि अनपायाय नाशाभावाय दृष्टः अनपायदृष्टः । यथा तेषां नाशो न भवेत् तथा तत्याजेत्यर्थः ॥४२॥

---

१ C यज्ञं हि मेने. २ C ०वते चाभिगताय सद्यो. ३ C ०धेन द्विदर्पमु०. ४ A हि विन्यास जु०. ५ A भेजे for जज्ञे. ६ C प्रतिपाद्य. ७ C ०न्नाजीघनन्नापि. ८ C A फलेन चै०. ९ A खलु पापदृष्टः.

आर्षाण्यचारीत्परमव्रतानि । वैराण्यहासीच्चिरसंभृतानि ॥
यशांसि चापद्गुणगंधवंति। रजांस्यहासीन्मलिनीकराणि ॥४३॥

आर्षाणि ऋषिसंबंधीनि परमव्रतानि श्रेष्ठव्रतानि अचारीत् आचरितवान् । चिरसंभृतानि चिरकृतानि वैराणि द्वेषान् अहासीत् अत्याक्षीत् । गुणानां गंधः संबंधः सः अस्ति येषां तानि । 'गंधोगंधक आमोदे लेशे संबंधगर्वयोः' इति विश्वः । सद्गुणमूलकानीत्यर्थः । यशांसि आपत् । मलिनीकराणि मालिन्योत्पादकानि रजांसि रजोगुणकार्याणि द्वेषादीनि अहासीत् ॥ ४३ ॥

न चाजिहीर्षीद्बलिमप्रवृत्तं । न चाचिकीर्षीत्परवस्त्वभीच्छां ॥
न चाविवक्षीद्द्विषतामधर्मं । न चादिधीर्षीध्हृदयेन मन्युम् ॥४४॥

प्रवृत्तः वर्तमानः तथा न भवतीति अप्रवृतः तं । प्रवृत्तादधिकं नर्वानामिति यावत् । बलिं करं न चाजिहीर्षित् हरणेच्छां न कृतवान् । परवस्तुनः अभीच्छां कांक्षां न चाचिकीर्षीत् । द्विषतां शत्रूणां अधर्मं न चाविवक्षीत् वक्तुं नैच्छत् । मन्युं क्रोधं हृदयेन नादिधीर्षीत् धर्तुं नैच्छत् ॥ ४४ ॥

तस्मिंस्तथा भूमिपतौ प्रवृत्ते । भृत्याश्च पौराश्च तथैव चेरुः ॥
शमात्मके चेतसि सुप्रसन्ने । प्रयुक्तयोगस्य यथेंद्रियाणि ॥४५॥

तस्मिन् भूमिपतौ शुद्धोदने तथा पूर्वोक्तप्रकारेण प्रवृत्ते सति भृत्याः सेवकाः पौराः नागरिकाः तथैव राजवत् चेरुः । शमः शांतिः आत्मा स्वभावो यस्य । 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावः' इत्यमरः । शैषिकः कप् । तस्मिन् चेतसि इत्यर्थः । प्रयुक्तः आरब्धः योगः येन तस्य यथा इंद्रियाणि मनोवच्छांतियुताभि भवंति तथा तस्य पौराः भृत्या इति पूर्वेणान्वयः । यद्यदाचरति श्रेष्ठ इति न्यायेन सर्वेपि शांतवृत्तयो बभूवुरित्यर्थः ॥ ४५ ॥

काले ततश्चारुपयोधरायां । यशोधरायां सुयशोधरायां ॥
शौद्धोदने राहुसपत्नवक्त्रो । जज्ञे सुतो राहुल एम नाम्ना ॥४६॥

ततः चारुपयोधरायां सुस्तन्यां सुयशोधरायां उत्तमयशस्विन्यां यशोधरायां एतन्नाम्न्यां सर्वार्थसिद्धपत्न्यां । शौद्धोदनेः शुद्धोदनपुत्रात् सर्वार्थसिद्धात्सकाशात् राहोः सपत्नः चन्द्रः तद्वत् वक्त्रं मुखं यस्य नाम्ना राहुक एव सुतः जज्ञे ॥ ४६ ॥

अथेष्टपुत्रः परमप्रतीतः । कुलस्य वृद्धिं प्रति भूमिपालः ॥
यथैव पुत्रप्रसवे ननंद । तथैव पौत्रप्रसवे ननंद ॥ ४७ ॥

अथ पौत्रप्रसूत्यनंतरं कुलस्य वृद्धिं प्राति इष्टपुत्रः अभीष्टतनयः परमप्रतीतः परमप्रसिद्धः । पुत्रप्रसवे पुत्रोत्पत्तौ ॥ ४७ ॥

---

१ A स्यमार्जीन्म०. २ C स्त्वभिध्यां ३ C दिधक्षीध्हृ. ४ C विप्र० — ५ A शौध्दौदनें

पुत्रस्य[1] मे पौत्रगतो[2] ममेवं[3]। स्नेहः कथं स्यादिति जातहर्षः॥
काले स तं तं विधिमाललंबे। पुत्रप्रियः स्वर्गमिवारुरुक्षन्॥ ४८॥

ममेव मे पुत्रस्य पौत्रगतः स्नेहः प्रेम कथं स्यात्। यथा मम पुत्रे स्नेह एवं मत्पुत्रस्य स्वपुत्रे प्रेम कथं स्यात् इति जातहर्षः संजाताह्लादः काले योग्यकाले तं तं विधिं संस्कारं आललंबे। पुत्रेण जयति स्वर्गमित्यादिवचनेन स्वर्गमारुरुक्षन्निव तं तं विधिं आललंबे इति पूर्वेणान्वयः॥ ४८॥

स्थित्वा पथि प्राथमकल्पिकानां। राजर्षभाणां यशसान्वितानाम्॥
शुक्लान्यमुक्त्वापि तपांस्यतप्त। यज्ञैश्च[4] हिंसारहितैरयष्ट॥ ४९॥

प्राथमकल्पिकानां प्रथमकल्पः आद्यारंभः प्रयोजनं येषां ते प्राथमकल्पिकाः तेषां। प्रयोजनमासीति ठक्। राजश्रेष्ठानां पथि स्थित्वा शुक्लानि रूप्याणि तदुपलक्षितं राज्यमित्यर्थः अमुक्त्वापि अत्यक्त्वापि तपांसि कृच्छ्रचांद्रायणादीनि अतप्त। हिंसारहितैः पिष्टपशुसाध्यैः यज्ञैः अयष्ट। एतेन पिष्टपशुसाध्ययज्ञा एव निष्कामानां धर्मा इत्युक्तं भवति॥ ४९॥

अजाज्वलिष्टाथ स पुण्यकर्मा। नृपश्रिया चैव तपश्रिया च॥
कुलेन वृत्तेन धिया च दीप्तस्तेजः सहस्रांशुरिवोत्सिसृक्षुः॥ ५०॥

अथ पुण्यकर्मा स नृपः नृपश्रिया राजलक्ष्म्या तपःश्रिया तपोलक्ष्म्या कुलेन सद्वंशेन वृत्तेन सदाचारेण धिया सद्बुध्या दीप्तः सहस्रांशुरिव सूर्य इव तेजः उत्सिसृक्षुः उत्स्रष्टुमिच्छुः सन् अजाज्वलिष्ट॥ ५०॥

स्वायंभुवं चार्चिकमर्चयित्वा।
जजाप पुत्रस्थितये स्थिरश्रीः[5]॥
चकार कर्माणि च दुष्कराणि।
प्रजाः सिसृक्षुः क इवादिकाले॥ ५१॥

स्थिरश्रीः पुत्रस्थितये आर्चिकं अर्च्यं पूजार्हमित्यर्थः। एतादृशं स्वायंभुवं ब्रह्मणः पुत्रं मूलपुरुषं मनुमित्यर्थः। अर्चयित्वा जजाप जप्यान् इति शेषः। आदिकाले प्रजाः सिसृक्षुः क इव ब्रह्मा इव दुष्कराणि कर्तुमशक्यानि कर्माणि चकार॥ ५१॥

तत्याज शस्त्रं विममर्श शास्त्रं। शमं सिषेवे नियमं विषेहे॥
वशीव कंचिद्विषयं न भेजे। पितेव सर्वान्विषयान् ददर्श॥ ५२॥

विममर्श विचारयामास। नियमं कृच्छ्रादि विषेहे सोढवान्। वशीव जितेंद्रिय इव कंचित् कमपि। विषयान् देशान् ददर्श पालयामासेत्यर्थः॥ ५२॥

बभार राज्यं स हि पुत्रहेतोः।
पुत्रं कुलार्थं यशसे कुलं तु॥

---

१ C पौत्रस्य. २ C पुत्र. ३ C ममै०. ४ C यज्ञे च. ५ C स्थितश्रीः.

स्वर्गाय शब्दं दिवमात्महेतो- ।
धर्मार्थमात्मस्थितिमाचकांक्ष ॥ ५३ ॥

स हि पुत्रहेतोः राज्यं बभार । कुलार्थं वंशवृद्धये पुत्रं बभार । यशसे कुलं । शब्दं वेदशब्दं तत्प्रोक्तकर्माणीतियावत् । दिवं स्वर्गं आत्महेतोः । आत्मस्थितिं आत्मसत्तां धर्मार्थं आचकांक्ष इयेष ॥ ५३ ॥

एवं स धर्मं विविधं चकार । सद्भिर्निपाल्यं श्रुतितश्च सिद्धं ॥
दृष्ट्वा कथं पुत्रमुखं सुतो मे । वनं न यायादिति नाथमानः ॥ ५४ ॥

विविधं अनेकविधं सद्भिर्निपाल्यं सद्भिराचरितमित्यर्थः । न केवलं सद्भिराचरितमेव किंतु श्रुतितश्च सिद्धं वेदप्रतिपाद्यं एतादृशं धर्मं चकार । मे सुतः पुत्रमुखं दृष्ट्वा वनं कथं न यायात् इति नाथमानः याचमानः धर्मं चकारेति पूर्वेणान्वयः ॥ ५४ ॥

रिरक्षिषंतः श्रियमात्मसंस्था । रक्षंति पुत्रान्भुवि भूमिपालाः ॥
पुत्रं नरेंद्रः स तु धर्मकामो । ररक्ष धर्माद्विषयेष्वमुञ्चत् ॥ ५५ ॥

आत्मनि संस्था स्थितिर्येषां ते आत्मनिष्ठा इत्यर्थः । श्रियं राज्यलक्ष्मीं रक्षितुमिच्छन्तः । हेतुगर्भविशेषणमिदं । पुत्रान् रक्षंति । श्रीरक्षणार्थं पुत्रान् रक्षंतीत्यर्थः । स तु धर्मकामः नरेंद्रः पुत्रं ररक्ष धर्माद्विषयेषु अमुंचत् । धर्माद्विषयेषु यत् अमुंचत् तेन कर्मणा पुत्रं ररक्षेत्यर्थः । धर्मे निमग्नो हि राज्यश्रियं कदाचित् जह्यात् इति पुत्रं विषयेष्वेव अमुंचत् ॥ ५५ ॥

वनमनुपमसत्वा बोधिसत्वास्तु सर्वे ।
विषयसुखरसज्ञा जग्मुरुत्पन्नपुत्राः ॥
अत उपचितकर्मा रूढमूलेऽपि हेतौ ।
स रतिमुपसिषेवे बोधमापन्न यावत् ॥ ५६ ॥

नास्ति उपमा यस्य तत् अनुपमं सत्वं अंतःकरणं येषां ते तथा बोधिसत्वाः महाज्ञानिनः विषयसुखस्य रसं जानन्तीति तथा उत्पन्नपुत्राः वनं जग्मुः । उपचितं वृद्धिंगतं कर्म यस्य सः । हेतौ वनगमनकारणे पुत्ररूपे रूढमूलेपि उत्पन्नेऽपि इत्यर्थः । यावत् बोधं न आपत् तावत् रतिं उपसिषेवे ॥ ५६ ॥

॥ इति श्रीबुद्धचरिते महाकाव्येऽन्तःपुरविहारो नाम द्वितीयः सर्गः ॥

इतिश्री ७९ पदवाक्यप्रमाणपारावारीणमहामहोपाध्यायश्रीगोपालाचार्यांतेवासिना निगुडकरोपनामकनारायण (दत्तात्रेय) शर्मणा विरचितायां तत्वदीपिकाख्यायां बुद्धचरितसंक्षिप्तव्याख्यायां द्वितीयः सर्गः ॥

---

१ A स्वर्गाय रात्रिंदिवमात्म०. २ C निपातं. ३ C बोधिमा०.

तृतीयः सर्गः ।

ततः कदाचिन्मृदुशाद्वलानि । पुंस्कोकिलोन्नादितपादपानि ॥
शुश्राव पद्माकरमंडितानि । [1]शीतेन बद्धानि स काननानि ॥ १ ॥

अथ शौद्धोदनेः वैराग्यप्रादुर्भावप्रदर्शनार्थं तत्कारणीभूतां उद्यानविहाराय उद्याने जिगमिषां दर्शयति । तत इति । पुत्रोत्पत्त्यनंतरं प्रासादक्रीडोत्तरं वा । मृदूनि शाद्वलानि शादहरिताः प्रदेशा येषु । पुमांसश्च ते कोकिलाश्च पूंस्कोकिलाः तैः उन्नादिताः शब्दिताः पादपा वृक्षा येषु तानि। पद्माकराः पद्मखनयः तडागा इत्यर्थः तैः मंडितानि भूषितानि । शीतेन शैत्येन। 'शीतं हिमगुणे क्लीवं' इति मेदिनी । बद्धानि युक्तानीत्यर्थः। एतादृशानि काननानि शुश्राव । अत्र काननानीत्यनेन काननानां गुणा उपलक्ष्यंते । काननानां श्रवणाऽनर्हत्वात् । मंचाः क्रोशंतीतिवत् । एतेन काननानां मनोहारित्वं सूचितम् ॥ १ ॥

श्रुत्वा ततः स्त्रीजनवल्लभानां । मनोज्ञभावं पुरकाननानां ॥
बहिः प्रयाणाय चकारबुद्धिमंतर्गृहे नाग इवावरुद्धः ॥ २ ॥

अंतर्गृहे गृहमध्ये अवरुद्धः रोधं प्रापितः नाग इव हस्ती इव । अनेन तस्य अंतर्मदावस्था सूचिता । स्त्रीजनस्य वल्लभानां दयितानां । पुरकाननानां नगरारण्यानां । मनोज्ञानां मनोहाराणां भावः तं श्रुत्वा नहिः प्रयाणाय बहिर्गमनाय बुद्धिं चकार ॥ २ ॥

ततो नृपस्तस्य निशम्य भावं ।
पुत्राभिधानस्य मनोरथस्य ॥
स्नेहस्य लक्ष्म्या वयसश्च योग्या-
माज्ञापयामास विहारयात्रां ॥ ३ ॥

ततः बहिःप्रयाणेच्छानंतरं नृपः शुद्धोदनः तस्य सर्वार्थसिद्धस्य भावं बहिर्जिगमिषारूपं पुत्र इति अभिधानं यस्य एतादृशो यो मनोरथः तस्य । स्नेहस्य प्रेम्णः लक्ष्म्याः ऐश्वर्यस्य वयसः तारुण्यस्य योग्यां अनुरूपां विहारस्य यात्रां विहारोपयोगिनीं यात्रामित्यर्थः । आज्ञापयामासेत्यन्वयः ॥ ३ ॥

निवर्तयामास च राजमार्गे । संपातमार्तस्य पृथग्जनस्य ॥
माभूत्कुमारः सुकुमारचित्तः । संविग्नचेता इति मन्यमानः ॥ ४ ॥

सुकुमारचित्तः मृदुलांतःकरणः । कुमारः संविग्नचेताः उद्विग्नांऽतःकरणः मा भूत्

[1] C शीते निबद्धा०.

इति मन्यमानः नृपः राजमार्गे आर्तस्य पीडितस्य पृथग्जनस्य प्राकृतजनस्य नीचजनस्येति यावत् । संपातं इतस्ततः संचारं निवर्तयामासेत्यन्वयः ॥ ४ ॥

प्रत्यंगहीनान्विकलेंद्रियांश्च ।
जीर्णातुरादीन्कृपणांश्च भिक्षून् ॥
ततः समुत्सार्य परेण साम्ना ।
शोभां परां राजपथस्य चक्रुः ॥ ५ ॥

राजमार्गे आर्तादिकानां संपातं निवर्तयामासेत्युक्तं तदेव द्रढयति । प्रत्यंगेति । ततः राजमार्गात् प्रत्यंगहीनान् अवयवविकलान् । विकलेंद्रियान् हीनेंद्रियान् । जीर्णातुरादीन् आदिना कुवेषनीचादीन् । कृपणान् कदर्यान् । भिक्षून् परिव्राजकान् । समुत्सार्य दूरीकृत्य । ननु दीनादीनां राजमार्गात् अपसारेण कठोरत्वं प्रसज्येत अत आह । परेण साम्नेति । आर्जवेनैव इदमपसारणं न तु बलेनेत्यर्थः । परेण उत्कृष्टेन साम्ना सांत्वेन राजपथस्य राजमार्गस्य परां तोरणादिना उत्कृष्टां शोभां चक्रुः ॥ ५ ॥

ततः कृते श्रीमति राजमार्गे । श्रीमान्विनीतानुचरः कुमारः ॥
प्रासादपृष्ठादवतीर्य काले । कृताभ्यनुज्ञो नृपमभ्यगच्छत् ॥ ६ ॥

ततः राजमार्गशोभाकरणानंतरं । श्रीमति शोभायुक्ते राजमार्गे कृते सति । श्रीमान् लक्ष्मीवान् । विनीतानुचरः शिक्षितभृत्यः नम्रसेवको वा कुमारः प्रासादपृष्ठात् राजगृहोर्ध्वभागस्थक्रीडास्थानात् अवतीर्य । काले सुमुहूर्ते इत्यर्थः । कृताभ्यनुज्ञः पितृगृहप्रवेशार्थं गृहीतापित्रनुज्ञः सन् नृपं शुद्धोदनं अभ्यगच्छत् ॥ ६ ॥

अथो नरेंद्रः सुतमागताश्रुः ।
शिरस्युपाघ्राय चिरं निरीक्ष्य ॥
गच्छेति चाज्ञापयति स्म वाचा ।
स्नेहान्न चैनं मनसा मुमोच ॥ ७ ॥

अथो इति । अथो पुत्रसंमीलनानंतरं । नरेंद्रः शुद्धोदनः । आगताश्रुः प्राप्ताश्रुकलः सन् । पुत्रं शिरसि उपाघ्राय चिरं निरीक्ष्य च गच्छेति वाचा आज्ञापयति स्म । एनं पुत्रं स्नेहात् हेतोः । मनसः अंतःकरणेन न मुमोच न त्यक्तवान् । केवलं वाचैव गच्छेत्युक्तं मनस्तु तत्र स्नेहेन संलग्नमासीदित्यर्थः ॥ ७ ॥

ततः स जांबूनदभांडभृद्भिर्युक्तं चतुर्भिर्निभृतैस्तुरंगैः ॥
अक्लीबविद्युच्छुचिरश्मिधारं । हिरण्मयं स्यंदनमारुरोह ॥ ८ ॥

ततः पित्राज्ञानंतरं । स कुमारः । जांबूनदस्य सुवर्णस्य यानि भांडानि अश्वाभरणानि । 'स्याद्भांडमश्वाभरणे' इत्यमरः । तानि बिभ्रद्भिः । चतुर्भिः चतुःसंख्याकैः । निभृतैः विनीतैः । 'निभृतविनीतप्रश्रिताः समाः ।' इत्यमरः । तुरंगैः अश्वैः युक्तं ।

अक्लीबा महतीत्यर्थः । एतादृशी या विद्युत् चंचला तद्वत् शुचिः श्वेता वा रश्मिधारा किरणपंक्तिर्यस्य एतादृशं हिरण्मयं सौवर्णं । 'दांडिनायनेति निपातनात्साधुः । स्यंदनं रथं आरुरोह ॥ ८ ॥

ततः प्रकीर्णोज्ज्वलपुष्पजालं । विषक्तमाल्यं प्रचलत्पताकं ॥
मार्गं प्रपेदे सदृशानुयात्रश्चन्द्रः सनक्षत्र इवांतरिक्षं ॥ ९ ॥

तत इति । स्यंदनारोहणानंतरं सनक्षत्रः नक्षत्रसहितः चन्द्रः अंतरिक्षमिव आकाशमिव प्रकीर्णानि इतस्ततः लंवितानि उज्ज्वलानि पुष्पजालानि पुष्पमालाः यस्मिन् । विषक्तानि संबद्धानि मालादीनि यस्मिन् । अथवा पुष्पजालपदेन पुष्पसमूहः माल्यपदेन माला गृह्यते । प्रचलत्पताकं चंचलध्वजं एतादृशं मार्गं सदृशानुयात्रः उचितानुगंतृकः कुमारः प्रपेदे ॥ ९ ॥

कौतूहलात्स्फीततरैश्च नेत्रैर्नीलोत्पलैः[1] किं नु विकीर्यमाणः ॥
शनैः शनैः राजपथं जगाहे । पौरैः समंतादभिवीक्ष्यमाणः ॥ १० ॥

कौतुहलादिति । कौतुहलात् कौतुकात् पौरैः नागरिकैः स्फीततरैः प्रफुल्लतरैः नेत्रैः नीलोत्पलैः किनु विकीर्यमाणः समंतात् अभिवीक्ष्यमाणः अवलोक्यमानः शनैः शनैः मंदं मंदं राजपथं जगाहे ॥ १० ॥

तं तुष्टुवुः सौम्यगुणेन केचिद्ववंदिरे दीप्ततया तथान्ये ॥
सौमुख्यतस्तु श्रियमस्य केचिद्वैपुल्यमाशांसिषुरायुषश्च ॥ ११ ॥

केचित् सौम्यगुणेन हेतुना तं तुष्टुवुः । तथा अन्ये केचित् दीप्ततया भासमानत्वेन ववंदिरे नेमुः । केचित् अस्य श्रियं शोभां लक्ष्मीं वा सुमुखस्य भावः सौमुख्यं तस्मात् आशांसिषुः ईषुः । आयुषः च वैपुल्यं चिरंतनत्वं इत्यर्थः । आशांसिषुः ॥ ११ ॥

निसृत्य नार्यश्च[3] महाकुलेभ्यो । व्यूहाश्च कैरातकवामनानां ॥
कुब्जाः[2] कृशेभ्यश्च निवेशनेभ्यो । देवानुयायिध्वजवत्प्रणेमुः[4] ॥ १२ ॥

निसृत्येति । नार्यः महाकुलेभ्यः महावंशेभ्यः महागृहेभ्यो वा । अपादाने पंचमी । निसृत्य बहिरागत्य तथा कुब्जा गंडुलाः । किराता एव कैराताः । प्रज्ञादेराकृतिगणत्वात्स्वार्थेऽण् । कुत्सिताः कैराताः कैरातकाः कुत्सितकिराताः । वामनाः ऱ्हस्वाः । तेषां व्यूहाः समूहाः कृशेभ्यः सूक्ष्मेभ्यः अल्पेभ्य इत्यर्थः निवेशनेभ्यः गृहेभ्यः निसृत्य देवानुयायी यो ध्वजः तद्वत् प्रणेमुः नमंति स्म । यथा देवानुयायिनः ध्वजाः वायुना नमंति तद्वत् तं नमंति स्म ॥ १२ ॥

---

१ C ०त्पलाभैरिव कीर्यं०. २ C कुब्जाश्च. ३ C नार्यः. ४ C यानध्व०.

ततः कुमारः खलु गच्छतीति ।
श्रुत्वा स्त्रियः प्रैष्यजनात्प्रवृत्तिं ॥
दिदृक्षया हर्म्यतलानि जग्मु-
र्जनेन मान्येन कृताभ्यनुज्ञाः ॥ १३ ॥

तत इति । कुमारः गच्छति खलु इति प्रैष्यजनात् सेवकजनात् प्रवृत्तिं वार्तां श्रुत्वा मान्येन जनेन भर्त्रादिना कृताभ्यनुज्ञाः कृताज्ञाः स्त्रियः दिदृक्षया द्रष्टुमिच्छया हर्म्यतलानि जग्मुः ॥ १३ ॥

ताः स्रस्तकांचीगुणविघ्निताश्च । सुप्तप्रबुद्धाकुललोचनाश्च ॥
वृत्तांतविन्यस्तविभूषणाश्च । कौतूहलेनापि भृताः परेयुः ॥ १४ ॥

तासां संभ्रमं दर्शयति ता इति । स्रस्ताः ध्वस्ताः ये कांचीगुणाः मेखलातंतवः तैः विघ्निताः कृतांतरायाः तथा सुप्तात् स्वापात् प्रबुद्धाः जागरिताः अतएव आकुलानि लोचनानि यासां तथा । वृत्तांतेन कुमारो राजपथेन गच्छतीति वार्ताश्रवणेन विन्यस्तानि विरुद्धन्यस्तानि व्यत्यस्तानीत्यर्थः विभूषणानि याभिः अतएव-कौतूहलेनापि भृताः पूर्णाः परेयुः जग्मुरित्यर्थः ॥ १४ ॥

प्रासादसोपानतलप्रणादैः । कांचीरवैर्नूपुरनिस्वनैश्च ॥
विभ्रामयन्त्यो गृहपक्षिसंघानन्योन्यवेगाच्च समाक्षिपन्त्यः ॥ १५ ॥

प्रासादेति । प्रासादस्य यानि सोपानानि आरोहणानि तेषु ये तलप्रणादाः पादतलस्थापनयोत्पन्ना ध्वनयः तैः कांचीरवैः मेखलाध्वनिभिः नूपुरनिस्वनैः अन्योन्यवेगात् परस्परवेगात् समाक्षिपंत्यः परस्परं ताडयंत्यः गृहपक्षिसंघान् गृहसंबंधिपक्षिसमूहान् विभ्रामयंत्यः इतस्ततश्चालयंत्यः भवंतीति शेषः । भूषणादिध्वनिभ्यः जातो यो महान् ध्वनिः तेन स्त्रीणां संमर्देन च क्रीडापक्षिणः भीत्या इतस्ततो भ्रमंतीत्यर्थः ॥ १५ ॥

कासांचिदासां तु वरांगनानां । जातत्वराणामपि चोत्सुकानां ॥
गतिं गुरुत्वाज्जगृहुर्विशालाः । श्रोण्यस्तथापीनपयोधराश्च ॥ १६ ॥

कासांचित् आसां उत्सुकानां उत्कंठितानां अतएव जातत्वराणां उत्पन्नत्वराणां एतादृशीनां वरांगनानां विशालाः विस्तृताः श्रोण्यः श्रोण्युपलक्षितनितंबाः तथा पीनपयोधराः पुष्टस्तनाः गुरुत्वात् गतिं जगृहुः । औत्कंठ्येन गतिविषये त्वरां कुर्वंत्योपि नितंबानां स्तनानां च भारेण झटिति गंतुं नाशक्नुवन् इति तात्पर्यं ॥ १६ ॥

---

१ C प्रेष्य०. २ C सो for चो. ३ C श्रोणीरथाः.

शीघ्रं समर्थापि तु गंतुमन्या ।
गतिं निजग्राह ययौ न तूर्णं ॥
ह्रिया प्रगल्भानि निगूहमाना ।
रहः प्रयुक्तानि विभूषणानि ॥ १७ ॥

अन्या काचन स्त्री शीघ्रं गंतुं समर्थाऽपि रहः प्रयुक्तानि एकांते धृतानि प्रगल्भानि दीप्तिमंति महांति वा विभूषणानि ह्रिया निगूहमाना संवृण्वाना सती गतिं निजग्राह अवारुणत् । अतएव तूर्णं न ययौ । इयं एकांते रता इति लोकैर्माज्ञायि अतः रतकालधृतभूषणानां निगूहनार्थं उद्युक्ता अतः समर्थापि शीघ्रं न गतेत्यर्थः ॥१७॥

परस्परोत्पीडनपिंडितानां । संमर्दसंशोभितकुंडलानां ॥
तासां तदा सस्वनभूषणानां । वातायनेष्वप्रशमो बभूव ॥ १८ ॥

परस्परं अन्योन्यं यत् पीडनं ताडनं तेन पिंडितानां संघीभूतानां संमर्देन संघर्षेण संशोभितानि कुंडलानि यासां सस्वनानि सशब्दानि भूषणानि यासां तासां स्त्रीणां तदा कुमाराऽऽगमनकाले वातायनेषु गवाक्षेषु अप्रशमः अशांतिः बभूव । कुमारदिदृक्षया सर्वासां गवाक्षे मुखार्पणेन संमर्दजन्यः ऊष्मातिरेको बभूवेत्यर्थः ॥

वातायनेभ्यस्तु विनिःसृतानि ।
परस्परोपाश्रितकुंडलानि ॥
स्त्रीणां विरेजुर्मुखपंकजानि ।
सक्तानि हर्म्येष्विव पंकजानि ॥ १९ ॥

वातायनेति । परस्परं उपाश्रितानि संलग्नानि कुंडलानि कर्णभूषणानि येषां तानि । वातायनेभ्यः गवाक्षेभ्यः विनिःसृतानि बहिर्गतानि स्त्रीणां मुखपंकजानि मुखकमलानि हर्म्येषु अट्टेषु सक्तानि संलग्नानि पंकजानि कमलानि इव विरेजुः शुशुभिरे ॥ १९ ॥

ततो विमानैर्युवतीकलापैः । कौतूहलोद्घाटितवातयानैः ॥
श्रीमत्समंतान्नगरं बभासे । वियद्विमानैरिव साप्सरोभिः ॥ २० ॥

ततः कौतूहलेन उद्घाटितानि वातयानानि गवाक्षा येषां युवतिकलापैः स्त्रीसमूहैः विमानैः राजगृहैः हेतुभिः श्रीमत् तन्नगरं समंतात् साप्सरोभिः अप्सरःसहितैः विमानैः वियत् इव बभासे । एतेन तत्रत्यगृहाणामत्युच्चत्वं ध्वनितं ॥ २० ॥

वातायनानामविशालभावा-
दन्योन्यगंडार्पितकुंडलानि ॥
मुखानि रेजुः प्रमदोत्तमानां ।
बद्धाः कलापा इव पंकजानां ॥ २१ ॥

१ C पासित.

वातायनानां अविशालभावात् अविशालत्वात् स्वल्पावकाशत्वादिति यावत् अन्योन्येषां गण्डेषु कपोलेषु अर्पितानि कुंडलानि येषां एतादृशानि प्रमदोत्तमानां उत्तमस्त्रीणां मुखानि पंकजानां बद्धाः कलापा इव समूहा इव रेजुः शुशुभिरे।।२१।।

तस्मिन्कुमारं पथि वीक्षमाणाः। स्त्रियो बभुर्गामिव गन्तुकामाः॥
ऊर्ध्वोन्मुखाश्चैनमुदीक्षमाणा नरा बभुर्द्यामिव गन्तुकामाः ॥२२॥

तस्मिन् पथि मार्गे कुमारं वीक्षमाणाः स्त्रियः गां पृथिवीं गन्तुकामा प्राप्तुकामा इव बभुः। तथा ऊर्ध्वोन्मुखा ऊर्ध्वं उद्गतं मुखं येषां ते उदीक्षमाणा विलोकयन्तो नरा द्यां आकाशं गन्तुकामा इव बभुः । एतेन स्त्रीपुरुषाणां अधोभागे ऊर्ध्वभागे च विलोकने औत्सुक्यं दर्शितम् ॥ २२ ॥

दृष्ट्वा च तं राजसुतं स्त्रियस्ता
जाज्वल्यमानं वपुषा श्रिया च॥
धन्यास्य भार्येति शनैरवोच-
ञ्छुद्धैर्मनोभिः खलु नान्यभावात् ॥ २३ ॥

ताः स्त्रियः वपुषा श्रिया च जाज्वल्यमानं तं राजसुतं दृष्ट्वा अस्य भार्या धन्या इति शुद्धैः मनोभिः अवोचन् । अन्यभावात् अन्याभिप्रायात् एतादृशः पत्युः अस्माकं लाभं कथं भवेत् इत्याकारकात् न खलु नावोचन् खलु ॥ २३ ॥

अयं किल व्यायतपीनबाहू
रूपेण साक्षादिव पुष्पकेतुः॥
त्यक्त्वा श्रियं धर्ममुपैष्यतीति ।
तस्मिन्स्त्रियो गौरवमेव चक्रुः ॥ २४ ॥

स्त्रीणामुक्तिराह अयमिति । व्यायतौ दीर्घौ पीनौ पुष्टौ च बाहू भुजौ यस्य एतादृशः रूपेण सौंदर्येण साक्षात् प्रत्यक्षं यथा स्यात्तथा पुष्पकेतुः मदन इव अयं राजकुमारः श्रियं राजलक्ष्मीं त्यक्त्वा धर्मं वैराग्यरूपं उपैष्यति किल इति तस्मिन् ताः स्त्रियः गौरवमेव आदरमेव चक्रुः ॥ २४ ॥

कीर्णं तथा राजपथं कुमारः। पौरैर्विनीतैः शुचिधीरवेशैः॥
तत्पूर्वमालोक्य जहर्ष किंचिन्मेने पुनर्भावमिवात्मनश्च ॥२५॥

कीर्णमिति । कुमारः शुचिः पवित्रः धीरश्च वेशः वेषो येषां एतादृशैः विनीतैः नम्रैः पौरैः कीर्णं व्याप्तं स एव पूर्वः तत्पूर्वः तं । पूर्वं कदापि अनवलोकितत्वात् इदमेव प्रथमदर्शनमित्यर्थः। एतादृशं राजपथं आलोक्य किंचिज्जहर्ष पुनः आत्मनः स्वस्य भावमिव अन्तःकरणमिव मेने । यथा स्वांतःकरणं अनेककल्पनाभिर्व्याप्तं तद्वदेव अयं अनेकविचित्रपदार्थैर्व्याप्त इति मेने ॥ २५ ॥

१ C हि ता.

पुरं तु तत्स्वर्गमिव प्रहृष्टं । शुद्धाधिवासाः समवेक्ष्य देवाः ॥
जीर्णं नरं निर्ममिरे प्रयातुं । संचोदनार्थं क्षितिपात्मजस्य ॥ २६ ॥

शुद्धाधिवासाः शुद्धः पवित्रः अधि उपरि स्वर्गे वासो येषां एतादृशाः । जीर्णं वृद्धं । संचोदनार्थं संसारनिवृत्तिरूपप्रेरणार्थम् ॥ २६ ॥

ततः कुमारो जरयाभिभूतं । दृष्ट्वा नरेभ्यः पृथगाकृतिं तम् ॥
उवाच संग्राहकमागतास्थस्तत्रैव निष्कंपनिविष्टदृष्टिः ॥ २७ ॥

जरयाऽभिभूतं जराविशिष्टं । पृथगाकृतिं भिन्नाकारं । तरुणीभ्यः भिन्नः वृद्धाकारो भवतीति सुप्रसिद्धं । संग्राहकं रथरश्मिग्रहणकर्तारं सूतमित्यर्थः । आगतास्थः तज्जिज्ञासायां उत्पन्नास्थ इत्यर्थः । तत्रैव यत्र स वृद्ध आसीत् तत्रैवेत्यर्थः । निविष्टदृष्टिः निहितचक्षुः । अन्यत्सुगमम् ॥ २७ ॥

क एष भोः सूत नरोऽभ्युपेतः । केशैः सितैर्यष्टिविषक्तहस्तः ॥
भ्रूसंवृताक्षः शिथिलानतांगः । किं विक्रियैषा प्रकृतिर्यदृच्छा ॥ २८ ॥

अभ्युपेतः प्राप्तः केशैः सितैः युक्त इत्यर्थः । यष्टिविषक्तहस्तः यष्टिस्थितहस्तः भ्रूसंवृताक्षः अतिवार्धक्येन भृकुट्याच्छादितनेत्रः शिथिलानताङ्गः शिथिलनम्रकायः । एषा किं विक्रिया उत प्रकृतिः अथवा यदृच्छा ॥ २८ ॥

इत्येवमुक्तः स रथप्रणेता । निवेदयामास नृपात्मजाय ॥
संरक्ष्यमप्यर्थमदोषदर्शी । तैरेव देवैः कृतबुद्धिमोहः ॥ २९ ॥

संरक्ष्यमपि गोपनीयमपि असितर्षिप्रोक्तं एतस्य भाविनं अर्थं एतेन मा ज्ञायीति गोपनीयमपीत्यर्थः । ननु एतादृशं अर्थं कथं प्रकटितवान् अत आह—अदोषदर्शीति दोषं मिथ्यात्वरूपं न दर्शयति न कथयति इति अदोषदर्शी। ननु 'स्त्रीषु नर्मविवाहे च वृत्त्यर्थं प्राणसंकटे । इति न्यायेन महाहानिप्रसंगे मिथ्यापि वक्तुं योग्यं अत आह–देवैः कृतबुद्धिमोह इति। देवकृतबुद्धिमोहादेव तेनोक्तं कैकेयीवत् ॥ २९ ॥

रूपस्य हर्त्री व्यसनं बलस्य ।
शोकस्य योनिर्निधनं रतीनाम् ॥
नाशः स्मृतीनां रिपुरिंद्रियाणा-
मेषा जरा नाम ययैष भग्नः ॥ ३० ॥

व्यसनं नाशकं योनिः कारणं । निधनं मरणं जरायां प्राप्तायां रतेरभावादित्यर्थः । यया एष भग्नः एषा जरा नाम ॥ ३० ॥

पीतं ह्यनेनापि पयः शिशुत्वे । कालेन भूयः परिसृप्टमुर्व्याम् ॥
क्रमेण भूत्वा च युवा वपुष्मान् । क्रमेण तेनैव जरामुपेतः ॥ ३१ ॥

अनेनापि पुरोवर्तिना पुरुषेणापि। अपिशब्दः सर्वक्रियाणां इतरैः सह साम्येपि इत्यर्थबोधनार्थः । भूयः इत्यव्ययं । अथवा भूयः परिमृष्टमित्यन्वयः । रिंगणादिना भूस्पर्शादिकृतमित्यर्थः । वपुष्मान् प्रशस्तदेहवान् । तेनैव क्रमेण शिशुत्वानंतरं रिंगणकर्तृत्वं इत्यादिक्रमेणेत्यर्थः ॥ ३१ ॥

इत्येवमुक्ते चलितः स किंचि-
द्राजात्मजः सूतमिदं बभाषे ॥
किमेष दोषो भविता ममापी-
त्यस्मै ततः सारथिरभ्युवाच ॥ ३२ ॥

चलितः कंपितः । कंपनहेतुमाह एष दोषः जरारूपः ममापि भविता । सुगममन्यत् ॥ ३२ ॥

आयुष्मतोऽप्येष वयोऽपकर्षो[1] । निःसंशयं कालवशेन भावी ॥
एवं जरां रूपविनाशयित्रीं । जानाति चैवेच्छति चैष लोकः॥३३॥

आयुष्मतः भवतः । 'आयुष्मन् राथिनं सूतः' इति दर्पणे। वयसा हेतुना अपकर्षः अपकृष्टत्वं। वयःप्रकर्ष इति पाठे वयआधिक्यं वृद्धत्वमिति यावत् । कालवशेन कालाधीनत्वेन । इच्छति बहुकालजीवनेच्छया एव जरेच्छेतिभावः । बहुकालजीवनेन जराप्राप्तेः । स्फुटमन्यत् ॥ ३३ ॥

ततः स पूर्वाशयशुद्धबुद्धिर्विस्तीर्णकल्पाचितपुण्यकर्मा ॥
श्रुत्वा जरामुद्विविजे महात्मा। महाशनेर्घोषमिवांतिके गौः ॥३४॥

पूर्वाशयः पूर्वसंस्कारः । आशय शब्दस्य संस्कारवाचित्वं 'क्लेशकर्मविपाकाशयैरित्यादियोगसूत्रे स्पष्टम् । विस्तीर्णा विशाला ये कल्पाः तेषु आचितानि संचितानि पुण्यकर्माणि येन । उद्विविजे उद्विग्नोऽभूत्। संविविजे इति पाठे स एवार्थः । अंतिके महाशनेर्घोषं श्रुत्वा गौरिवेत्यर्थः ॥ ३४ ॥

निःश्वस्य दीर्घं सशिरःप्रकंपं[2] । तस्मिंश्च जीर्णे विनिवेश्य चक्षुः ॥
तां चैव दृष्ट्वा जनतां सहर्षां । वाक्यं स संविग्नमिदं जगाद॥ ३५॥

जीर्णे वृद्धे। जनतां जनसमूहम्। सशिरःप्रकंपं इति निःश्वसनक्रियाविशेषणम् । सप्तम्यंतपाठे जीर्णे इत्यस्य विशेषणम् । संविग्नं उद्वेगसहितम् ॥ ३५ ॥

एवं जरा हन्ति च निर्विशेषं । स्मृतिं च रूपं च पराक्रमं च ॥
न चैव चोद्वेगमुपैति[3] लोकः । प्रत्यक्षतोऽपीदृशमीक्षमाणः ॥३६॥

निर्विशेषं सर्वसाधारणमित्यर्थः । ईदृशं जराकर्तृकस्मृत्यादिनाशम् ॥ ३६ ॥

एवं गते सूत निवर्तयाश्वान् । शीघ्रं गृहाण्येव भवान्प्रयातु ॥
उद्यानभूमौ हि कुतो रतिर्मे । जराभवे चेतसि वर्तमाने ॥ ३७ ॥

---

१ C वयःप्रकर्षोन्नि०— २ C प्रकंप्य. ३ C संवेग.

एवं गते एवं सति। सर्वानपि जरा अवश्यं पीडयति चेत् इत्यर्थः। रतिः प्रेम। चेतसि अंतःकरणे। जराभवे जरारूपसंसारे वर्तमाने सतीत्यर्थः ॥ ३७ ॥

अथाज्ञया भर्तृसुतस्य तस्य। निवर्तयामास रथं नियंता॥
ततः कुमारो भवनं तदेव। चिंतावशः शून्यमिव प्रपेदे ॥ ३८ ॥

भर्तृसुतस्य शुद्धोदनपुत्रस्य। नियंता सारथिः। तदेव यस्मिन् पूर्वं क्रीडति स्म तदेव। शून्यमिवेति गृहस्य सकलाशीःसंपन्नत्वेपि मनसः उद्विग्नत्वेन शून्यसदृशत्वम् ॥ ३८ ॥

यदा तु तत्रैव न शर्म लेभे। जरा जरेति प्रपरीक्षमाणः ॥
तदा नरेन्द्रानुमतः स भूयः। क्रमेण तेनैव बहिर्जगाम ॥ ३९ ॥

तत्रैव पूर्वगृहे एव। शर्म सुखं सुखालब्धौ हेतुमाह जराजरेत्यादि। प्रपरीक्षमाणः चिन्तयन्नित्यर्थः। नरेन्द्रानुमतः शुद्धोदनेनाज्ञप्तः। तेनैव क्रमेण पूर्वगमनक्रमेणेत्यर्थः ॥ ३९ ॥

अथापरं व्याधिपरीतदेहं। त एव देवाः ससृजुर्मनुष्यम् ॥
दृष्ट्वा च तं सारथिमाबभाषे। शौद्धोदनिस्तद्गतदृष्टिरेव ॥ ४० ॥

व्याधिपरीतदेहं व्याधिव्याप्तदेहं। त एव यैः पूर्वं जीर्णमनुष्यः प्रेषितः त एवेत्यर्थः। शौद्धोदनिः सर्वार्थसिद्धः। तस्मिन् व्याधिग्रस्ते मनुष्ये गता दृष्टिः यस्य सः। सुगममन्यत् ॥ ४० ॥

स्थूलोदरः श्वासचलच्छरीरः। स्रस्तांसबाहुः कृशपाण्डुगात्रः ॥
अंबेति वाचं करुणं ब्रुवाणः। परं समाश्लिष्य नरः क एषः॥ ४१ ॥

किमाबभाषे तदाह—स्थूलोदरः बृहदुदरः। श्वासेन चलत् कंपितं शरीरं यस्य। स्रस्तौ अधोवलंबिनौ अंसौ बाहू च यस्य। कृशं पांडु च पांडुरं गात्रं शरीरं यस्य। अंब इत्यादिः लोकोक्तिरियम् ॥ ४१ ॥

ततोऽब्रवीत्सारथिरस्य सौम्य। धातुप्रकोपप्रभवः प्रवृद्धः ॥
रोगाभिधानः सुमहाननर्थः। शक्रोऽपि येनैष कृतोऽस्वतंत्रः ॥ ४२ ॥

धातूनां वातपित्तकफानां यः प्रकोपः अव्यवस्थितत्वं तस्मात् प्रभवः उत्पत्तिः यस्य। रोग इति अभिधानं नाम यस्य। येन रोगाऽभिधमहाऽनर्थेन। अस्वतंत्रः परतंत्र इत्यर्थः ॥ ४२ ॥

इत्यूचिवान् राजसुतः स भूयस्तं सानुकंपं[2] नरमीक्षमाणः ॥
अस्यैव जातः पृथगेष दोषः। सामान्यतो रोगभयं प्रजानाम् ॥ ४३ ॥

राजसुतः सः तं नरं सानुकंपं ईक्षमाणः सन् भूयः इति वक्ष्यमाणप्रकारेण

१ C ततो. २ C ॰पो.

ऊचितवान् । किमूचिवान् तदाह—एष दोषः रोगरूपः अस्यैव पृथक् जातः किम् । अथवा प्रजानां सामान्यतः रोगभयम् ॥ ४३ ॥

ततो बभाषे स रथप्रणेता । कुमार साधारण एष दोषः ॥
एवं हि रोगैः परिपीड्यमानो । रुजातुरो हर्षमुपैति लोकः ॥ ४४ ॥

रथप्रणेता सारथिः । कुमार एष दोषः साधारणः सर्वसामान्य इत्यर्थः । रुजया रोगेण आतुरः । रोगव्याप्तोऽपि हर्षं आनंदं प्राप्नोति न तु विरज्यते इति तात्पर्यम् ॥ ४४ ॥

इति श्रुतार्थः स विषण्णचेताः ।
प्रावेपतांबूर्मिगतः शशीव ॥
इदं तु वाक्यं करुणान्वितः सन् ।
प्रोवाच किंचिन्मृदुना स्वरेण ॥ ४५ ॥

श्रुतार्थः आकर्णितार्थः । विषण्णचेता उद्विग्नमनाः । अम्बूर्मयः उदकल्लोलाः तान् गतः प्रतिबिंबित इत्यर्थः शशी इव प्रावेपत प्राकंपत । इदं वक्ष्यमाणवाक्यम् । किंचित् मृदुना स्वरेण प्रोवाच ॥ ४५ ॥

इदं च रोगव्यसनं प्रजानां । पश्यंश्च विश्रंभमुपैति लोकः ॥
विस्तीर्णविज्ञानमहो नराणां । हसन्ति यद्रोगभयैरमुक्ताः ॥ ४६ ॥

रोगव्यसनं रोगजदुःखं । विश्रंभं विश्वासं । सुखी स्यां न कदाचित् दुःखं प्राप्नुयां इति विश्वासम् । यत् रोगभयैः अमुक्ताः अविमुक्ताः सन्तः हसंति अतः नराणां विस्तीर्णविज्ञानं महत् ज्ञानं । अहो इति आश्चर्ये । उपहासपरमिदं भाषणम् ॥ ४६ ॥

निवर्त्यतां सूत बहिः प्रयाणान्नरेन्द्रसद्मैव रथः प्रयातु ॥
श्रुत्वा च मे रोगभयं रतिभ्यः । प्रत्याहतं संकुचतीव चेतः ॥ ४७ ॥

रतिभ्यः विषयसुखेभ्यः प्रत्याहतं निवृत्तं संकुचतीव संकोचं प्राप्नोतीवेत्यर्थः ॥ ४७ ॥

ततो निवृत्तः स निवृत्तहर्षः । प्रध्यानयुक्तः प्रविवेश सद्म ॥
तं द्विस्तथा प्रेक्ष्य च संनिवृत्तं । पुर्यागमं भूमिपतिश्चकार ॥ ४८ ॥

निवृत्तहर्षः निर्गताऽऽनंदः प्रध्यानयुक्तः विचारग्रस्तमना इत्यर्थः । द्विः द्विवारं । पुर्यां आगमं प्राप्तिं । निवर्तनकारणं द्रष्टुं पुरीं आगत इत्यर्थः ॥ ४८ ॥

श्रुत्वा निमित्तं तु निवर्तनस्य । संत्यक्तमात्मानमनेन मेने ॥
मार्गस्य शौचाधिकृताय चैव । चुक्रोश रुष्टोऽपि च नोग्रदण्डः ॥ ४९ ॥

१ C च. २ ये रोग०—

निवर्तनस्य निमित्तं श्रुत्वा लोकेभ्य इति शेषः । अनेन पुत्रेण आत्मानं संत्यक्तं उज्झितं मेने । असितमुनिवाक्यस्मरणेन अयं मत्पुत्रः विरागी सन् आत्मानं त्यक्तवान् इति मेने इत्यर्थः । मार्गस्य अध्वनः । शौचाधिकृताय संकरनिरसनमार्जनादिना शुचित्वोत्पादने नियुक्ताय । चुक्रोश आक्रोशमेव कृतवान् । उग्रदण्डः तीक्ष्णदण्डः नो बभूवेत्यर्थः । रुष्टोपि वाचैव निर्भर्त्सितवान् न तूग्रदण्डं कृतवानित्यर्थः। एतेन तस्य दयालुता व्यज्यते ॥ ४९ ॥

भूयश्च तस्मै विदधे सुताय ।
विशेषयुक्तं विषयप्रकारम् ॥
चलेन्द्रियत्वादपि [1]नातिशक्तो ।
नास्मान्विजह्यादिति नाथमानः ॥ ५० ॥

तस्मै सुताय विशेषयुक्तं आधिक्ययुक्तं विषयप्रकारं विषयरचनां भूयः पुनः विदधे । ननु विरक्तस्य पुत्रस्य भूयो विषयोपचारेण क उपयोग इत्यत आह— चलेन्द्रियत्वात् इत्यादि । चलेन्द्रियत्वात् इन्द्रियचांचल्यात् । अपिः संभावनायाम् । इंद्रियचांचल्याद्धेतोः विषयांस्त्यक्तुं न अतिशक्नुयात् अपि । अतः अस्मान् न विजह्यात् न त्यजेत् इति नाथमानः आशंसमान इत्यर्थः। भूयः विषयप्रकारं विदधे इति पूर्वेण अन्वयः ॥ ५० ॥

यदा च शब्दादिभिरिन्द्रियार्थैरन्तःपुरे नैव सुतोऽस्य रेमे ॥
[2]तदा बहिर्व्यादिशति स्म यात्रां । रसांतरं स्यादिति मन्यमानः॥५१॥

इन्द्रियार्थैः विषयैः । व्यादिशति स्म आज्ञापितवान् । रसांतरं गृहक्रीडापेक्षया बहिः क्रीडारूपं रसांतरमित्यर्थः ॥ ५१ ॥

स्नेहाच्च भावं तनयस्य बुध्वा ।
संवेगदोषानविचिन्त्य कांश्चित् ॥
योग्याः समाज्ञापयति स्म तत्र ।
कलास्वभिज्ञा इति वारमुख्याः ॥ ५२ ॥

तनयस्य भावं अभिप्रायं विरक्तिमित्यर्थः बुध्वा ज्ञात्वा कांश्चित् संवेगदोषान् उद्वेगदोषान् उद्वेगकारणीभूतहेतूनित्यर्थः । अविचिन्त्य अविगणय्य तिरस्कृत्येति यावत् । स्नेहात् पुत्रप्रेमवशात् तत्र कलासु वशीकरणकलासु अभिज्ञाः इति हेतोः योग्याः वारमुख्याः वारवेश्या इत्यर्थः समाज्ञापयाति स्म ॥ ५२ ॥

ततो विशेषेण नरेन्द्रमार्गे ।
स्वलंकृते चैव परीक्षिते च ॥
[3]अत्यास्य सूतं च रथं च राजा ।
प्रस्थापयामास बहिः कुमारम् ॥ ५३ ॥

---

१ C नाति. २ C ततो. ३ C व्यत्या०—

विशेषेण पूर्वापेक्षया आधिक्येन परीक्षिते कृतपरीक्षे। जीर्णरुग्णादिभिः वर्जिते इत्यर्थः। स्वलंकृते ध्वजतोरणपुष्पमालाभिः स्वर्चिते नरेन्द्रमार्गे राजमार्गे राजा शुद्धोदनः सूतं रथं च बहिः अत्यास्य बहिरानीयेत्यर्थः कुमारं प्रस्थापयामास॥५३॥

ततस्तथागच्छति राजपुत्रे।
तैरेव देवैर्विहितो गतासुः॥
तं चैव मार्गे मृतमुह्यमानम्।
सूतः कुमारश्च ददर्श नान्यः॥ ५४॥

तथा पुनरपि विशिष्टसामग्रीसाहित्येन। तैरेव देवैः यैः पूर्वं वृद्धरुग्णौ प्रेषितौ तैरेवेत्यर्थः। विहितः कृतः। गतासुः गतप्राणः। उह्यमानं नीयमानम्। अन्यः सूतकुमाराभ्यां इतरः॥ ५४॥

अथाब्रवीद्राजसुतः स सूतम्। नरैश्चतुर्भिर्ह्रियते क एषः॥
दीनैर्मनुष्यैरनुगम्यमानो। यो भूषितोऽश्वास्यवरुध्यते च॥५५॥

अथ स राजसुतः सूतं अब्रवीत्। तदेवाह—चतुर्भिर्नरैः ह्रियते एषः। कः तं वर्णयाति दीनैरित्यादिना। भूषितः अलंकृतः। अश्वासी श्वासरहितः। अवरुध्यते प्रेतयाने इति शेषः॥ ५५॥

ततः स शुद्धात्मभिरेव देवैः। शुद्धाधिवासैरभिभूतचेताः॥
अवाच्यमप्यर्थमिमं नियन्ता। प्रव्याजहारार्थविदीश्वराय॥५६॥

शुद्धात्मभिः शुद्धांतःकरणैः शुद्धे पवित्रे स्वर्गे अधिवासो येषां। अभिभूतचेताः पराभूतांतःकरणः भिन्नमतिरिति अवाच्यमपि। अवाच्यत्वं वैराग्योत्पादनेन राज्यभ्रंशकरत्वात्। इमं वक्ष्यमाणं अर्थं ईश्वराय शौद्धोदनये॥ ५६॥

बुद्धीन्द्रियप्राणगुणैर्वियुक्तः।
सुप्तो विसंज्ञस्तृणकाष्ठभूतः॥
संवध्य संरक्ष्य च यत्नवद्भिः।
प्रियाप्रियैस्त्यज्यत एष कोऽपि॥ ५७॥

बुद्धिः मतिः इन्द्रियाणि चक्षुरादीनि प्राणाः असवः गुणाः वैदूष्यादयः तैः वियुक्तः विरहितः अत एव तृणकाष्ठभूतः तृणकाष्ठतुल्यः सुप्तः दीर्घनिद्रां प्राप्त इत्यर्थः। अत एव विसंज्ञः संज्ञारहितः एतादृशः एष कोपि मनुष्यः यत्नवद्भिः प्रयत्नवद्भिः प्रियाऽप्रियैः हिताहितैः संवध्य संनह्य संरक्ष्य क्रव्यादेभ्यः रक्षणं कृत्वा त्यज्यते श्मशाने इति शेषः॥ ५७॥

इति प्रणेतुः स निशम्य वाक्यम्। सं[2] चुक्षुभे किंचिदुवाच चैनम्॥
एकाकिनस्त्वेव[3] जनस्य नाशः। सर्वप्रजानामयमीदृशोऽन्तः॥५८॥

१ C रुद्य०— २ C संचु०— ३ C किं केवलस्यै.

प्रणेतुः सूतस्य । सः शौद्धोदनिः चुक्षुभे एनं सूतं किंचिदुवाच च । तदेवाह–किमित्यादिना केवलस्य एकस्य अंतः नाशः ॥ ५८ ॥

ततः प्रणेता वदति स्म तस्मै ।
सर्वप्रजानामयमन्तकर्ता[1] ॥
हीनस्य मध्यस्य महात्मनो वा ।
सर्वस्य लोके नियतो विनाशः ॥ ५९ ॥

प्रणेता सूतः । अयं बुद्धिस्थः मृत्युः इत्यर्थः । अंतकर्ता । अन्तकर्मेति पाठे अंतः नाशकरणं कर्म क्रिया यस्य । तदेव द्रढयति । हीनस्येति हीनस्य निकृष्टस्य ॥ ५९ ॥

ततः स धीरोऽपि नरेन्द्रसूनुः । श्रुत्वैव मृत्युं विषसाद सद्यः ॥
अंसेन संश्लिष्य च कूबराग्रं । प्रोवाच निह्रादवता स्वरेण ॥ ६० ॥

धीरोऽपि गंभीरोऽपि विषसाद विषण्णोऽभूत् । संश्लिष्य अवष्टभ्य कूबराग्रं युगंधराग्रं निह्रादवता गांभीर्यवता ॥ ६० ॥

इयं च निष्ठा नियतं प्रजानाम् ।
प्रमाद्यति त्यक्तभयश्च लोकः ॥
मनांसि शंके कठिनानि नृणां ।
स्वस्थास्तथा ह्यध्वनि वर्तमानाः ॥ ६१ ॥

निष्ठा स्थितिः । त्यक्तभयः मरणसंबधिभीतिरहित इत्यर्थः । लोके नृणां मनांसि कठिनानि कठोराणि । कुत इत्याकांक्षायामाह—तथाहि स्वस्था अध्वनि वर्तमानाः भवन्तीति शेषः ॥ ६१ ॥

तस्माद्रथं सूत निवर्त्यतां नो । विहारयोग्यौ[2] न हि देशकालौ ॥
जानन्विनाशं कथमार्तिकाले । सचेतनःस्यादिह हि प्रसक्तः[3] ॥ ६२ ॥

देशकालौ नहि अयं देशः कालश्च विहारयोग्यो नास्तीत्यर्थः । तदेव स्पष्टयति । जानन्निति । आर्तिकाले दुःखकाले । सचेतनः ज्ञानी ॥ ६२ ॥

इति ब्रुवाणेपि नराधिपात्मजे ।
निवर्तयामास स नैव तं रथम् ॥
विशेषयुक्तं तु नरेन्द्रशासना-
त्सपद्मखण्डं वनमेव निर्ययौ ॥ ६३ ॥

विशेषयुक्तं विशेषशोभायुक्तामित्यर्थ । सपद्मखण्डं पद्मखण्डेन कमलसमूहेन सहितम् ॥ ६३ ॥

ततः शिवं कुसुमितबालपादपं ।
परिभ्रमत्प्रमुदितमत्तकोकिलम् ॥

---

१ C कर्मा. २ C भूमौ for योग्यौ. ३ C प्रमत्तः.

निपानवत्सकमलचारुदीर्घिकं ।
ददर्श तद्वनमिव नन्दनं वनम् ॥ ६४ ॥

शिवं सुखकरम् । कुसुमितबालपादपं प्रफुल्लितस्वल्पवृक्षम् । परिभ्रमन्तः प्रमुदिताः आनन्दिताः मत्ताः उन्मत्ताः कोकिलाः पिका यस्मिन् । निपानवत् आहावविशिष्टं । सकमलाः कमलसंहिताः । चार्व्यः मनोहराः दीर्घिकाः वाप्यः यस्मिन् । एतादृशं नंदनं वनमिव तद्वनं ददर्श ॥ ६४ ॥

वरांगनागणकलिलं नृपात्मज-
स्ततो बलाद्वनमभिनीयते स्म तत् ॥
वराप्सरोन्वितमलकाधिपालयम् ।
नवव्रतो मुनिरिव विघ्नकातरः ॥ ६५ ॥

वरांगनागणः सुंदरस्त्रीसमूहः तेन कलिलं व्याप्तम् । अभिनीयते स्म प्रापितः । बलात् हठात् । वराप्सरोऽन्वितं सुंदराप्सरोयुतं । अलकाऽधिपालयं कुवेरगृहं नवव्रतः नूतनव्रतधारी । विघ्नकातरः विघ्नत्रस्तः ॥ ६५ ॥

इति उद्वेगोत्पत्तिर्नाम तृतीयः सर्गः

इति श्री ७ पदवाक्यप्रमाणपारावारीणमहामहोपाध्यायश्रीगोपालचार्यांतेवासिना निगुडकरोपनामकनारायण(दत्तात्रेय)शर्मणा विरचितायां तत्वदीपिकाख्यायां बुद्धचरितसंक्षिप्तव्याख्यायां तृतीयः सर्गः ॥

चतुर्थः सर्गः ।

ततस्तस्मात्पुरोद्यानात्कौतूहलचलेक्षणाः ।
प्रत्युज्जग्मुर्नृपसुतं प्राप्तं वरमिव स्त्रियः ॥ १ ॥

ततः शौद्धोदनेः उद्यानप्राप्त्यनंतरं । कौतूहलेन चले चंचले ईक्षणे नेत्रे यासां ताः । वरोहि प्रत्युद्गमनेन सत्कर्तव्यः इति शास्त्रम् ॥ १ ॥

अभिगम्य च तास्तस्मै । विस्मयोत्फुल्ललोचनाः ॥
चक्रिरे समुदाचारं पद्मकोशनिभैः करैः ॥ २ ॥

अभिगम्येति । विस्मयेन सौंदर्यादिदर्शनजन्याश्चर्येण उत्फुल्लानि विकसितानि लोचनानि नेत्राणि यासां ताः । 'प्रफुल्लोत्फुल्लसंफुल्ल' इत्यमरः । एतादृशः सत्यः

---

१ C वि for नि. २ दीर्घकिं.

अभिगम्य अभिमुखं गत्वा तस्मै शौद्धोदनये पद्मकोशनिभैः कमलकुड्मलसदृशैः करैः समुदाचारं आशीर्वादलाजप्रक्षेपादिकुलपरंपराप्राप्तस्त्रीकर्तृकसदाचारं चक्रिरे कृतवत्यः । तस्मै संप्रदाने चतुर्थी ॥ २ ॥

तस्थुश्च परिवार्यैनं मन्मथाक्षिप्तचेतसः ।
निश्चलैः प्रीतिविकचैः पिबन्त्य इव लोचनैः ॥ ३ ॥

तस्थुरिति । मन्मथेन मदनेन आक्षिप्तं व्याप्तं इति यावत् चेतः यासां एतादृश्यः एनं परिवार्य परितः स्थित्वा प्रीत्या प्रेम्णा विकचैः विकसितैः निश्चलैः लोचनैः पिबन्त्य इव तस्थुः । अनेन तस्य स्त्रीमनोहारित्वं द्योत्यते ॥ ३ ॥

तं हि ता मेनिरे नार्यः । कामो विग्रहवानिति ॥
शोभितं लक्षणैर्दीप्तैः सहजैर्भूषणैरिव ॥ ४ ॥

तं परिवार्य उत्कंठयावलोकने बीजमाह—तमिति । हि यस्मात् ता नार्यः स्त्रियः तं शौद्धोदनिं विग्रहवान् देहवान् काम इति मदन इति सहजैः स्वाभाविकैः दीप्तैः प्रकाशमानैः लक्षणैः भाग्यचिह्नैः भूषणैरिव अलंकारैरिव शोभितं तं । विग्रहवान् काम इति पूर्वेण अन्वयः । मेनिरे ॥ ४ ॥

सौम्यत्वाच्चैव धैर्याच्च । काश्चिदेनं प्रजज्ञिरे ॥
अवतीर्णो महीं साक्षात् । सुधांशुश्चंद्रमा इव ॥ ५ ॥

सौम्यत्वेति । काश्चित् स्त्रियः सौम्यत्वात् शांतत्वात् धैर्यात् गांभीर्यात् च महीं अवतीर्णः प्राप्तः साक्षात् प्रत्यक्षं सुधा अमृतं अंशवः यस्य एतादृशः चन्द्रमा इव विधुरिव एनं प्रजज्ञिरे । अत्रात्मनेपदं चिन्त्यम् ॥ ५ ॥

तस्य ता वपुषाक्षिप्ता । निग्रहीतुं जजृंभिरे ॥
अन्योन्यं दृष्टिभिर्गत्वा । शनैश्च विनिशश्वसुः ॥ ६ ॥

तस्येति । तस्य शौद्धोदनेः वपुषा शरीरेण आक्षिप्ताः आकृष्टाः तद्वपुःसौंदर्यदर्शनेन तद्गतचित्ता इत्यर्थः । निग्रहीतुं निग्रहं कर्तुं जजृंभिरे उत्कंठिताः अन्योन्यं परस्परं दृष्टिभिः गत्वा प्राप्य साक्षात् प्राप्तेरभावात् दृष्टिभिरेव अवलोक्येत्यर्थः । शनैः विनिशश्वसुः निश्वासं त्यक्तवत्यः । साक्षात् तत्प्राप्तेरभावादिति भावः । श्वस् प्राणने लिट् ॥ ६ ॥

एवं ता दृष्टिमात्रेण । नार्यो ददृशुरेव तम् ॥
न व्याजह्रुर्न जहसुः । प्रभावेणास्य यंत्रिताः ॥ ७ ॥

विनिश्वासकारणं स्पष्टयति । एवमिति । ता नार्यः तं दृष्टिमात्रेण ददृशुरेव न तु प्रापुरित्यर्थः । अस्य प्रभावेण यन्त्रिताः सत्यः न व्याजह्रुः न भाषितवत्यः न जहसुः न हसितवत्यः ॥ ७ ॥

तास्तथा तु निरारंभा दृष्ट्वा प्रणयविक्लवाः ॥
पुरोहितसुतो धीमानुदायी वाक्यमब्रवीत् ॥ ८ ॥

ता इति । ताः स्त्रियः तथा पूर्वोक्तप्रकारेण प्रणयेण प्रेम्णा विक्लवाः विह्वलाः एतादृशीरपि निर्गतः आरंभः तन्मनोहरणार्थं कटाक्षप्रेक्षणरूपः याभ्यः । दृष्ट्वा धीमान् । प्रसंगकुशल इति यावत् । उदायीनामकः पुरोहितसुतः वाक्यं वक्ष्यमाणलक्षणमब्रवीत् ॥ ८ ॥

सर्वाः सर्वकलाज्ञाः स्थ । भावग्रहणपण्डिताः ॥
रूपचातुर्यसंपन्नाः स्वगुणैर्मुख्यतां गताः ॥ ९ ॥
शोभयन्त्यो गुणैरेभिरासन्तानुत्तरान्कुरून् ।
कुबेरस्यापि चाक्रीडं किं पुनर्वसुधामिमाम् ॥ १० ॥

तदेवाह—सर्वा इति । सर्वाः यूयमित्यर्थः सर्वकला जानन्तीति तथा स्थ भवथ । इदं क्रियापदं प्रतिवाक्यमन्वेति । भावस्य अभिप्रायस्य ग्रहणं ज्ञानं ज्ञापनं वा तद्विषये पण्डिताः कुशला इति यावत् । रूपेण सौंदर्येण चातुर्येण च संपन्ना दक्षाः स्वगुणैः पुरुषमनोहारित्वादिभिः मुख्यतां प्रधानत्वं सर्वस्त्रीषु इत्यर्थः गताः प्राप्ताः ॥ ९ ॥ १० ॥

शक्ताश्चालयितुं यूयं । वीतरागानृषीनपि ॥
अप्सरोभिश्च कलितान् । ग्रहीतुं विबुधानपि ॥ ११ ॥

शक्ता इति । वीतरागान् गतविषयकप्रेम्णोऽपि । चालयितुं स्वशीलात् भ्रंशयितुम् । अप्सरोभिः कलितान् युक्तान् विबुधानपि देवानपि ग्रहीतुं आक्रष्टुं शक्ताः । अनेन अप्सरोपेक्षयापि कौशलं दर्शितम् ॥ ११ ॥

भावज्ञानेन हावेन । चातुर्याद्रूपसंपदा ॥
स्त्रीणामपि च शक्ताः स्थ । संरागे किं पुनर्नृणाम् ॥ १२ ॥

भावस्य मानसिकविकारस्य रत्यादेः ज्ञानेन हावेन रत्यादिभ्यः जाताः स्त्रीणां विलासादिका हावशब्दवाच्याः । तेन । चातुर्यात् दक्षतया रूपसंपदा सौंदर्यसंपत्त्या । स्त्रीणामपि संरागे प्रेम्णि मनोहरणे इत्यर्थः समर्थाः । नृणां पुरुषाणां किं पुनर्वक्तव्यम् ॥ १२ ॥

कुतस्त्वेवंविधानां वो नियुक्तानां स्वगोचरे ॥
इयमेतादृशी चेष्टा न तुष्टोस्म्यार्जवेन वः ॥ १३ ॥

कुत इति एवंविधानां । दुर्घटमपि कर्तुं शक्तानामित्यर्थः । स्वगोचरे स्वविषये राजपुत्रमनोहरणे इत्यर्थः । नियुक्तानां नियन्त्रितानाम् । इयं एतादृशी पूर्वोक्तप्रकारा चेष्टा व्यापारः तूष्णींभवनमित्यर्थः कुतः अस्तीति शेषः । वः युष्माकं आर्जवेन ऋजुस्वभावेन न तुष्टोऽस्मि न प्रीतोस्मीत्यर्थः । एतन्मनोहरणे यतध्वमिति तात्पर्यम् ॥ १३ ॥

---

१ C ०भिरपितान्. २ C मेव.

इदं नववधूनां वो । ह्रीनिकुंचितचक्षुषाम् ॥
सदृशं चेष्टितं हि स्यादपि वा गोपयोषिताम् ॥ १४ ॥

ऋजुत्वमेवाह—इदमिति । नूतनस्त्रीणां अत एव ह्रीनिकुंचितचक्षुषां लज्जया संकुचितनेत्राणां वः युष्माकं चेष्टितं आचरणं सदृशं हि गोपयोषितां । अपि वा गोपस्त्रीणामिवेत्यर्थः । गोपस्त्रीणां विलासाद्यज्ञानात् युष्माकं तु ज्ञानेऽपि लज्जावशत्वात् समानमाचरितमित्यर्थः ॥ १४ ॥

यद्यपि स्यादयं वीरः । श्रीप्रभावान्महानिति ॥
स्त्रीणामपि महत्तेज इति कार्योऽत्र निश्चयः ॥ १५ ॥

ननु सत्यमेवं स्त्रीणां स्वभावः तथापि महावीरे अस्मिन् अस्माकं प्रयत्नो व्यर्थ एव भवेत् इत्याशङ्क्याह—यद्यपीति । यद्यपि अयं श्रीप्रभावात् महान् इति स्यात् तथापि स्त्रीणामपि तेजो महत् वर्तते इति निश्चयः कार्यः ॥ १५ ॥

पुरा हि काशिसुंदर्या । वेशवध्वा महानृषिः ॥
ताडितोऽभूत् पदन्यासाद्दुर्धर्षो दैवतैरपि ॥ १६ ॥

तदेव दृष्टांतैः स्पष्टयति । पुरेति । हि पुरा काशीराजस्य स्त्रिया वेशवध्वा वेश्यया दैवतैरपि दुर्धर्षः पदन्यासात् ताडितः अभूत् ॥ १६ ॥

***मंथालगौतमो भिक्षुर्जंघया बालमुख्यया ॥**
पिप्रीषुश्च तदर्थार्थं । व्यसून्निरहरत् पुरा ॥ १७ ॥
गौतमं दीर्घतपसं । महर्षिं दीर्घजीवनम् ॥
योषित् संतोषयामास । वर्णस्थानावरा सती ॥ १८ ॥

ऋष्यशृंगं मुनिसुतं । तथैव स्त्रीष्वपण्डितम् ॥
उपायैर्विविधैः शांता जग्राह च जहार च ॥ १९ ॥

ऋष्यशृङ्गमिति । तथैव पूर्वोक्तवदेव शांता एतन्नाम्नी राजकन्या स्त्रीषु अपण्डितं शृङ्गाररसानभिज्ञमित्यर्थः । मुनिसुतं विभाण्डकसुतं ऋष्यशृङ्गं विविधैः उपायैः वारवेश्याप्रेषणाद्युपायैः जहार । तदाश्रमात् हरति स्म । जग्राह परिणिनाय ॥ १९ ॥

विश्वामित्रो महर्षिश्च विगाढोऽपि महत्तपः ॥
दशवर्षाण्यरण्यस्थो घृताच्याप्सरसा हृतः ॥ २० ॥

महत्तपः विगाढः प्रविष्टः कुर्वाण इत्यर्थः दशवर्षाणि इदं असंख्यवर्षाणामुपलक्षणं अरण्यस्थः वनवासी । अनेन महासामर्थ्यमुक्तं । एतादृशः विश्वामित्रनामकः ऋषिरपि घृताच्या एतन्नामकाप्सरसा हृतः स्वाधीनः कृत इत्यर्थः ॥ २० ॥

---

१ J पुरा काशीस्थसुंदर्या.

* Stanzas 17 and 18 have been taken from the Oxford edition.

एवमादीनृषींस्तांस्ताननयन्विक्रियं स्त्रियः ॥
ललितं पूर्ववयसं किं पुनर्नृपतेः सुतम् ॥ २१ ॥

एवमादीन् तान् तान् ऋषीन् विक्रियां विकारं अनयन् । ललितं सुंदरं पूर्ववयसं तरुणं नृपतेः राज्ञः सुतं किं पुनः वक्तव्यम् । वृद्धाः धर्मनिरताः ऋषयोऽपि स्त्रीभिः हृताः तरुणं सुंदरं राजपुत्रं हरेयुः इति किमु वक्तव्यमित्यर्थः ॥ २१ ॥

तदेवं सति विश्रब्धं प्रयतध्वं यथा तथा ॥
इयं नृपस्य वंशश्रीरितो न स्यात्पराङ्मुखी ॥ २२ ॥

प्रकृतेः विधेयमाह—तदेवमिति । विश्रब्धं सविश्वासं भीतिरहितमित्यर्थः । इतः एतस्मात् राजकुमारात् पराङ्मुखी विमुखा न स्यात् । यथा तथा यतध्वमित्यर्थः । एतस्य राज्यवैराग्यं माभूत् तथा कर्तव्यमिति तात्पर्यम् ॥ २२ ॥

या हि काश्चिद्युवतयो हरन्ति सदृशं जनम् ॥
निकृष्टोत्कृष्टयोर्भावं यास्तु गृह्णंति ताः स्त्रियः ॥ २३ ॥

या हीति । काश्चित् या युवतयः ताः सदृशं जनं हरन्ति तासां चातुर्यं न । निकृष्टोत्कृष्टयोः हीनोत्तमयोः याः भावं अभिप्रायं गृह्णंति ता एव स्त्रियः । स्वसदृशजनहरणापेक्षया निकृष्टोत्कृष्टयोर्भावहरणमेव कौशल्यमित्यर्थः ॥ २३ ॥

इत्युदायिवचः श्रुत्वा ता विद्या इव योषितः ॥
समारुरुहुरात्मानं कुमारग्रहणं प्रति ॥ २४ ॥

इतीति । उदायिवचः पुरोहितपुत्रभाषणं विद्या इव चतुर्दश विद्या इव ताः स्त्रियः कुमारग्रहणं प्रति कुमारवशीकरणं प्रति आत्मानं अंतःकरणं समारुरुहुः अंतर्भावितण्यर्थोऽत्र रुहिः ॥ २४ ॥

ता भ्रूभिः प्रेक्षितैर्भावैर्हसितैर्ललितैर्गतैः ॥
चक्रुराक्षेपिकाश्चेष्टा भीतभीता इवांगनाः ॥ २५ ॥

कुमारग्रहणोपायमेव दर्शयति—ता इति । भ्रूभिः भ्रुकुटयुन्नयनैः प्रेक्षितैः कटाक्षावलोकनैः भावैः अभिप्रायसूचकैः कायव्यापारैः हास्यैः सुंदरैः गमनैः भीतभीता इव अतिभीता इवेत्यर्थः अङ्गनाः आक्षेपिकाः तदन्तःकरणहारिणीः चेष्टाः कायव्यापारान् चक्रुः ॥ २५ ॥

राज्ञस्तु विनियोगेन कुमारस्य च मार्दवात् ॥
जहुः क्षिप्रमविश्रंभं मदेन मदनेन च ॥ २६ ॥

राज्ञः विनियोगेन तत्कर्तृकविनियोजनेन कुमारस्य शौद्धोदनेः मार्दवात् मदेन तारुण्यमदेन तारुण्येन च क्षिप्रं झटिति अविश्रम्भं अविश्वासं यथास्यात्तथा जहुः कुमारमनोहरणं चक्रुरित्यर्थः ॥ २६ ॥

---

१ C विक्रियां.

अथ नारीजनवृतः कुमारो व्यचरद्वनम् ॥
वासितायूथसहितः करीव हिमवद्वनम् ॥ २७ ॥

अथेति । वासितायूथसहितः करिणीसमूहसहितः करी हिमवद्वनमिव स्त्रीसमूहवृतः कुमारः वनं व्यचरत् ॥ २७ ॥

स तस्मिन्कानने रम्ये जज्वाल स्त्रीपुरःसरः॥
आक्रीड इव बभ्राजे मरुत्वानप्सरोवृतः ॥ २८ ॥

स इति । स्त्रीपुरःसरः स्त्रीणामग्रेसरः । आक्रीडे उद्याने अप्सरोवृत्तः मरुत्वानिब इंद्र इव बभ्राजे रराज ॥ २८ ॥

मदेनावर्जिता नाम तं काश्चित्तत्र योषितः ॥
कठिनैः पस्पृशुः पीनैः संघट्टैर्वल्गुभिः स्तनैः ॥ २९ ॥

मदेनेति । मदेन यौवनगर्वेण आवर्जिताः युक्ताः काश्चित् योषितः स्त्रियः तं पीनैः पुष्टैः ॥ २९ ॥

स्रस्तांसकोमलालम्बमृदुबाहुलताबला ॥
अनृतं स्खलितं काचित्कृत्वैनं सस्वजे बलात् ॥ ३० ॥

स्रस्तांस इति । काचित् अबला स्रस्तौ अंसौ यस्याः अत एव कोमलः आलम्बः आश्रयो यस्याः एतादृशी मृद्वी बाहुलता यस्याः एतादृशी सती अनृतं मिथ्या स्खलितं कृत्वा एनं शौद्धोदनिं बलात् सस्वजे आलिलिंग ॥ ३० ॥

काचित्ताम्राधरोष्ठेन मुखेनासवगंधिना ॥
विनिशश्वास कर्णेऽस्य रहस्यं श्रूयतामिति ॥ ३१ ॥

काचिदिति । ताम्रः अधरोष्ठः यस्य तेन । आसवस्य मैरेयस्य गंधः लेशः यस्य तत् आसवगंधि 'अल्पाख्यायां' इकारः समासांतः । तेन मुखेन रहसि एकांते भवं रहस्यं गुप्तं भाषणं श्रूयतां आकर्ण्यतां । श्रुधातोः कर्मणि लोट् । इति एवं प्रकारेण अस्य कर्णे विनिशश्वास श्वासिति स्म ॥ ३१ ॥

काचिदाज्ञापयंतीव प्रोवाचार्द्रानुलेपना ॥
इह भक्तिं कुरुष्वेति हस्तं संश्लिष्य लिप्सया ॥ ३२ ॥
मुहुर्मुहुर्मदव्याजस्रस्तनीलांशुकापरा ॥
आलक्ष्यरसना रेजे स्फुरद्विद्युदिव क्षपा ॥ ३३ ॥

काचिदिति । आर्द्रं सार्द्रं अनुलेपं अंगरागो यस्याः एतादृशी काचित् आज्ञापयंतीव बोधयंतीव हस्तं संश्लिष्य संबध्य प्रोवाच ॥ ३२ ॥ ३३ ॥

काश्चित्कनककांचीभिर्मुखराभिरितस्ततः ॥
बभ्रमुर्दर्शयंत्योऽस्य श्रोण्यः[2] सूक्ष्मांशुकावृताः ॥ ३४ ॥

---

१ C विवस्वान॰. २ C श्रोणीस्तन्वंशु॰.

काश्चिदिति । अस्य शौद्धोदनेः तनुना अल्पेन मृदुलेनेति यावत् अंशुकेन आवृताः वेष्टिताः श्रोणीः कटीः दर्शयंत्यः काश्चित् स्त्रियः इतस्ततो बभ्रमुः ॥३४॥

चूतशाखां कुसुमितां प्रगृह्यान्या ललम्बिरे ॥
सुवर्णकलशप्रख्यान् दर्शयन्त्यः पयोधरान् ॥ ३५ ॥

चूतशाखामिति । कुसुमानि पुष्पाणि संजातानि यस्यां सा । तारकादित्वादितच् । चूतशाखां आम्रशिफां प्रगृह्य सुवर्णकलशान् प्रचक्षते तिरस्कुर्वंति इति तथा । धातूनामनेकार्थत्वात् अतोऽनुपसर्गे इति क प्रत्ययः । तान् पयोधरान् । गंगाधरादिवत् अच् प्रत्ययः ।स्तनान् दर्शयंत्यः अन्याः काश्चित् ललम्बिरे आश्रितवत्यः ॥३५॥

काचित्पद्मवनादेत्य सपद्मा पद्मलोचना ॥
पद्मवक्त्रस्य पार्श्वेऽस्य पद्मश्रीरिव तस्थुषी[1] ॥ ३६ ॥

काचित् इति । पद्मवनात् पद्मसमूहात् कमलाकरादिति यावत् सपद्मा पद्महस्तेति यावत् पद्मलोचना कमलनेत्रा काचिदेत्य पद्मवक्त्रस्य कमलमुखस्य अस्य शौद्धोदनेः पार्श्वभागे पद्मश्रीरिव कमलस्थलक्ष्मीरिवेत्यर्थः । तस्थुषी स्थितवती ॥३६॥

मधुरं गीतमन्वर्थं काचित्साभिनयं जगौ ॥
तं स्वस्थं प्रेरयन्तीव[2] वंचितोऽसीत्यवेक्षितैः ॥ ३७ ॥

मधुरमिति । स्वस्थं शृङ्गाराऽप्रवृत्तं ते अवेक्षितैः अवलोकनैः वंचितोऽसि प्रलंभितोसि इति प्रेरयंतीव चोदयंतीव काचित् मधुरं अन्वर्थं अर्थानुगतं साभिनयं अभिनयसहितं गीतं जगौ ॥ ३७ ॥

प्रफुल्ल[3]वदनेनान्या भ्रूकार्मुकविकर्षिणा ॥
प्रवृत्यानुचकारास्य चेष्टितं वीरलीलया ॥ ३८ ॥

शुभेनेति । अन्या स्त्री शुभेन सुंदरेण भ्रुवावेव कार्मुके धनुषी ते विकर्षति तच्छीलं तेन वदनेन प्रावृत्य प्रवृत्तिं कृत्वा अस्य चेष्टितं वीरलीलया अनुचकार ॥ ३८ ॥

पीनवल्गुस्तनी काचिल्लीलाचंचलकुंडला[4] ॥
उच्चैरवजहासैनं समाप्नोतु भवानिति ॥ ३९ ॥

पीनेति । पीनौ पुष्टौ वल्गू सुंदरौ स्तनौ यस्याः स्वांगाच्चोपसर्जनादितिङीष् । वातेन आघूर्णिते भ्रमिते कुंडले कर्णभूषणे यस्याः एतादृशी काचित् भवान् समाप्नोतु संप्राप्नोतु इति एनं उच्चैः अवजहास ॥ ३९ ॥

अपयान्तं तथैवान्या बबंधुर्माल्यदामभिः ॥
काश्चित्साक्षेप[5]मधुरैर्जगृहुर्वचनांकुशैः ॥ ४० ॥

---

१ J तेदुषी. २ C चोदयन्तीव. ३ C शुभेन for प्रफुल्ल. ४ C ०चिद्वाताघूर्णित कुं०. ५ J ०पं for ०प.

अपेति। तथैव पूर्ववदेव अपयांतं अपगच्छंतं अन्याः माल्यदामभिः बबंधुः। काश्चित् आक्षेपेण आशयविशेषेण मधुरैः साशयैरित्यर्थः वचनान्येव अंकुशाः सृणयः तैः जगृहुः। चाटु वाक्यानि उच्चारयामासुरित्यर्थः ॥ ४० ॥

प्रतियोगार्थिनी काचिद्गृहीत्वा चूतवल्लरीम् ॥
इदमस्त्रं तु कस्येति पप्रच्छ मदविक्लवा ॥ ४१ ॥

प्रतियोगेति। प्रतियोगः संबंधः स एवार्थो अस्याः तेन सह रंतुं इच्छन्तीत्यर्थः मदेन विक्लवा विव्हला काचित् चूतवल्लरीं गृहीत्वा इदं पुष्पं तु कस्येति पप्रच्छ ॥ ४१ ॥

काचित्पुरुषवत्कृत्वा गतिं संस्थानमेव च ॥
उवाचैनं जितः स्त्रीभिर्जय भोः पृथिवीमिमाम् ॥ ४२ ॥

काचित् पुरुषवत् गतिं गमनं संस्थानं संस्थितिं कृत्वा पुरुषवत् गत्वा पुरुषवत् स्थित्वेत्यर्थः। भोः स्त्रीभिः जितः त्वं इमां पृथिवीं जय इति एनं उवाच ॥ ४२ ॥

अथ लोलेक्षणा काचिज्जिघ्रंती नीलमुत्पलम् ॥
किंचिन्मदकलैर्वाक्यैर्नृपात्मजमभाषत ॥ ४३ ॥

अथेति। लोलेक्षणा चंचलनेत्रा नीलं उत्पलं कमलं जिघ्रन्ती काचित् मदकलैः वाक्यैः नृपात्मजं किंचित् अभाषत ॥ ४३ ॥

पश्य भर्तश्चितं चूतं कुसुमैर्मधुगंधिभिः ॥
हेमपंजररुद्धो वा कोकिलो यत्र कूजति ॥ ४४ ॥

अभाषतेत्युक्तं तदाह–पश्येति। हे भर्तः मधुनः गंधो लेशो येषां तानि। समासांत इकारः। तैः कुसुमैः पुष्पैः चितं व्याप्तं चूतं आम्रं पश्य। यत्र हेमपंजररुद्ध इव कोकिलः पिकः कूजति अव्यक्तशब्दं करोति। 'वास्याद्विकल्पोपमयो' इति मेदिनी ॥ ४४ ॥

अशोको दृश्यतामेष कामिशोकविवर्धनः ॥
रुवंति भ्रमरा यत्र दह्यमाना इवाग्निना ॥ ४५ ॥

अशोकेति। कामिनां कामुकानां शोकविवर्धनः एषः पुरोवर्ती अशोकः वंजुलः दृश्यतां अवलोक्यतां। यत्र अशोके भ्रमराः भृंगाः अग्निना दह्यमाना इव रुवंति। अशोकपुष्पाणां ताम्रवर्णत्वात् अग्नितुल्यत्वम् ॥ ४५ ॥

चूतयष्ट्या समाश्लिष्टो दृश्यतां तिलकद्रुमः ॥
शुक्लवासा इव नरः स्त्रिया पीतांगरागया ॥ ४६ ॥

चूतेति। शुक्लवासाः नरः पीतांगरागया स्त्रिया इव चूतयष्ट्या आम्रयष्ट्या समाश्लिष्टः तिलकद्रुमः दृश्यताम् ॥ ४६ ॥

---

१ C इदं पुष्पं तु. २ J मा for भोः.

फुल्लं कुरवकं पश्य निर्मुक्तालक्तकप्रभम् ॥
यो नखप्रभया स्त्रीणां निर्भर्त्सित इवानतः ॥ ४७ ॥

फुल्लमिति । यः स्त्रीणां नखप्रभया नखरकांत्या निर्भर्त्सितः तिरस्कृतः अत एव आनत इव नम्र इव अस्तीति शेषः एतादृशं निर्मुक्तकः बहिर्निसृतः अलक्तक इव प्रभा यस्य तं फुल्लं कुरवकं पश्य ॥ ४७ ॥

बालाशोकश्च निचितो दृश्यतामेष पल्लवैः ॥
योऽस्माकं हस्तशोभाभिर्लज्जमान इव स्थितः ॥ ४८ ॥

बालेति । यः अस्माकं हस्तशोभाभिः लज्जमान इव स्थितः हस्तानां आरक्तत्वादेवमुक्तिः । सः पल्लवैः निचितः व्याप्तः एषः बालाशोकः दृश्यताम् ॥ ४८ ॥

दीर्घिकां प्रावृतां पश्य तीरजैः सिंदुवारकैः ॥
पांडरांशुकसंवीतां शयानां प्रमदामिव ॥ ४९ ॥

दीर्घिकामिति । तीरजैः तीरस्थितैः सिंदुवारकैः निर्गुंडीवृक्षैः प्रावृतां वेष्टितां दीर्घिकां वापीं पाण्डुरेण शुभ्रेण अंशुकेन वस्त्रेण संवीतां वेष्टितां शयानां प्रमदामिव स्त्रियामिव पश्य ॥ ४९ ॥

दृश्यतां स्त्रीषु माहात्म्यं चक्रवाको ह्यसौ जले ॥
पृष्ठतः प्रेष्यवद्भार्यामनुवृत्यानुगच्छति ॥ ५० ॥

दृश्यतामिति । स्त्रीषु माहात्म्यं महत्वं दृश्यतां । हि यतः असौ चक्रवाकः कोकः जले उदके प्रैष्यवत् भृत्यवत् भार्यां स्त्रियं अनुवृत्य अनुवर्तनं कृत्वा पृष्ठतः अनुगच्छति पश्चाद्गच्छति । पुरुषा अपि एवं सेवंते इदमेव स्त्रीषु माहात्म्यमित्यर्थः ॥ ५० ॥

मत्तस्य परपुष्टस्य रुवतः श्रूयतां ध्वनिः ॥
अपरः कोकिलोऽनुत्कः प्रतिश्रुत्येव कूजति ॥ ५१ ॥

मत्तेति । परपुष्टस्य परभृतः रुवतः शब्दं कुर्वाणस्य ध्वनिः श्रूयतां अनुत्कः अनुकंठितः अपरः अन्यः कोकिलः प्रतिश्रुत्येव प्रतिध्वनिनेव कूजति शब्दं करोति ॥ ५१ ॥

अपिनाम विहंगानां वसंतेनाहितो मदः ॥
न तु चिंतयतश्चित्ते[1] जनस्य प्राज्ञमानिनः ॥ ५२ ॥

अपीति । विहंगानां पक्षिणां चित्ते वसंतेन मदः आहितः अपिनाम आहितः किम् । प्राज्ञमानिनः आत्मानं प्राज्ञं मानिनः चिंतयतः जनस्य भवादृशस्येत्याकूतं चित्ते अंतःकरणे न तु आहितः इत्याश्चर्यम् ॥ ५२ ॥

१ C चित्तं.

इत्येवं ता युवतयो मन्मथोद्दामचेतसः ॥
कुमारं विविधैस्तैस्तैरुपचक्रमिरे नयैः ॥ ५३ ॥

स्त्रीणां भाषणमुपसंहरति—इत्येवमिति । इत्येवं पूर्वोक्तप्रकारेण मन्मथेन मदनेन उद्दामं उद्धवं चेतः अंतःकरणं यासां ताः एतादृश्यः ताः युवतयः तैः तैः विविधैः नयैः कुमारं उपचक्रमिरे । अनुकूलयितुमिति शेषः ॥ ५३ ॥

एवमाक्षिप्यमाणोऽपि स तु धैर्यावृतेन्द्रियः ॥
मर्तव्यमिति सोद्वेगो न जहर्ष न सिष्मिये[1] ॥ ५४ ॥

एवमिति । एवं आक्षिप्यमाणोऽपि तिरस्क्रियमाणोपीत्यर्थः धैर्येण आवृतानि इंद्रियाणि येन एतादृशः स तु मर्तव्यं इति हेतोः सोद्वेगः न जहर्ष न ननंद । न सिष्मिये न हसितवान् ॥ ५४ ॥

तासां तत्वेऽनवस्थानं[2] दृष्ट्वा स पुरुषोत्तमः ॥
ससंविग्नेन धीरेण चिंतयामास चेतसा ॥ ५५ ॥

तासामिति । पुरुषोत्तमः पुरुषश्रेष्ठः सः शौद्धोदनिः तासां तत्वे अनवस्थानं अनवस्थितिं दृष्ट्वा स संविग्नेन अपि धीरेण गंभीरेण चेतसा चिंतयामास ॥५५॥

किंवेमा[3] नावगच्छन्ति चपलं यौवनं स्त्रियः ॥
यतो रूपेण संपन्नं जरेयं नाशयिष्यति ॥ ५६ ॥

चिंतामेवाह--किमिति । इमाः स्त्रियः यौवनं तारुण्यं चपलं अस्थिरं इति नावगच्छन्ति किं वा न जानन्ति किम् । कुतोऽयं तर्क इत्यत आह—यतः कारणात् रूपेण सौंदर्येण संपन्नं युक्तं अर्थाच्छरीरं इयं जरा नाशयिष्यति । अवश्यभावित्वात् जरायां सन्निकृष्टत्वमारोप्य इयमिति निर्देशः ॥ ५६ ॥

नूनमेता न पश्यन्ति कस्यचिद्रोगसंप्लवम् ॥
तथा हृष्टा भयं त्यक्त्वा जगति व्याधिधर्मिणि ॥ ५७ ॥

नूनमिति । एताः कस्यचित् कस्यापीत्यर्थः । रोगेण ज्वरादिना संप्लवः नाशः तं नूनं न पश्यंति । कुत इति चेत्तत्राह—तथेति व्याधिधर्मिणि व्याधयः धर्माः स्वभावा यस्य 'धर्मादनिच् केवलात्' इति समासांतोऽनिच् प्रत्ययः । एतादृशे जगति भयं व्याध्यादिभयं त्यक्त्वा हृष्टाः वर्तन्ते इति शेषः ॥ ५७ ॥

अनभिज्ञाश्च सुव्यक्तं मृत्योः सर्वापहारिणः ॥
तथा स्वस्था निरुद्वेगाः क्रीडन्ति च हसन्ति च ॥ ५८ ॥

अनभिज्ञा इति । सर्वापहारिणः सर्वापहरणशीलस्य मृत्योः अंतकस्य अनभिज्ञाः अज्ञाः इति सुव्यक्तं स्पष्टमेवेत्यर्थः कुत इति चेत् तत्राह—तथामृत्युज्ञान

---

१ C सिस्मिये. २ C तत्वेन वस्थानं. ३ किं विना नाव०.

रहितवत् स्वस्थाः मनश्चांचल्यरहिताः निरुद्वेगाः उद्वेगरहिताः क्रीडंति च हसन्ति च । मृत्युज्ञाने इदमसंभवीति भावः ॥ ५८ ॥

जरां मृत्युं च रोगं च कोहि जानन् सचेतनः
स्वस्थस्तिष्ठन्निषीदेद्वा स्वप्याद्वा किं पुनर्हसेत् ॥ ५९ ॥

सर्व विचार्य उपहसति—जरामिति । सचेतनः सज्ञानः । स्पष्टमन्यत् ॥५९॥

यस्तु दृष्ट्वा परं जीर्णं व्याधितं मृतमेव च ॥
स्वस्थो भवति नोद्विग्नो यथाऽचेतास्तथैव सः ॥ ६० ॥

यास्त्विति । जीर्णं वृद्धम् । अचेता अचेतनः ॥ ६० ॥

वियुज्यमानेऽपि तरौ पुष्पैरपि फलैरपि ॥
पतति च्छिद्यमाने वा तरुरन्यो न शोचते ॥ ६१ ॥

वियुज्योति । पुष्पैः फलैरपि वियुज्यमानेऽपि तरौ वृक्षे पतितं विद्यमाने सति अन्यः तरुः न शोचते । तद्वत् देहात्मनो स्थितिरित्यर्थः ॥ ६१ ॥

इति ध्यानपरं दृष्ट्वा[1] विषयेभ्यो गतस्पृहम् ॥
उदायी नीतिशास्त्रज्ञस्तमुवाच सुहृत्तया ॥ ६२ ॥

उदायी पुरोहितपुत्रः । सुहृत्तया मित्रत्वेन ॥ ६२ ॥

अहं नृपतिना दत्तः सखा तुभ्यं क्षमः किल ॥
तस्मात्[2]त्वयि विवक्षा मे तया प्रणयवत्तया ॥ ६३ ॥

नृपतिना तुभ्यं अहं क्षमः हितः सखा दत्तः तस्मात् त्वयि त्वद्विषये प्रणयवत्तया प्रेम्णा मे विवक्षा वक्तुमिच्छा ॥ ६३ ॥

अहितात् प्रतिषेधश्च हिते चाप्यनुप्रवर्तनम् ॥
व्यसने चापरित्यागस्त्रिविधं मित्रलक्षणम् ॥ ६४ ॥

क्षम शब्दस्य हितत्वं उक्तं तत्र हितं भेदमाह—अहितात् इति । अहितात् प्रतिषेधः हिते हिताचरणे अनुप्रवर्तनं व्यसने दुःखे च परित्यागः एतत्तिस्रः विधा प्रकारो यस्य मित्रेण एतत्क्रियात्रयं विधेयमित्यर्थः ॥ ६४ ॥

सोऽहं मैत्रीं प्रतिज्ञाय पुरुषार्थात्पराङ्मुखम् ॥
यदि त्वां समुपेक्षेयं[3] न भवेन्मित्रता मयि ॥ ६५ ॥

सोहमिति । सोहं मित्रभूतोऽहं मैत्री मित्रतां प्रतिज्ञाय ऊरीकृत्येत्यर्थः पुरुषार्थात् कामरूपतृतीयपुरुषार्थात् पराङ्मुखं विमुखं त्वां यदि समुपेक्षेयं तर्हि मयि मित्रता न भवेत् ॥ ६५ ॥

तद्ब्रवीमि सुहृद्भूत्वा तरुणस्य वपुष्मतः ॥
इदं न प्रतिरूपन्ते स्त्रीष्वदाक्षिण्यमीदृशम् ॥ ६६ ॥

---

१ J ष्ट्वे for ष्ट्व. २ C यस्मा०. ३ C ०क्षेयं.

तादिति । तत् तस्मात् कारणात् सुहृद्भूत्वा मित्रीभूय वपुष्मतः उत्तमशरीरस्य तरुणस्य ते तव अदाक्षिण्यं अनुकूलवर्तित्वाभावः स्त्रीषु प्रतिरूपं योग्यं न ॥६६॥

अनृतेनापि नारीणां युक्तं समनुवर्तनम् ॥
तद्व्रीडापरिहारार्थमात्मरत्यर्थमेव च ॥ ६७ ॥

स्त्रीषु दाक्षिण्यं अननुरूपमित्युक्तमत आह—अनृतेनापीति । तासां व्रीडा लज्जा तस्याः परिहारार्थं आत्मरत्यर्थं स्वरत्यर्थं च नारीणां अनृतेनापि समनुवर्तनं सम्यगनुकूलनं युक्तं योग्यमित्यर्थः ॥ ६७ ॥

सन्नतिश्चानुवृत्तिश्च स्त्रीणां हृदयबन्धनम् ॥
स्नेहस्य हि गुणा योनिर्मानकामाश्च योषितः ॥ ६८ ॥

सन्नतिरिति । सन्नतिः नम्रता अनुवृत्तिः अनुकूलता इत्येतद्द्वयं स्त्रीणां हृदयबंधनं हृदयाकर्षकमित्यर्थः हि यस्मात् कारणात् गुणाः मानादयः स्नेहस्य प्रेम्णः योनिः कारणं योषितः स्त्रियः मानकामाः सत्कारकामुकाः अतः स्त्रीणामनुकूलं युक्तमित्यर्थः ॥ ६८ ॥

तदर्हसि विशालाक्ष हृदयेऽपि पराङ्मुखे ॥
रूपस्यास्यानुरूपेण दाक्षिण्येनानुवर्तितुम् ॥ ६९ ॥

उक्तं निगमयति तदिति । तत् स्त्रीणामनुवर्तनस्य युक्तत्वात् हृदये अंतःकरणे पराङ्मुखेऽपि विमुखेऽपि अर्थात् स्त्रीणामित्यर्थः अस्य रूपस्य सौंदर्यस्य अनुकूलत्वे न स्थातुं अर्हसि ॥ ६९ ॥

दाक्षिण्यमौषधं स्त्रीणां दाक्षिण्यं भूषणं परम् ॥
दाक्षिण्यरहितं रूपं निष्पुष्पमिव काननम् ॥ ७० ॥

दाक्षिण्यमिति । स्पष्टार्थः ॥ ७० ॥

किंवा दाक्षिण्यमात्रेण भावेनास्तु परिग्रहः ॥
विषयान् दुर्लभाल्लँब्ध्वा न ह्यवज्ञातुमर्हसि ॥ ७१ ॥

न केवलं दाक्षिण्यमेवोपयुक्तं किंतु अभिप्रायोप्युपयुज्यते इत्याह—किंवेति दाक्षिण्यमात्रेण केवलदाक्षिण्येनेत्यर्थः किंवा को वा उपयोग इत्यर्थः भावेन अभिप्रायविशेषेण परिग्रहः स्वीकृतिः अर्थात् स्त्रीणां तदेवाह विषयानिति स्पष्टमेतत् ॥ ७१ ॥

कामं परमिति ज्ञात्वा देवोऽपि हि पुरंदरः ॥
गौतमस्य मुनेः पत्नीमहल्यां चकमे पुरा ॥ ७२ ॥

काममिति । कामं मदनं परं श्रेष्ठं अन्यत् स्पष्टम् ॥ ७२ ॥

अगस्त्यः प्रार्थयामास सोमभार्यां च रोहिणीम् ॥
तस्मात्तत्सदृशं लेभे लोपामुद्रामिति श्रुतिः ॥ ७३ ॥

अगस्त्य इति । तत्सदृशं रोहिणीसदृशीं लोपामुद्रां एतन्नामिकां स्त्रियम् । इयं कथा पुराणांतरे गवेषणीया ॥ ७३ ॥

उतथ्यस्य च भार्यायां ममतायां महातपाः ॥
मारुत्यां जनयामास भरद्वाजं बृहस्पतिः ॥ ७४ ॥

उतथ्यस्येति । मारुत्यां वायुपुत्र्यां ममतायां एतन्नामिकायां । अन्यत् स्पष्टम् । इयं कथा श्रीमद्भागवते नवमस्कंधे ॥ ७४ ॥

बृहस्पतेर्महिष्यां च तारायां कामुको वरः ॥
बुधं विबुधधर्माणं जनयामास चंद्रमाः ॥ ७५ ॥

बृहस्पतेरिति । वरः श्रेष्ठः कामुकः अभिलाषुकः चंद्रमाः विबुधानां पण्डितानां धर्माः यस्मिन् विद्वद्धर्माणमित्यर्थः देवधर्माणामिति वा । इयमपि कथा नवमस्कंधे ॥ ७५ ॥

कालीं चैव पुरा कन्यां जलप्रभवसंभवाम् ॥
जगाम यमुनातीरे जातरागः पराशरः ॥ ७६ ॥

कालीमिति । पुरा पूर्वं जलप्रभवो मत्स्यः तस्मात् संभवो यस्याः सा कालीं कृष्णवर्णां अर्थात् सत्यवतीं यमुनातीरे कालिंदीतीरे जातरागः उत्पन्नानुरागः पराशरः ऋषिविशेषः जगाम संगतवान् इत्यर्थः । इयं कथा देवीभागवते भारतादौ च ॥ ७६ ॥

मातंग्यामक्षमालायां गर्हितायां रिरंसयाम् ॥
कपिंजलादं तनयं वसिष्ठोऽजनयन्मुनिः ॥ ७७ ॥

मातंग्यामिति । मातंग्यां मातंगकन्यायां अक्षमालानाम्न्यां गर्हितायां निंद्यायां- रिरंसया रंतुं इच्छया कपिं जलादं एतन्नामानम् । इयं कथा पुराणांतरे द्रष्टव्या ॥ ७७ ॥

ययातिश्चैव राजर्षिर्वयस्यपि विनिर्गते ॥
विश्वाच्याप्सरसा सार्धं रेमे चैत्ररथे वने ॥ ७८ ॥

ययातिरिति । ययातिः एतन्नामकः वयसि विनिर्गतेपि वृद्धत्वेपीत्यर्थः विश्वाच्या एतन्नाम्न्या । चैत्ररथे एतन्नामके कुबेरोद्याने ॥ ७८ ॥

स्त्रीसंसर्गं विनाशांतं पांडुर्ज्ञात्वापि कौरवः ॥
माद्रीरूपगुणाक्षिप्तः सिषेवे कामजं सुखम् ॥ ७९ ॥

स्त्रीसंसेति । कौरवः कुरुकुलोत्पन्नः पांडुः स्त्रीसंसर्गं स्त्रीसंबंधं विनाशः अंते अवसाने यस्य एतादृशं ज्ञात्वापि माद्याः रूपगुणैः आक्षिप्तः सन् कामजं सुखं सिषेवे । इयं कथा भारते आदिपर्वणि द्रष्टव्या ॥ ७९ ॥

---

१ C औ for उ. २ C जुह्वत्यां जुह्वतां वरः.

करालजनकश्चैव हृत्वा ब्राह्मणकन्यकाम् ॥
अवाप भ्रंशमप्येव न तु तत्याज मन्मथम् ॥ ८० ॥

करालेति । इयमपि कथा पुराणांतरे गवेषणीया ॥ ८० ॥

एवमाद्या महात्मानो विषयान् गर्हितानपि ॥
रतिहेतोर्बुभुजिरे प्रागेव गुणसंहितान् ॥ ८१ ॥

एवमिति । एवं आद्याः मुख्याः येषां ते तथा रतिहेतोः रत्यर्थं प्रागेव सेवनात्पूर्वमेव गुणसंहितान् गुणयुक्तान् अर्थात् परिणामदुष्टान् इत्यर्थः ॥ ८१ ॥

तं पुनर्न्यायतः प्राप्तान् बलवान् रूपवान् युवा ॥
विषयानवजानासि यत्र सक्तमिदं जगत् ॥ ८२ ॥

उक्तदृष्टांतेभ्यः त्वयि वैलक्षण्यमित्याह—त्वमिति । न्यायतः नीत्या प्राप्तान् आगतान् । अवजानासि तिरस्करोषि यत्र येषु विषयेषु इदं जगत् सक्तं तान् न्यायतः इत्यादि संबंधः इदं विशेषद्योतकेन पुनरित्यनेन सूच्यते ॥ ८२ ॥

इति श्रुत्वा वचस्तस्य श्लक्ष्णमागमसंहितम् ॥
मेघस्तनितनिर्घोषः कुमारः प्रत्यभाषत ॥ ८३ ॥

इतीति । श्लक्ष्णं मृदु आगमाः प्रमाणानि तैः संहितं युक्तं सप्रमाणमित्यर्थः ॥ ८३ ॥

उपपन्नमिदं वाक्यं सौहार्दव्यंजकं त्वयि ॥
अत्र च त्वानुनेष्यामि यत्र मा दुष्टु मन्यसे ॥ ८४ ॥

उपपन्नमिति । सुहृदो भावः सौहार्दं मैत्री तद्व्यंजकं सूचकं यत्र येषु विषयेषु मा दुष्टु मन्यसे विषयरमणं समीचीनं मन्यसे इत्यर्थः मा शब्दो निषेधार्थः अत्र एतद्विषये त्वां अनुनेष्यामि सांत्वयामि ॥ ८४ ॥

नावजानामि विषयान् जाने लोकं तदात्मकम् ॥
अनित्यं तु जगन्मत्वा नात्र मे रमते मनः ॥ ८५ ॥

नेति । विषयान् नावजानामि न तिरस्करोमि लोकं तदात्मकं विषयाभिलाषुकमित्यर्थः किमर्थं तर्हि विषयांस्तिरस्करोषि अत आह अनित्यमित्यादिना । जगतः अनित्यत्वादेव न तत्र रतिः न त्वज्ञानादिति तात्पर्यम् ॥ ८५ ॥

जरा व्याधिश्च मृत्युश्च यदि न स्यादिदं त्रयम् ॥
ममापि हि मनोज्ञेषु विषयेषु रतिर्भवेत् ॥ ८६ ॥

जरेति । स्पष्टार्थः ॥ ८६ ॥

नित्यं यद्यपि हि स्त्रीणामेतदेव वपुर्भवेत् ॥
ससंवित्कस्य कामेषु तथापि न रतिः क्षमा ॥ ८७ ॥

१ 0 त्यजेच्च म०.

नित्यमिति । स्त्रीणां यद्यपि एतद्वपुः नित्यं भवेत् तथापि ससंवित्कस्य प्रेक्षावतः पुरुषस्य । 'प्रेक्षोपलब्धिः स्त्री संवित्' इत्यमरः । कामेषु विषयेषु रतिः प्रेमा क्षमा योग्या न भवेत् ॥ ८७ ॥

यदा तु जरया पीतं रूपमासां भविष्यति ॥
आत्मनोऽप्यनभिप्रेतं मोहात्तत्र रतिर्भवेत् ॥ ८८ ॥

न रतिः क्षमा इत्युक्तं तत्र हेतुमाह—यदेति । आसां रूपं जरया अपीतं युक्तमित्यर्थः यदा भविष्यति । आत्मनः अपि स्वस्यापि अनभिप्रेतं अनिष्टं एवं सति तत्र रतिः रमणं मोहात् भवेत् ॥ ८८ ॥

मृत्युव्याधिजराधर्मो मृत्युव्याधिजरात्मभिः ॥
रममाणोऽप्यसंविग्नः समानो मृगपक्षिभिः ॥ ८९ ॥

मृत्व्यिति । मृत्युः मरणं व्याधिः ज्वरादिः जरा च धर्मा यस्य । अत्र 'धर्मादनिच् केवलात्' इत्यनिच् प्रत्ययो न केवलस्य पूर्वपदस्याभावात् । मृत्युव्याधिजरात्मभिः मृत्युव्याधिजरास्वभावाभिः अर्थात् स्त्रीभिः रममाणः अपि असंविग्नः अनुद्विग्नः पुरुषः मृगपक्षिभिः समानः पशुतुल्य इत्यर्थः ॥ ८९ ॥

यद्यप्यात्थ[1] महात्मानस्तेऽपि कामात्मका इति ॥
संवेगोऽत्र न कर्तव्यो यतस्[2]तेषामपि क्षयः ॥ ९० ॥

महात्मनां दृष्टांतीकरणमपि विफलमित्याह यादिति । ते महात्मानोपि कामात्मकाः इति यदपि आत्थ अत्र एतद्विषये संवेगः त्वरा महात्मानोपि स्त्रीणां अनुकूला आसन् इत्यविचाररूपत्वरेत्यर्थः न कर्तव्यः । कुत इत्यत आह—यत इति यतः यस्मात् तेषामपि महात्मनामपि क्षयः नाशः अस्ति ॥ ९० ॥

माहात्म्यं न च तन्मध्ये यत्र सामान्यतः क्षयः ॥
विषयेषु प्रसक्तिर्वा युक्तिर्वा नात्मवित्तया[3] ॥ ९१ ॥

माहात्म्यमिति । यत्र विषयेषु सामान्यतः साधारण्येन । सर्वसाधारणइत्यर्थः । क्षयः नाशः अस्ति तन्मध्ये विषयमध्ये माहात्म्यं श्रैष्ठ्यं नास्ति एतादृशेषु विषयेषु प्रसक्तिः आसक्तिः युक्तिः योगः संबंधः इत्युभयं नास्तीत्यर्थः । कुत इत्यपेक्षायामाह—आत्मवित्तयेति आत्मज्ञानवत्तया विषयवैमुख्यादिति भावः ॥ ९१ ॥

यद्यप्यात्थानृतेनापि स्त्रीजने वर्ततामिति ॥
अनृतं नावगच्छामि दाक्षिण्येनापि किंचन ॥ ९२ ॥

यद्यपीति । अनृतेनापि स्त्रीजने वर्त्यतामिति यद्यपि आत्थ तथापि दाक्षिण्येनापि किंचन अनृतं नावगच्छामि न जानामि ॥ ९२ ॥

१ J यद्यप्याहुर्म०. २ C यदा ते०.—३ C ०त्मवत्त०.

न चानुवर्तनं तन्मे रुचितं यत्र नार्जवम् ॥
सर्वभावेन संपर्को यदि नास्ति धिगस्तु तत् ॥ ९३ ॥

अनृतं कथमपि न रोचते इत्याह—न चेति । यत्र आर्जवं ऋजुत्वं नास्ति एतादृशं अनुवर्तनं मे न रुचितं । तदेव द्रढयति । सर्वभावेन बाह्यांतररूपेण संपर्कः संबंधः यदि नास्ति तर्हि तत् दाक्षिण्यं धिक् यदि प्रेमचिकीर्षितं तर्हि अंतःकरणपूर्वकमेव नोचेद्व्यर्थमिति तात्पर्थम् ॥ ९३ ॥

अनृते श्रद्दधानस्य सक्तस्यादोषदर्शिनः ॥
किं हि वंचयितव्यं स्याज्जातरागस्य चेतसः ॥ ९४ ॥

अनृते श्रद्दधानस्य विश्वासं कुर्वतः सक्तस्य दोषान् न पश्यतः जातरागस्य उत्पन्नानुरागस्य चेतसः वंचयितव्यं प्रलब्धव्यं किं हि स्यात् यत्र प्रेम तत्र वंचनं अयुक्तमित्यर्थः । अतः अन्तःकरणपूर्वकमेव प्रेम कर्तव्यमिति तात्पर्यम् ॥ ९४ ॥

वंचयंति च यद्येवम् जातरागाः परस्परम् ॥
ननु नैव क्षमं[२] द्रष्टुं नराः स्त्रीणां नृणां स्त्रियः ॥ ९५ ॥

वंचयंतीति । जातरागाः परस्परं यद्येवं वंचयंति तर्हि । ननु इति आमंत्रणे । अहो इत्यर्थः । नराः स्त्रीणां च स्त्रियः नृणां द्रष्टुं नैव क्षमम् ॥ ९५ ॥

तदेवं सति दुःखार्तं जरामरणभोगिनम्[३] ॥
न मां कामेष्वनार्येषु प्रतारयितुमर्हसि ॥ ९६ ॥

उक्तं निगमयति—तदिति । तत् एवं सति दुःखेन आर्तं पीडितं जरामरणे भुनक्ति सः जरामरणभोगी तं मां अनार्येषु दुष्टेषु कामेषु प्रतारयितुं वंचयितुं न अर्हसि ॥ ९६ ॥

[४]अहो सुधीरं बलवच्च ते मन-
श्चलेषु कामेषु च सारदर्शिनः ॥
भयेऽपि तीव्रे विषयेषु सज्जसे ।
निरीक्षमाणो मरणाध्वनि प्रजाः ॥ ९७ ॥

एवं तदुक्तीः संखंड्य तं तिरस्करोति—अहो इति । चलेषु चंचलेषु कामेषु विषयेषु सारदर्शिनः सारमिति मन्यमानस्येत्यर्थः ते मनः बलवत् सुधीरं । अहो इत्याश्चर्ये । मरणाध्वनि मरणमार्गे प्रजाः लोकान् निरीक्षमाणोऽपि तीव्रे भये मरणरूपेऽपि विषयेषु सज्जसे आसक्तो भवसि । अतः ते मनः सुधीरं इत्यादि पूर्वेणान्वयः ॥ ९७ ॥

---

१ C ग्नेव. २ J क्षमा. ३ J ०दर्शिनम्. ४ C अहोऽतिधीरं.

अहं पुनर्भीरुरतीव विक्लवो
जराविपद्व्याधिभयं विचिंतयन् ॥
लभे न शांतिं न धृतिं कुतो रतिं
निशामयन् दीप्तमिवाग्निना जगत् ॥ ९८ ॥

स्वीयस्थितिं वर्णयति । पुनः वैलक्षण्यद्योतकः । त्वदपेक्षया मदीयस्थितिः विलक्षणा तदेवाह—अहमिति । जराविपद्व्याधिभयं विचिंतयन् अतएव अतीव विक्लवः भीरुः अहं अग्निना दीप्तं इव जगत् निशामयन् पश्यन् सन् शांतिं न लभे धृतिं धैर्यं न लभे कुतः रतिम् ॥ ९८ ॥

असंशयं मृत्युरिति प्रजानतो
नरस्य रागो हृदि यस्य जायते ॥
अयोमयीं तस्य परैमि चेतनां
महाभये हृष्यति[1] यो न[2] रोदिति ॥ ९९ ॥

असंशयं निःसंशयं मृत्युः वर्तते इति प्रजानतः यस्य नरस्य हृदि अंतःकरणे रागः प्रेमा जायते तस्य चेतनां अंतःकरणं अयोमयीं लोहमयीं इति परैमि जानामि । हि महाभये यः हृष्यति न रोदिति ॥ ९९ ॥

अथो कुमारश्च विनिश्चयात्मिकां
चकार कामाश्रयघातिनीं कथां ॥
जनस्य चक्षुर्गमनीयमंडलो
महीधरं चास्तमियाय भास्करः ॥ १०० ॥

अथो इति । कुमारः शौद्धोदनिः विनिश्चयात्मिकां कामाश्रयघातिनीं कथां चकार । जनस्य चक्षुषा गमनीयं प्रापणीयं दृश्यमिति यावत् एतादृशं मण्डलं यस्य स भास्करः सूर्यः अस्तं महीधरं अस्ताचलं इयाय जगाम ॥ १०० ॥

ततो वृथाधारितभूषणस्रजः कलागुणैश्च प्रणयैश्च निष्फलैः ॥
स्व एव भावे विनि[3]गृह्य मन्मथं पुरं ययुर्भग्नमनोरथाः स्त्रियः॥१०१॥

तत इति । ततः सूर्यास्तानंतरं वृथा शौद्धोदनेर्वशित्वाभावेन मुधा धारिताः भूषणस्रजः याभिः अतएव भग्नमनोरथाः स्त्रियः निष्फलैः प्रणयैः च कलागुणैः स्वे भावे एव स्वात्मन्येवेत्यर्थः मन्मथं मदनं विनिगृह्य प्रतिसंहृत्येत्यर्थः । पुरं ययुः ॥ १०१ ॥

ततः पुरोद्यानगतां जनश्रियं
निरीक्ष्य सायं प्रतिसंहृतां पुनः ॥

१ C रक्षति. २ J यो न नरो न रोदिति. 3 C निगृह्य०--

अनित्यतां सर्वगतां विचिंतयन्
विवेश धिष्ण्यं क्षितिपालकात्मजः ॥ १०२ ॥

ततः स्त्रीनगरप्राप्त्यनंतरं पुरोद्यानगतां नगराक्रीडस्थितामित्यर्थः । जनश्रियं लोकशोभां पुनः सायं प्रतिसंहृतां नष्टामित्यर्थः । निरीक्ष्य अवलोक्य अतएव सर्वगतां अनित्यतां विचिंतयन् क्षितिपालकात्मजः शौद्धोदनिः धिष्ण्यं स्थानं गृहं वा विवेश ॥ १०२ ॥

ततः श्रुत्वा राजा विषयविमुखं तस्य तु मनो
न शिश्ये तद्रात्रौ हृदयगतशल्यो गज इव ॥
अथ श्रांतो मंत्रे बहुविविधमार्गः ससचिवो
न सोऽन्यत्कामेभ्यो नियमनमपश्यत्सुतमतेः ॥ १०३ ॥

तत इति । ततः कुमारस्य गृहप्राप्त्यनंतरं राजा शुद्धोदनः तस्य कुमारस्य मनस्तु विषयविमुखं कामपराङ्मुखं श्रुत्वा हृदयगतशल्यः गज इव तद्रात्रौ न शिश्ये । अथ ससचिवः बहवः अनेके विविधाः अनेकप्रकाराः मार्गा अवांतरभेदा यस्य एतादृशे मंत्रे श्रांतः सन् सुतमतेः नियमनं कामेभ्यः अन्यत् कामान् विहाय अन्यत् इत्यर्थः । ल्यब्लोपे पंचमी । न अपश्यत् न ज्ञातवान् । कामा एव सुतमतेराकर्षका इति निश्चितवानित्यर्थः ॥ १०३ ॥

पञ्चमः सर्गः ।

स तथा विषयैर्विलोभ्यमानः
परमोहैरपि शाक्यराजसूनुः ॥
न जगाम रतिं न शर्म लेभे
हृदये सिंह इवातिं[2] दिग्धविद्धः ॥ १ ॥

पूर्वस्मिन् सर्गे कामैर्विना सुतमातिनियमनं न शक्यमित्युक्तं तमेव राजप्रयत्नं प्रथयन् शौद्धोदनेर्वृत्तमाह—सेति । स शाक्यराजसूनुः शौद्धोदनिः परमोहैः परेषां मोहजनकैरपि विषयैः तथा पूर्वोक्तप्रकारेण विलोभ्यमानोपि रतिं रागं न जगाम शर्मापि सुखमपि न लेभे हृदये दिग्धेन विषाक्तबाणेन विद्धः सिंह इव रतिमित्यादि पूर्वेणान्वयः ॥ १ ॥

अथ मंत्रिसुतैः क्षमैः कदाचित्
सखिभिश्चित्रकथैः कृतानुयात्रः ॥

---

१ तां रात्रिं. २ H इवातिदिग्धविद्धः.

वनभूमिदिदृक्षया शमेप्सु-
नरदेवानुमतो बहिः प्रतस्थे ॥ २ ॥

अथेति । अथ चित्तास्वास्थ्यानंतरं कदाचित् चित्राः मनोहराः कथा येषां तैः मनोहरभाषणशालिभिरित्यर्थः । क्षमैः हितैः । 'क्षमं शक्ते हिते त्रिषु ' इत्यमरः । सखिभिः मित्रैः मंत्रिसुतैः प्रधानपुत्रैः । कृतानुयात्रः कृतानुगमनः शमेप्सुः शांत्य-भिलाषुकः नरदेवेन पित्रा अनुमतः आज्ञप्तः वनभूमिदिदृक्षया अरण्यभूमिदर्शने-च्छया बहिः प्रतस्थे ॥ २ ॥

नवरुक्मखलीनकिंकिणीकं
प्रचलच्चामरचारुहेमभांडम् ॥
अभिरुह्य स कंठकं सदश्वं
प्रययौ केतुमिव द्रुमाब्जकेतुः[1] ॥ ३ ॥

नवेति । नवाः रुक्मस्य खलीनकिंकिण्यो यस्य तं । प्रचलत् चंचलं यत् चामरं तेन चारु सुंदरं हेम्नः सुवर्णस्य भांडं अश्वालंकारविशेषो यस्य । "स्याद्भांडमश्वा-भरणं ' इत्यमरः । एतादृशं कंठकं एतन्नामानं सदश्वं सुंदराश्वं सः अभिरुह्य प्रय-यौ ॥ "केतुमिव द्रुमाब्जकेतुः" एतस्य अर्थो विचारणीयः ॥ ३ ॥

स निकृष्टतरां वनांतभूमिं
वनलोभाच्च ययौ महीगुणेच्छुः ॥
सलिलोर्मिविकारसीरमार्गां[2]
वसुधां चैव ददर्श कृष्यमाणाम् ॥ ४ ॥

सेति । स वनलोभात् अरण्यदर्शनलोभात् निकृष्टतरां संनिकृष्टतरां वनांतभूमिं ययौ च । महीगुणेच्छुः महीगुणाः सहनशीलतादयः । तान् इच्छुः अथवा मही-गुणाः पृथ्वीस्थलोकानां गुणाः तान् इच्छुः । सलिलस्य उदकस्य ऊर्मयः कल्लोलाः तासां विकारा येषु एतादृशाः सीरमार्गाः लांगलपद्धतयो यस्यां एतादृशीं कृष्यमा-णां वसुधां ददर्श ॥ ४ ॥

हलभिन्नविकीर्णशष्पदर्भां
हतसूक्ष्मक्रिमिकांडजंतुकीर्णाम् ॥
समवेक्ष्य रसां तथाविधां तां
स्वजनस्येव वधे भृशं शुशोच ॥ ५ ॥

हलेति । हलेन भिन्ना अतएव विकीर्णाः शष्पाणि तृणानि दर्भाश्च यस्यां हता ये सूक्ष्मक्रिमयः तेषां कांडेन समूहेन जंतुभिश्च कीर्णा व्याप्तां तथाविधां तां रसां भूमिं समवेक्ष्य स्वजनस्य वधे इव भृशं अत्यंतं शुशोच ॥ ५ ॥

---

१ H हंसमिवात्मभूः स देवः. २ H ०शीत.

कृषतः पुरुषांश्च वीक्षमाणः
पवनार्कांशुरजोविभिन्नवर्णान् ॥
वहनक्लमविक्लवांश्च धुर्यान्
परमार्यः परमां कृपां चकार ॥ ६ ॥

कृषत इति। परमार्यः अत्यंतसज्जनः पवनः वायुः अर्कः सूर्यः रजः धुलिःएभिः विभिन्नः वर्णो येषां एतादृशः कृषतः पुरुषान् कर्षकान् तथैव वहनक्लमेन वहनश्रमेण विक्लवान् विह्वलान् धुर्यान् वृषभान् वीक्षमाणः सन् परमां अतिशयितां कृपां दयां चकार ॥ ६ ॥

अवतीर्य ततस्तुरंगपृष्ठाच्छनकैर्गां व्यचरच्छुचा परीतः ॥
जगतो जननव्ययौ[1] विचिन्वन् कृपणं खल्विदमित्युवाच चार्तः ॥७॥

अवतीर्येति। ततः तुरंगस्य अश्वस्य पृष्ठात् अवतीर्य शनकैः गां भूमिं व्यचरत्। जगतः जननव्ययौ उत्पत्तिनाशौ विचिन्वन् विचारयन् शुचा शोकेन परीतः व्याप्तः सन् अतएव आर्तः पीडितः इदं वक्ष्यमाणं कृपणं यथास्यात्तथा उवाच ॥७॥

मनसा च विविक्ततामभीप्सुः
सुहृदस्ताननुयायिनो निवार्य ॥
अभितारलचारुपर्णवत्या
विजने मूलमुपेयिवान् स जंब्वाः ॥ ८ ॥

मनसेति। च मनसा विविक्ततां विजनतां अभीप्सुः प्राप्तुमिच्छुः सुहृदः तान् अनुयायिनः निवार्य निषिध्य तरलान्येव तारलानि अभितः तारलानि चंचलानि चारूणि एतादृशानि पर्णानि यस्याः सा तस्याः जंब्वाः मूलं विजने उपेयिवान् ॥८॥

निषसाद च पत्रसंघवत्यां[2]
भूवि वैदूर्य[3]निकाशशाद्वलायाम् ॥
जगतः प्रभवव्ययौ विचिन्त्य[4]
मनसश्च स्थितिमार्गमाललंबे ॥ ९ ॥

निषसादेति। पत्रसंघवत्यां वैदूर्येण निकाशः शाद्वलः शादहरितभागो यस्याः तस्यां भुवि निषसाद। जगतः प्रभवव्ययौ उत्पत्तिनाशौ विचिंत्य मनसः स्थितिमार्गं स्थैर्यमार्गं आललंबे ॥ ९ ॥

समवाप्तमनःस्थितिश्च सद्यो
विषयेच्छादिभिराधिभिश्च मुक्तः ॥
सवितर्कविचारमाप शांतं
प्रथमं ध्यानमनाश्रवप्रकारम् ॥ १० ॥

१ C ०नव्ययं वि०. २ C ०त्रखोरव०— ३ H गारुत्मत्तकान्ति. ४ H विचिन्वन्मनसश्च.

समेति । सद्यः समवाप्तमनःस्थितिः प्राप्तमनःस्थैर्यः विषयेच्छादिभिः आधिभिः मनोव्यथाभिः मुक्तः आश्रवः पराधीनः तद्भिन्नः अनाश्रवः । स्वतंत्र इत्यर्थः स प्रकारो यस्य । वितर्काः विशेषतर्काः विचारः विवेकः तैः सहितं शांतं ध्यानं प्रथमं आप ॥ १० ॥

अधिगम्य ततो विवेकजं तु[1]
परमप्रीतिसुखं तथा[2] समाधिम् ॥
इममेव ततः परं प्रदध्यौ मनसा
लोकगतिं निशम्य सम्यक् ॥ ११ ॥

अधिगम्येति । ततः विवेकजं विवेकोत्पन्नं परमे प्रीतिसुखे प्रेमसुखे यस्मिन् । तं समाधिं अधिगम्य प्राप्य मनसा लोकगतिं लोकस्थितिं सम्यक् निशम्य विचार्य इमं एव परं श्रेष्ठं इति प्रदध्यौ ॥ ११ ॥

कृपणो[3] बत यज्जनः स्वयं सन्[4]नरसो व्याधिजराविनाशधर्मः ॥
जरयार्दितमातुरं मृतं वा परमज्ञो[5] विजुगुप्सते मदांधः ॥ १२ ॥

कृपण इति । स्वयं कृपणः कुत्सितः । 'कृपणो मंदकुत्सितयोस्त्रिषु' इति मेदिनी । अरसः अगुणः व्याधिजराविनाशधर्मः जनः जरया अर्जितं आतुरं मृतं एतादृशं परं अन्यं विजुगुप्सते निन्दाति इति यत् । बत आश्चर्ये । तत् आश्चर्यमित्यर्थः तत्र हेतुः अज्ञः मदांधश्च ॥ १२ ॥

इह चेदहमीदृशः स्वयं सन्
विजुगुप्सेय परं तथास्वभावम् ॥
न भवेत्सदृशं हि तत्क्षमं वा
परमं धर्ममिमं विजानतो मे ॥ १३ ॥

जनस्य पूर्वोक्ति अज्ञमदांधत्वे प्रगटयति—इहेति । इह अहं ईदृशः व्याधिजरायुक्तः स्वयं सन् तथा स्वभावं व्याधिजरास्वभावं परं अन्यं विजुगुप्सेय चेत् इमं परमं धर्मं विजानतः मे तत् परविजुगुप्सनं सदृशं योग्यं क्षमं हितं न भवेत् ॥ १३ ॥

इति तस्य विपश्यतो यथावज्जगतो व्याधिजराविपत्तिदोषान् ॥
बलयौवनजीवितप्रवृत्तौ विजगामात्मगतो मदः क्षणेन ॥ १४ ॥

इतीति । इति यथावत् जगतः व्याधिजराविपत्तिदोषान् विपश्यतः तस्य शौद्धोदनेः बलयौवनजीवितप्रवृत्तौ आत्मगतः मदः गर्वः क्षणेन क्षणमात्रकालेन विजगाम ॥ १४ ॥

---

१ J वै. २ C *om:* तथा. ३ C कृपणं. ४ H सन् । रमते. ५ H परमालोच्य जुगुप्सते न मंदः.

न जहर्ष न चापि चानुतेपे विचिकित्सां न ययौ न तंद्रिनिद्रे ॥
न च कामगुणेषु संररंजे न च दिद्वेष परं न चावमेने ॥ १५ ॥

मदापगमफलानि दर्शयति—न चेत्यादिना। न जहर्ष न च अनुतेपे। विचिकित्सां न संशयं न ययौ तंद्रिनिद्रे न ययौ कामगुणेषु न संररंजे परं न दिद्वेष न परं न अवमेने ॥ १५ ॥

इति बुद्धिरियं च नीरजस्का ववृधे तस्य महात्मनो विशुद्धा ॥
पुरुषैरपरैरदृश्यमानः पुरुषश्चोपससर्प भिक्षुवेषः ॥ १६ ॥

इतीति। इति तस्य महात्मनः शौद्धोदनेः इयं पूर्वोक्ता निर्गतं रजः रजोगुणो यस्याः सा नीरजस्का। इदमुपलक्षणं तमोगुणस्यापि। तेन केवलसत्वगुणा इत्यर्थः। अतएव विशुद्धा बुद्धिः ववृधे। अपरैः अन्यैः पुरुषैः अदृश्यमानः पुरुषः भिक्षुवेशः सन् उपससर्प समीपमाजगामेत्यर्थः ॥ १६ ॥

नरदेवसुतस्तमभ्यपृच्छद्वद कोऽसीति शशंस सोथ तस्मै ॥
नृपपुंगव[१] जन्ममृत्युभीतः श्रमणः प्रव्रजितोऽस्मि मोक्षहेतोः॥१७॥

नरदेवेति। नरदेवसुतः शौद्धोदनिः। किं कथयामास तदाह—हे नृपपुंगव राजश्रेष्ठ जन्ममृत्युभीतः अहं मोक्षहेतोः श्रमणः भिक्षुकः प्रव्रजितः अस्मि ॥ १७ ॥

जगति क्षयधर्मके मुमुक्षुर्मृगयेऽहं शिवमक्षयं पदं तत् ॥
अजनोऽन्यजनैरतुल्यबुद्धिर्विषयेभ्यो विनिवृत्तरागदोषः ॥१८॥

स्वस्थितिं दर्शयति—जगति इति। क्षयधर्मके जगति मुमुक्षुः अहं अक्षयं शिवं कल्याणं तत् पदं मृगये। कथं भूतोऽहं अजनः अनुत्पत्तिः जनरहितो वा अन्यजनैः अतुल्यबुद्धिः विषयेभ्यः विनिवृत्तरागदोषः ॥ १८ ॥

निवसन् क्वचिदेव वृक्षमूले
विजने वायतने[२] गिरौ वने वा ॥
विचराम्यपरिग्रहो निराशः
परमार्थाय यथोपपन्नभिक्षुः[३] ॥ १९ ॥

निवसन्निति। परमार्थाय मोक्षाय यथावत् प्राप्त इत्यर्थः। स चासौ भिक्षुश्च ॥१९॥

इति पश्यत एव राजसूनो-
रिदमुक्त्वा स नभः समुत्पपात ॥
स हि तद्वपुरन्यबुद्धिदर्शी
स्मृतये तस्य समेयिवान् दिवौकाः ॥ २० ॥

इतीति। तद्वपुः यस्य सः। अन्यबुद्धिदर्शी दिवौकाः सन् तस्य शौद्धोदनेः स्मृतये समेयिवान्। अन्यत् पूर्वार्धे स्पष्टार्थम् ॥ २० ॥

---

१ C स च पुं०.— २ H वा भवने. ३ H क्षुः.

गगनं खगवद्गते च तस्मिन् नृवरः संजहृषे विसिष्मिये[1] च ॥
उपलभ्य ततश्च धर्मसंज्ञामभिनिर्याणविधौ मतिं[2] चकार ॥२१॥

गगनमिति । तस्मिन् खगवत् पक्षिवत् गगनं आकाशं गते सति नृवरः शौद्धोदनिः संजहृषे विसिष्मिये च । ततः धर्मसंज्ञां उपलभ्य अभिनिर्याणविधौ मतिं बुद्धिं चकार ॥ २१ ॥

तत इंद्रसमो जितेंद्रियश्च प्रविविक्षुः पुरं[4]मश्वमारुरोह ॥
परिवर्त्य जनं त्ववेक्षमाणस्तत एवाभिमतं वनं न भेजे ॥ २२ ॥

तत इति । पुरं प्रविविक्षुः प्रवेष्टुमिच्छुः जनं परिवर्त्य निवर्त्य अन्यत् स्पष्टार्थम् ॥ २२ ॥

स जरामरणक्षयं चिकीर्षुर्वनवासाय मतिं स्मृतौ निधाय ॥
प्रविवेश पुनः पुरं न कामाद्वनभूमेरि[5]व मण्डलद्विपेंद्रः ॥ २३ ॥

स इति । जरामरणक्षयं चिकीर्षुः वनवासाय स्मृतौ मतिं निधाय द्विपेंद्रः वनभूमेः मंडलं इव पुनः पुरं नगरं प्रविवेश न कामात् ॥ २३ ॥

सुखिता बत निर्वृता च सा स्त्री
पतिरीदृक्त्वमिवायताक्ष यस्याः ॥
इति तं समुदीक्ष्य राजकन्या
प्रविशंतं पथि सांजलिर्जगाद ॥ २४ ॥

सुखितेति । आयताक्ष विशालनेत्र यस्यास्त्वमीदृक् पतिः सा स्त्री सुखिता सुखिनी निर्वृता परमानंदवती च इति राजकन्या सांजलिः सती पथि प्रविशंतं तं समुदीक्ष्य जगाद ॥ २४ ॥

अथ घोषमिमं महाभ्रघोषः[6] परिशुश्राव शमं परं च लेभे ॥
श्रुतवांश्च हि निर्वृतेति शब्दं परिनिर्वाणविधौ मतिं चकार ॥२५॥

अथेति । महाभ्रघोषः मेघगंभीरवाक् इत्यर्थः इमं घोषं परिशुश्राव परं शर्म शांति लेभे च । हि यतः निर्वृता इति शब्दं श्रुतवान् अतः निर्वाणविधौ मोक्षविधौ मतिं चकार ॥ २५ ॥

अथ कांचनशैलशृंगवर्ष्मा गजमेघर्षभबाहुनिस्वनाक्षः ॥
क्षयमक्षय धर्मजातरागः शशिसिंहाननविक्रमः[7] प्रपेदे ॥ २६ ॥

अथेति । कांचनशैलशृंगवर्ष्मा मेरुशृंगतुल्यदेहः । गजः हस्ती मेघः अभ्रं ऋषभः वृषः तैः यथासंख्यं तुल्यः बाहुः निःस्वनः अक्षिणी यस्य सः गजतुल्यबाहुः ।

---

१ C णं for नं. २ C स्मि. ३ H चकार बुद्धिम्. ४ C पर०. ५ H भूमाविव. ६ H दोषः. ७ H शुचि कण्ठीरवविक्रमः.

मेघतुल्यस्वनः वृषतुल्याक्षः इत्यर्थः। अक्षयधर्मे जातः रागः प्रेमा यस्य शशीव चंद्रमा इव आननं यस्य सिंह इव विक्रमो यस्य सः। क्षयं गृहं प्रपेदे ॥ २६ ॥

मृगराजगतिस्ततोऽभ्यगच्छन्नृपतिं मंत्रिगणैरुपास्यमानम् ॥
समितौ मरुतामिव ज्वलंतं मघवन्तं त्रिदिवे सनत्कुमारः ॥२७॥

मृगराजेति। त्रिदिवे मरुतां देवानां समितौ सभायां ज्वलंतं मघवंतं इंद्रं सनत्कुमार इव मंत्रिगणैः उपास्यमानं नृपतिं मृगराजगतिः सिंहगतिः अभ्यगच्छत् ॥ २७ ॥

प्रणिपत्य च सांजलिर्बभाषे
दिश मह्यं नरदेव साध्वनुज्ञाम् ॥
परिविव्रजिषामि मोक्षहेतो-
र्नियतो ह्यस्य जनस्य विप्रयोगः ॥ २८ ॥

प्रणिपत्येति। हि यतः अस्य जनस्य विप्रयोगः वियोगः नियतः अतः मोक्षहेतोः परिविव्रजिषामि ॥ २८ ॥

इति तस्य वचो निशम्य राजा
करिणेवाभिहतो द्रुमश्चचाल ॥
कमलप्रतिमाञ्जलिं[1] गृहीत्वा
वचनं चेदमुवाच बाष्पकंठः ॥ २९ ॥

इतीति। तस्य तनयस्य इति पूर्वोक्तं वचः निशम्य राजा करिणा हस्तिना अभिहतः द्रुम इव वृक्ष इव चचालेत्यादि अन्वयः स्पष्टः ॥ २९ ॥

प्रतिसंहर तात बुद्धिमेतां न हि कालस्तव धर्मसंश्रयस्य ॥
वयसि प्रथमे मतौ चलायां बहुदोषां हि वदन्ति धर्मचर्याम् ॥३०॥

प्रतिसंहरेति। तात एतां बुद्धिं प्रतिसंहर हि यतः धर्मसंश्रयस्य तव अयं कालः न हि। प्रथमे वयसि चलायां मतौ बहुदोषां धर्मचर्यां मोक्षमार्गसेवनमित्यर्थः वदन्ति ॥ ३० ॥

विषयेषु कुतूहलेंद्रियस्य
बत[2] खेदेष्वसमर्थनिश्चयस्य ॥
तरुणस्य मनश्चलत्यरण्या-
दनभिज्ञस्य विशेषतो विवेकम् ॥ ३१ ॥

विषयेष्विति। विषयेषु कुतूहलेंद्रियस्य कौतुकवदिंद्रियस्य। बत इति निश्चये। खेदेषु दुःखेषु असमर्थनिश्चयस्य अदृढनिश्चयस्येत्यर्थः। विवेकं अनभिज्ञस्य। तदर्हमिति निर्देशात् कर्तृकर्मणोः कृतीति षष्ठ्या अनित्यत्वात् कर्मणि षष्ठी न भवति। एतादृशस्य तरुणस्य मनः अरण्यात् चलति ॥ ३१ ॥

---

१ H कमलप्रतिमेऽञ्जलौ. २ C व्रतखे, H व्रतचर्यास्व.

मम तु प्रियधर्म धर्मकालस्त्वयि लक्ष्मीमवसृज्य लक्ष्यभूते ॥
स्थिरविक्रम विक्रमेण धर्मस्तव हित्वा तु गुरुं भवेदधर्मः ॥३२॥

ममेति । हे प्रियधर्म लक्ष्यभूते त्वयि लक्ष्मीं अवसृज्य उत्सृज्य मम धर्मकालः अस्ति । हे स्थिरविक्रम स्थिरपराक्रम विक्रमेण विरुद्धक्रमेण व्युत्क्रमेणेत्यर्थः । गुरुं हित्वा तव धर्मः अधर्मः भवेत् ॥ ३२ ॥

तदिमं व्यवसायमुत्सृज त्वं
भव तावन्निरतो गृहस्थधर्मे ॥
पुरुषस्य वयःसुखानि भुक्त्वा
रमणीयो हि तपोवनप्रवेशः ॥ ३३ ॥

तदेति । इयं व्यवसायं मोक्षमार्गोपायाश्रयणम् । अन्यत् सुगमम् ॥ ३३ ॥

इति वाक्यमिदं निशम्य राज्ञः
कलविंकस्वर उत्तरं जगाद[1] ॥
यदि मे प्रतिभूश्चतुर्षु राजन्
भवसि त्वं न तपोवनं श्रयिष्ये ॥ ३४ ॥

इतीति । कलविंकस्वरः चटकस्वरः । मंदस्वर इति यावत् । चतुर्षु वस्तुषु प्रतिभू लग्नकः भवसि चेत् तर्हि तपोवनं न श्रयिष्ये इति अन्वयः ॥ ३४ ॥

न भवेन्मरणाय जीवितं मे
विरहे[2]त्स्वास्थ्यमिदं च[3] मे न रोगः[4]
न च यौवनमाक्षिपेज्जरा मे
न च संपत्तिमपाहरेद्विपत्तिः ॥ ३५ ॥

चतुर्षु वस्तुषु इत्युक्तं तान्येव आह—मे जीवितं मरणाय न भवेत् । कदापि मरणं मा प्राप्नोत्वित्यर्थः । रोगः इदं संप्रति विद्यमानं स्वास्थ्यं न विरहेत् न जह्यात् । रोगोपि कदा मा भूदित्यर्थः । मे यौवनं जरा न च क्षिपेत् न पातयेदित्यर्थः । च मम संपत्तिं विपत्तिः न अपाहरेत् ॥ ३५ ॥

इति दुर्लभमर्थमूचिवांसं[6]
तनयं वाक्यमुवाच शाक्यराजः ॥
त्यज बुद्धिमिमामतिप्रवृत्ता-
मवहास्यश्च मनोरथक्रमोऽयं ॥ ३६ ॥

इतीति । इमां गतिप्रवृत्तां मोक्षमार्गप्रवृत्तां अथवा अतिप्रवृत्तां दुर्घटविषयेच्छावतीं तदेवाह अयं मनोरथक्रमः अवहास्यः ॥ ३६ ॥

---

१ C बभाषे. २ C विहरेत्स्वा०. ३ H न मे सदैवं. ४ C रोगः. H मिमां हरेद्वि. ६ H ०र्थमुक्तवंतं ७ C ०मां गतिप्र०. ८ C ०स्योऽतिमनो०.

अथ मेरुगुरुर्गुरुं बभाषे
यदि नास्ति क्रम एष नास्ति वार्यः ॥
शरणाज्ज्वलनेन दह्यमाना-
न्न हि निश्चिक्रमिषुं क्षमं ग्रहीतुम् ॥ ३७ ॥

अथेति । अथ मेरुगुरुः मेरुवत् दृढांगः गुरुं पितरं बभाषे यदि न एतत् तर्हि उक्तक्रमः वार्यः वारयितुं शक्यो नास्ति । तर्हि ज्वलनेन दह्यमानात् शरणात् गृहात् निश्चिक्रमिषुं निर्गतुमिच्छुं मामितिशेषः ग्रहीतुं क्षमं नास्ति । अग्नितुल्यजरा-मरणादिभ्यः भीतं मां को वा निवारयेदित्यर्थः ॥ ३७ ॥

जगतश्च यतो[३] ध्रुवं वियोगो
न तु धर्माय वरं[४] त्वयं वियोगः ॥
अवशं ननु विप्रयोजयेन्मा-
मकृतस्वार्थमतृप्तमेव मृत्युः ॥ ३८ ॥

जगत इति । जगतः यतः अवश्यं वियोगः परंतु धर्माय न । अयं तु वियोगः धर्माय अतः वरं । ननु जगतः वियोगेऽपि तव वियोगो न स्यात् अत आह अवशं मृत्स्वधीनमित्यर्थः । अकृतस्वार्थं अतएव अतृप्तं मां मृत्युः विप्रययोजेत् ॥३८॥

इति भूमिपतिर्निशम्य तस्य
व्यवसायं तनयस्य निर्मुमुक्षोः ॥
अभिधाय न यास्यतीति भूयो
विदधे रक्षणमुत्तमांश्च[६] कामान् ॥ ३९ ॥

इति पूर्वोक्तप्रकारेण भूमिपतिः शुद्धोदनः निर्मुमुक्षोः तस्य तनयस्य व्यव-सायं उद्योगं निशम्य श्रुत्वा भूयः न यास्यतीति अभिधाय उक्त्वा रक्षणं च उत्तमान् कामान् च विदधे चकारेत्यन्वयः ॥ ३९ ॥

सचिवैस्तु निदर्शितो यथाव-
द्वहुमानात्प्रणयाच्च शास्त्रपूर्वम् ॥
गुरुणा च निवारितोऽश्रुपातैः
प्रविवेशावसथं ततः स शोचन् ॥ ४० ॥

सचिवैरिति । सचिवैः यथावत् बहुमानात् प्रणयाश्च शास्त्रपूर्वं निदर्शितः ज्ञा-पितः गुरुणा च निवारितः अश्रुपातैः सह शोचन् अवसथं प्रविवेश ॥ ४० ॥

---

१ H भवेन्नु. २ C यथा. ३ C ध्रुः for वं. ४ H वरोह्य. ५ H याहि वत्स. ६ H मुत्तमं स्वकीयैः

चलकुंडलचुम्बिताननाभि-
घननिश्वासविकम्पितस्तनीभिः ॥
वनिताभिरधीरलोचनाभि-
मृगशावाभिरिवाभ्युदीक्ष्यमाणः ॥ ४१ ॥

स हि कांचनपर्वतावदातो हृदयोन्मादकरो वरांगनानाम् ॥
श्रवणांगविलोचनात्मभावान् वचनस्पर्शवपुर्गुणैर्जहार ॥ ४२ ॥

चलेति । चंचलकुंडलयुक्तगल्लाभिः घनः निविडः यो निश्वासः तेन कंपिताः स्तनाः यासां ताभिः । अधीरलोचनाभिः चंचलनेत्राभिः वनिताभिः स्त्रीभिः मृगशावाभिरिव उदीक्ष्यमाणः स कांचनपर्वतावदातो मेरुपर्वतवत् स्वच्छः वरांगनानां स्त्रीणां हृदयोन्मादकरः श्रवणं स्वविषयगोष्ठीश्रवणं अंगविलोचनं शरीरविलोकनं तद्रूपान् आत्मभावान् आत्मविषयकचेष्टाः वचनस्पर्शवपुगुणैः वचनं भाषणं स्पर्शश्च एत्येतद्रूपैः वपुर्गुणैः जहार ॥ ४१ ॥ ४२ ॥

विगते दिवसे ततो विमानं
वपुषा सूर्य इव प्रदीप्यमानः ॥
तिमिरं विजिघांसुरात्मभासा
रविरुद्यन्निव मेरुमारुरोह ॥ ४३ ॥

विगते इति । आत्मभासा तिमिरं अंधकारं विजिघांसुः उद्यन् रविः मेरुमिव वपुषा सूर्य इव प्रदीप्यमानः स दिवसे विगते विमानं गृहविशेषं आरुरोह ॥४३॥

कनकोज्वलदीप्तदीपवृक्षं
वरकालागरुधूपपूर्णगर्भम् ॥
अधिरुह्य स वज्रभक्तिचित्रं
प्रवरं काञ्चनमासनं सिषेवे ॥ ४४ ॥

कनकेति। स कनकेन उज्वला दीप्तिर्येषां एतादृशाः दीपवृक्षा वृक्षाकृतिदीपा यस्मिन्। वरेण कालागरुधूपेन पूर्णः गर्भः यस्य । वज्रभक्तयः हीरकभागाः तेषां चित्राणि यस्मिन्। अथवा तैः चित्रं विचित्रं एतादृशं विमानमित्यर्थः आरुह्य प्रवरं कांचनं सौवर्णमासनं सिषेवे ॥ ४४ ॥

तत उत्तममुत्तमाश्च नार्यो
निशि तूर्यैरुपतस्थुरिन्द्रकल्पम् ॥
हिमवच्छिरिसीरिचंद्रगौरा
द्रविणेंद्रात्मजमप्सरोगणौघाः ॥ ४५ ॥

---

१ C गु for ग. २ C ०व च्छिरसीव चंद्रगौरे.

ततः इति । ततः निशि तूर्यैः उत्तमं इंद्रकल्पं तं उत्तमा नार्यः उपतस्थुः । अत्र दृष्टांतः हिमवद्गिरिः हिमालयः सीरिः बलरामः चंद्रश्च एते इव गौराः गौरवर्णाः अप्सरसां गणौघाः द्रविणेंद्रात्मजं कुबेरपुत्रं यथा ॥ ४५ ॥

परमैरपि दिव्यतूर्यकल्पैः
स तु तैर्नैव रतिं ययौ न हर्षम् ॥
परमार्थसुखाय तस्य साधो-
रभिनिष्क्रिमिषा यतो न रेमे ॥ ४६ ॥

परमैरिति। परमैरपि दिव्यतूर्यकल्पैः दिव्यवाद्यतुल्यैः तैः स तु रतिं नैव ययौ हर्षं आनंदं न ययौ यतः तस्य साधोः परमार्थसुखाय निष्क्रिमिषा निश्चयेन गंतुमिच्छा अतः न रेमे ॥ ४६ ॥

अथ तत्र सुरैस्तपोवरिष्ठैरकनिष्ठैर्व्यवसायमस्य बुध्वा ॥
युगपत्प्रमदाजनस्य निद्रा विहितासीदकृताश्च गात्रचेष्टाः ॥४७॥

अथेति । अथ तपोवरिष्ठैः अकनिष्ठैः सुरैः अस्य व्यवसायं बुध्वा युगपत् इत्यादि स्पष्टान्वयः ॥ ४७ ॥

अभवच्छयिता हि तत्र काचि-
द्विनिवेश्य प्रबले[1] करे कपोलम् ॥
दयितामपि रुक्मपत्रचित्रां
कुपितेवांकगतां विहाय वीणाम् ॥ ४८ ॥

अभवदिति । काचित् दयितामपि रुक्मपत्रचित्रां अंकगतां वीणां कुपिता इव विहाय प्रबले करे कपोलं विनिवेश्य शयिता अभवत् ॥ ४८ ॥

विबभौ करलग्नवेणुरन्या-
स्तनविस्रस्तसितांशुका शयाना ॥
ऋजुषट्पदपंक्तिजुष्टपद्मा
फलफेनप्रहसत्तटा नदीव ॥ ४९ ॥

विबभौ इति । अन्या करलग्नवेणुः स्तनविस्रस्तसितांशुका शयाना सती ऋजूनां षट्पदानां पंक्त्या जुष्टानि सेवितानि पद्मानि कमलानि यस्यां सा: जलफेनेन प्रहसत्तटं यस्या एतादृशी नदीव विबभौ ॥ ४९ ॥

नवपुष्करगर्भकोमलाभ्यां
तपनीयोज्वलसंगतांगदाभ्याम् ॥
स्वपिति स्म पुरःस्थितं[2] भुजाभ्यां
परिरभ्य प्रियवन्मृदंगमेव ॥ ५० ॥

नवेति । तथा काचित् नवपुष्करगर्भकोमलाभ्यां नूतनकमलमध्यकोम-

---

१ C प्रचले. २ C तथा पुरा.

ताभ्यां तपनीयं सुवर्णं तद्वत् उज्वले संगते संलग्ने च अंगदे बाहुभूषणे ययोः ताभ्यां भुजाभ्यां प्रियवत् मृदंगमेव परिरभ्य आलिंग्य स्वपिति स्म ॥ ५० ॥

नवहाटकभूषणास्तथान्या वसनं पीतमनुत्तमं वसानाः ॥
अवशा बत निद्रया निपेतुर्गजभग्ना इव कर्णिकारशाखाः ॥ ५१ ॥

नवेति । तथा नवहाटकभूषणाः नूतनसुवर्णालंकाराः अन्याः निद्रया निपेतुरित्याद्यन्वयः ॥ ५१ ॥

अवलंब्य गवाक्षपार्श्वमन्या शयिता चापविभुग्नगात्रयष्टिः ॥
विरराज विलम्बिचारुहारा रचिता तोरणशालभञ्जिकेव ॥ ५२ ॥

अवलंब्येति । चापविभुग्नगात्रयष्टिः चाप इव धनुरिव विभुग्ना गात्रयष्टिः यस्याः अन्यत् स्पष्टम् ॥ ५२ ॥

मणिकुंडलदष्टपत्रलेखं मुखपद्मं विनतं तथापरास्याः ॥
शतपत्रमिवार्धचक्र[1]नालं[2] स्थितकारंडवघट्टितं चकाशे ॥ ५३ ॥

मणिकुंडलेति । मणिकुंडलेन दष्टाः पत्रलेखाः यस्य एतादृशं मुखपद्मं । अन्यत् स्पष्टार्थम् ॥ ५३ ॥

अपराः शयितायथोपविष्टाः स्तनभारैरवमन्यमानगात्राः ॥
उपगुह्य परस्परं विरेजुर्भुजपाशैस्तपनीयपारिहार्यैः ॥ ५४ ॥

अपरा इति । तपनीयस्य पारिहार्याः कटकादयो येषु तैः भुजपाशैः विरेजुः । अन्यत् स्पष्टम् ॥ ५४ ॥

[3]महतीं परिवादिनीं च काचिद्वनितालिंग्य सखीमिव प्रसुप्तां ॥
विजुघूर्ण चलत्सुवर्णसूत्रां वदनेनाकुलकर्णिकोज्ज्वलेन ॥ ५५ ॥

महतीमिति । आकुलया कर्णिकया तालपत्रेण उज्ज्वलेन वदनेन इत्यादि स्पष्टार्थम् ॥ ५५ ॥

पणवं युवतिर्भुजांसदेशा
दवविस्रं[4]सितचारुपाशमन्या ॥
सविलासरतांततांतमूर्वो-
र्विवरे कान्तमिवाभिनीय शिश्ये ॥ ५६ ॥

पणवमिति । अन्या युवतिः भुजांसदेशात् अवविस्रंसितचारुपाशं सविलासं यद्रतं तस्य अंते तांतं दीर्घं प्रसृतहस्तपादमित्यर्थः । एतादृशं कांतमिव ऊर्वोः विवरे पणवं वाद्यविशेषं अभिनीय शिश्ये ॥ ५६ ॥

---

१ J वक्रनालं. २ C डं for लं.
३ H महतीं परिवादिनीं विपंचीं वनितालिंग्य सखीमिवाधिकाचित् ॥
विजुघूर्ण चलत्सुवर्णसूत्रां वदनेनाकुलकर्णिकोज्वलेन ॥
४ H ०विस्रस्तसुचारुपाशमन्या.

अपरा न बभुर्निमीलिताक्ष्यो
विपुलाक्ष्योऽपि शुभभ्रुवोऽपि सत्यः ॥
प्रतिसंकुचितारविंदकोशाः
सवितर्यस्तमिते यथा नलिन्यः ॥ ५७ ॥

अपरा इति । अपराः विपुलाक्ष्योऽपि शुभभ्रुवोऽपि सत्यः निमिलिताक्ष्यो न बभुः । यथा सवितरि अस्तमिते सति नलिन्यः कमलिन्यः प्रतिसंकुचिताः अरविंदकोशाः यासां ताः तथेत्यर्थः ॥ ५७ ॥

शिथिलाकुलमूर्धजा तथान्या जघनस्रस्तविभूषणांशुकांता ॥
अशायिष्ट विकीर्णकंठसूत्रा गजभग्ना भुवि[२] पातितेव मोचा ॥५८॥

शिथिलेति । शिथिलाः अतएव आकुलाः मूर्धजाः केशाः यस्याः सा जघनाभ्यां स्रस्तानि विभूषणानि अंशुकान्तः वस्त्राग्रं च यस्याः सा गजभग्ना भुवि पतिता मोचा इव कदलीव अशायिष्टेत्यर्थः ॥ ५८ ॥

अपरास्त्ववशा ह्रियावियुक्ता
धृतिमत्योऽपि वपुर्गुणैरुपेताः ॥
विनिशश्वसुरुल्वणं शयाना
विकृताक्षिप्तभुजा जजृंभिरे च ॥ ५९ ॥

अपरा इति । अपरास्तु अन्यास्तु ह्रिया लज्जया वियुक्ता शयानाः उल्वणं घोरं यथास्यात्तथा विनिशश्वसुः । विकृताक्षिप्तभुजाः जजृंभिरे ॥ ५९ ॥

व्यपविद्धविभूषणस्रजोऽन्या
विसृताग्रंथनवाससोविसंज्ञाः ॥
अनिमीलित शुक्लनिश्चलाक्ष्यो
न विरेजुः शयिता गता सुकल्पाः ॥ ६० ॥

व्यपविद्धेति । व्यपविद्धाः विभूषणस्रजः यासां एतादृशः अन्याः विसृतं आग्रंथनं येषां एतादृशानि वासांसि वस्त्राणि यासां । गतासुकल्पाः सत्यः न विरेजुः अन्यत् सुगमम् ॥ ६० ॥

विवृतास्यपुटा विवृद्धगात्रा प्रपतद्वक्त्रजला प्रकाशगुह्या[३] ॥
अपरा मदघूर्णितेव शिश्ये न बभाषे विकृतं वपुः पुपोष ॥ ६१ ॥

विवृतेति । अपरा विवृतं आस्यपुटं यस्याः । प्रपतत् वक्त्रजलं यस्याः । मदेन घूर्णितेव ॥ ६१ ॥

इति सत्वकुलानुरूपरूपं विविधं स प्रमदाजनः शयानः ॥
सरसः सदृशं बभार रूपं पवनावर्जितरुग्णपुष्करस्य ॥ ६२ ॥

---

१ B तत्रभूनकोशाः. २ C ०म्ना प्रतिरातितांगनेत्र. ३ B त्रिविक्त.

इतीति । इति पूर्वोक्तप्रकारेण सत्वं धैर्यं कुलं वंशः तयोः अनुरूपं रूपं यस्य एतादृशं विविधं यथास्यात्तथा शयानः स प्रमदाजनः स्त्रीजनः पवनेन वायुना क्षावर्जितानि अतएव रुग्णानि पुष्कराणि कमलानि यस्मिन् एतादृशस्य सरसः सरोवरस्य सदृशं रूपं बभार ॥ ६२ ॥

समवेक्ष्य ततश्च ताः शयाना विकृतास्ता युवतीरधीरचेष्टाः ॥
गुणवद्वपुषोऽपि वल्गुभासो नृपसूनुः स विगर्हयांबभूव ॥ ६३ ॥

समवेक्ष्येति । अधीरवच्चेष्टा यासां गुणवद्वपुषः सर्वगुणसंपन्नशरीरा इत्यर्थः । वल्गुभासः सुंदरतेजस्काः अन्यत् स्पष्टम् ॥ ६३ ॥

अशुचिर्विकृतश्च जीवलोके वनितानामयमीदृशः स्वभावः ॥
वसनाभरणैस्तु वंच्यमानः पुरुषः स्त्रीविषयेषु रागमेति ॥ ६४ ॥

ताः इति गर्हयां बभूवेत्युक्तं तदेव विशदयाति अशुचिरित्यादिना । स्वभावः आत्मा । रागं प्रेमाणं । सुगममन्यत् ॥ ६४ ॥

विमृशे[1]द्यदि योषितां मनुष्यः प्रकृतिं स्वप्नविकार[2]मीदृशं च ॥
ध्रुवमत्र न वर्धयेत्प्रमा[3]दं गुणसंकल्पहतस्तु रागमेति ॥ ६५ ॥

विमृषेदिति । मनुष्यः योषितां प्रकृतिं यदि विमृषेत् ईदृशं स्वप्नतुल्यविकारं च यदि विमृषेत् सहेत तर्हि अत्र आसु योषित्सु प्रमादं तदधीनत्वरूपं ध्रुवं न वर्धयेत् । आसु गुणेषु यः संकल्पः प्राप्तीच्छादिकल्पना तेन हतस्तु ताडितस्तु रागं एति ॥ ६५ ॥

इति तस्य तदंतरं विदित्वा [4]निशि निश्चिक्रमिषा समुद्बभूव ॥
अवगम्य मनस्ततोऽस्य देवैर्भवनद्वारमपावृतं च[5] चक्रे ॥ ६६ ॥

इतीति । इति पूर्वोक्तप्रकारेण तत् अंतरं तदवकाशं इत्यर्थः । विदित्वा तस्य निश्चिक्रमिषा निर्गमनेच्छा निशि बभूव । ततः अस्य मनः देवैः अवगम्य ज्ञात्वा भवनद्वारं अपावृतं चक्रे ॥ ६६ ॥

अथ सोऽवततार हर्म्यपृष्ठाद्युवतीस्ताः शयिता विगर्हमाणः ॥
अवतीर्य ततश्च निर्विशंको गृहकक्ष्यां प्रथमं विनिर्जगाम ॥ ६७ ॥

अथेति । स शयिताः ताः युवतीः विगर्हमाणः सन् निर्विशङ्कः गृहकक्ष्यां प्रथमं विनिर्जगाम ॥ ६७ ॥

तुरगा[6]नुचरं स बोधयित्वा
जविनं छंदकमित्थमित्युवाच ॥
हयमानय कं[7]ठकं त्वरावा-
नमृतं प्राप्तुमितोऽद्य मे यियासा ॥ ६८ ॥

---

१ C षे for शे. २ H रवत्स्वबुध्या. ३ H प्रसादं. ४ H ह्यमि for निशि. ५ C तं बभूव. ६ C गावचरं. ७ C थ for ठ.

तुरगेति । तुरगानुचरं अश्वसेवकं जविनं वेगिनं छंदकं एतन्नामानं तुरगानुचरमित्यर्थः । किमुवाचेत्यपेक्षायामाह कंठकं एतन्नामान हयं त्वरावान् त्वमित्यर्थः । आनय । अमृतं मोक्षं प्राप्तुं इतः अद्य मे यियासा यातुमिच्छा वर्तते इति शेषः ॥ ६८ ॥

हृदि या मम तुष्टिरद्य जाता
व्यवसायश्च[1] तया धृतौ निविष्टः ॥
विजनेऽपि च नाथवानिवास्मि
ध्रुवमर्थोऽभिमुखः स मे य इष्टः ॥ ६९ ॥

हृदीति । अद्य मम हृदि या तुष्टिर्जाता तया धृतौ धैर्ये सति व्यवसायः निश्चयः विनिष्टः उत्पन्नः । विजनेपि नाथवान् इव अस्मि । मे यः इष्टः अर्थः सः ध्रुवं निश्चयेन अभिमुखो वर्तते ॥ ६९ ॥

ह्रियमेव च सन्नतिं च हित्वा शयिता मत्प्रमुखं[2] यथा युवत्यः ॥
विवृते च यथा स्वयं कपाटे नियतं यातुमसौ[3] ममाद्य कालः ॥७०॥

ह्रियमिति । ह्रियं लज्जां संनतिं च हित्वा युवत्यः मत्प्रमुखं यथा शयिताः तथा स्वयं कपाटे विवृते च । अतः मम अद्य नियतं यातुं गंतुं असौ कालः अस्ति ॥ ७० ॥

प्रतिगृह्य ततः स भर्तुराज्ञां
विदितार्थोऽपि नरेन्द्रशासनस्य ॥
मनसीव परेण चोद्यमान-
स्तुरगस्यानयने मतिं चकार ॥ ७१ ॥

प्रतिगृह्येति । नरेंद्रशासनस्य विदितार्थोपि स भर्तुः आज्ञां प्रतिगृह्य मनसि परेण चोद्यमान इव तुरगस्य आनयने मतिं चकार ॥ ७१ ॥

अथ हेमखलीनपूर्णवक्त्रं लघुशय्यास्तरणोपगूढपृष्ठम् ॥
बलसत्वजवत्वरोपपन्नं स वराश्वं तमुपानियाय भर्तुः[4] ॥ ७२ ॥

अथेति । अथ हेम्नः सुवर्णस्य खलीनेन (लगाम इति भाषायां) पूर्णं वक्त्रं मुखं यस्य लघुशय्यास्तरणोपगूढपृष्ठं मृदुशयनास्तरणयुक्तपृष्ठं बलसत्वजवत्वरोपपन्नं वराश्वं भर्तुः उपानिनाय ॥ ७२ ॥

प्रतताित्रकपुच्छमूलपार्ष्णिं निभृतं ह्रस्वतनूजपृष्ठकर्णम् ॥
विनतोन्नतपृष्ठकुक्षिपार्श्वं विपुलप्रोथललाटकट्युरस्कम् ॥ ७३ ॥

प्रततेति । प्रततानि त्रिकादिकानि यस्येति बहुव्रीहिः त्रिकं पृष्ठवंशाधरः (माकडहाड)। ह्रस्वाः तनूजादयो यस्य । तनूजाः केशाः । विनतोन्नतं नम्रोच्चं पृ-

---

१ C यथा. २ C मुखे. ३ C तुमनामयायकाल; H म for तु. ४ C भत्रे.

छकुक्षिपार्श्वं यस्य । विपुलानि विशालानि प्रोथः अश्वघोणा ललाटं कटिः उरश्च एतानि यस्य तं पूर्वोक्तमश्वमित्यर्थः ॥ ७३ ॥

उपगुह्य स तं विशालवक्षाः कमलाभेन च सांत्वयन्करेण ॥
मधुराक्षरया गिरा शशास ध्वजिनीमध्यमिव प्रवेष्टुकामः॥ ७४॥

उपगुह्येति । विशालवक्षाः सः शौद्धोदनिः कमलाभेन पद्मकांतिना करेण हस्तेन तं अश्वं सांत्वयन् सन् ध्वजिनीमध्यं सेनामध्यं प्रवेष्टुकाम इव मधुराणि अक्षराणि यस्यां तया गिरा भाषणेन शशास ॥ ७४ ॥

बहुशः कलिशत्रवो निरस्ताः समरे त्वामधिरुह्य पार्थिवेन ॥
अहमप्यमृतं परं यथावत्तुरगश्रेष्ठ लभेय तत्कुरुष्व ॥ ७५ ॥

किं शशास तदाह–बहुश इति । पार्थिवेन त्वां अधिरुह्य समरे युद्धे बहुशः कलिशत्रवः निरस्ताः नाशिताः । हे तुरगश्रेष्ठ अहमपि परं अमृतं यथावत् लभेय तत्कुरुष्व ॥ ७५ ॥

सुलभाः खलु संयुगे सहाया विषयावाप्ति[1]सुखे धनार्जने वा ॥
पुरुषस्य तु दुर्लभाः सहायाः पतितस्यापदि धर्मसंश्रये वा॥७६॥

सुलभा इति । संयुगे सहाया सुलभाः खलु तथा विषयावाप्तिसुखे धनार्जने वा सहायाः सुलभाः । धर्मसंश्रये आपदि पतितस्य पुरुषस्य तु सहायाः दुर्लभाः संति ॥ ७६ ॥

इह चैव भवन्ति ये सहायाः कलुषेऽधर्मणि धर्मसंश्रये वा ॥
अवगच्छति मे यथान्तरात्मा नियतं तेऽपि जनास्तदंशभाजः॥७७॥

इहेति । नास्ति धर्मो यस्मिन् एतादृशे कलुषे इह विषयरूपमार्गे धर्मस्य संश्रयो यस्मिन् मार्गे वा ये सहाया भवंति तेऽपि जनास्तदंशभाजः अधर्मांशभाजः धर्मांशभाजश्च इति मे अंतरात्मा अंतःकरणं नियतं अवगच्छति ॥ ७७ ॥

तदिदं परिगम्य धर्मयुक्तं मम निर्याणमतो जगद्धिताय ॥
तुरगोत्तम वेगविक्रमाभ्यां प्रयतस्व[3]ात्महिते जगद्धिते च॥७८॥

तादिति । तत् तस्मात् कारणात् मोक्षमार्गे गमनं सर्वहितावहमित्यस्मात् कारणात् धर्मयुक्तं ममनिर्याणं जगद्धिताय परिगम्य ज्ञात्वा हे तुरगोत्तम वेगः जवः विक्रमः पराक्रमः ताभ्यां हेतुभ्यां स्वात्महिते जगद्धिते च प्रयतस्व प्रयत्नं कुरु । स्वपरो भयहितप्रवृत्तस्य मम अनुकूल्याचरणे स्वपरो भयसाहाय्यं भविष्यतीत्यर्थः ॥ ७८ ॥

इति सुहृदमिवानुशिष्य कृत्ये तुरगवरं नृवरो वनं यियासुः ॥
सि[4]तमसितगतिद्युतिर्वपुष्मान् रविरिव शारदमभ्रमारुरोह॥७९॥

---

१ C शां. २ C वाप्त. ३ H स्वा for स्वा. ४ H सितमतितपनीयवद्वपुष्मान्.

इतीति। इति पूर्वोक्तप्रकारेण वनं यियासुः गंतुमिच्छुः नृवरः सुहृदमिव कृत्ये सितं शुभ्रं तुरगवरं अनुशिष्य असिता असमा गतिद्युतिः गमनोत्साहो यस्य एतादृशः सन् अश्वं आरुरोह। अत्र दृष्टांतः रविः शारदमभ्रमिव ॥ ७९ ॥

अथ स परिहरन्निशीथचण्डं
परिजनबोधकरं ध्वनिं सदश्वः ॥
विगतहनुरवः प्रशांतहेष-
श्चकितविमुक्तपदक्रमं जगाम ॥ ८० ॥

अथेति। अथ आरोहणानंतरं सदश्वः स निशीथे चंडं भयंकरं परिजनबोधकरं ध्वनिं। पादानामितिशेषः। परिहरन् अकुर्वन् इत्यर्थः। विगतहनुरवः प्रशांतहेषः शांतस्वजातीयशब्दः सन् चकितं यथातथा विमुक्तः पदक्रमो यस्मिन् तत् यथातथा जगाम ॥ ८० ॥

कनकवलयभूषितप्रकोष्ठैः
कमलनिभैः कमलानि च प्रविध्य ॥
अवनततनवस्ततोऽस्य
यक्षाश्चकितगतेर्दधिरे खुरान् कराग्रैः ॥ ८१ ॥

कनकेति। कनकवलयभूषितप्रकोष्ठैः कमलनिभैः कराग्रैः अवनततनवः नम्रदेहाः यक्षाः चकितगतेः अस्य अश्वस्य खुरान् दधिरे इत्याद्यन्वयः ॥ ८१ ॥

गुरुपरिघकपाटसंवृता या
सुखमपि द्विरदैरपाध्रियन्ते[2] ॥
व्रजति नृपसुते गतस्वनास्ताः
स्वयमभवन् विवृताः प्रतोल्यः ॥ ८२ ॥

गुरुरिति। गुरुः परिघः प्रतिबंधकाष्ठविशेषो येषां एतादृशानि यानि कपाटानि तैः संवृताः आच्छन्नाः द्विरदैरपि हस्तिभिरपि सुखं न अपाध्रियंते न उद्घाट्यंते एतादृश्यः याः पुरः नगरस्य प्रतोल्यः अभ्यंतरमार्गाः ताः नृपसुते व्रजति गच्छति सति गतस्वना निःशब्दाः सत्यः स्वयमेव विवृताः अभवन् ॥ ८२ ॥

पितरमभिमुखं सुतं च बालं
जनमनुरक्तमनुत्तमां च लक्ष्मीम् ॥
कृतमतिरपहाय निर्व्यपेक्षः
पितृनगरात् स ततो विनिर्जगाम ॥ ८३ ॥

पितरमिति। अभिमुखं पितरं सुतं बालं शिशुं जनं अनुरक्तं प्रेमवंतमित्यर्थः। नास्ति उत्तमा यस्याः सा अनुत्तमा तां सर्वोत्तमामित्यर्थः। एतादृशीं लक्ष्मीं अप-

---

१ C क्रमो. २ C पावि०,

हाय त्यक्त्वा कृतमतिः पूर्णबुद्धिः अतएव निर्व्यपेक्षः निरिच्छः स ततः पितृ-नगरात् विनिर्जगाम् ॥ ८३ ॥

अथ स विकचपंकजायताक्षः
पुरमवलोक्य ननाद सिंहनादम् ॥
जननमरणयोरदृष्टपारो ।
न पुनरहं कपिलाह्वयं प्रवेष्टा ॥ ८४ ॥

अथेति । अथ पुरनिर्गमनानंतरं विकचपंकजायताक्षः प्रफुल्लकमलदीर्घनेत्रः सः पुरमवलोक्य सिंहनादं ननाद । किं ननाद तत्राह—जननमरणयोः अदृष्टपारः अनविलोकितांतः कपिलाह्वयं एतन्नगरं पुनः अहं न प्रवेष्टा ॥ ८४ ॥

इति वचनमिदं निशम्य तस्य
द्रविणपतेः परिषद्गणा ननंदुः ॥
प्रमुदितमनसश्च देवसंघा
व्यवसितपारणमाशंसिरेऽस्मै ॥ ८५ ॥

इतीति । द्रविणपतेः कुबेरस्य परिषद्गणाः किन्नराः । व्यवसितस्य निश्चितस्य राज्यं हित्वा शौद्धोदनेः वहिर्निगमनरूपस्वाभिप्रायस्य पारणं समाप्तिं । स्पष्टम-न्यत् ॥ ८५ ॥

हुतवहवपुषो दिवौकसोऽन्ये
व्यवसितमस्य च दुष्करं विदित्वा ॥
अकृषत तुहिने पथि प्रकाशं
घनविवरप्रसृता इवेंदुपादाः ॥ ८६ ॥

हुतेति । हुतवहवपुष इति शौद्धोदनेः देवानां वा विशेषणं ज्ञेयं । तुहिने पथि शीतयुक्तमार्गे । हिमालये अतिशांतं अद्याप्यनुभूयते । घनस्य मेघस्य विवरात् अंतरालभागात् प्रसृताः इंदुपादा इव चंद्रकिरणा इव प्रकाशं अकृषत अकु-र्वते ॥ ८६ ॥

हरितुरगतुरंगवत्तुरंगः
स तु विचरन्[1] मनसीव चोद्यमानः ॥
अरुणपरुषभावमंतरिक्षं
पवन[2] इवैष[3] जगाम योजनानि ॥ ८७ ॥

हरीति । हरितुरगस्य सूर्यस्य यस्तुरंगः अश्वः तद्वत् सः तुरंगः मनसि चोद्यमान इव । यथा अस्य मनसि अभिप्रेतं तथा प्रेर्यमाण इवेत्यर्थः । विचरन् संचरन् सन्

१ H मनसैव. २ C भारमंतरीक्षं सरसवह्नानि ज०, ३ C इवाभिजगाम.

अरुणवत् परुषभावः काठिन्यं यस्मिन् एतादृशं अंतरिक्षं आकाशं पवन इव वायुरिव योजनानि जगाम ॥ ७७ ॥

इति श्रीषट्पदवाक्यप्रमाणपारावारीणमहामहोपाध्यायश्रीगोपालचार्यान्ते वासिना निगुडकरोपनामकनारायण (दत्तात्रेय) शर्मणा विरचितायां तत्वदीपिकाख्यायां बुद्धचरितसंक्षिप्तव्याख्यायां पञ्चमः सर्गः समाप्तः ॥ ॥ ॥

Buddhacharita, Canto I.

Notes and Translation.

बुद्धचरितम्—बुद्धस्य चरितं वर्ण्यते यस्मिन् तत् *i. e.* बुद्धचरितमधिकृत्य कृतं काव्यम् according to अधिकृत्य कृते ग्रंथे *Pāṇi* IV. iii. 87. For particulars about बुद्ध see Introduction. महाकाव्यं=महत् च तत् काव्यं च महाकाव्यम्. A Kávya is defined variously but the most comprehensive definition is "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" *Ras*: *G.* The Buddhacharita can come in the class of Mahákávyas as it contains the requisite characteristics of that class of compositions. As defined by the Kávyádarsha they are:—

"सर्गबंधो महाकाव्यमुच्यते तस्य लक्षणम् ॥ आशीर्नमस्क्रियावस्तुनिर्देशो-वापि तन्मुखम् ॥ १४ ॥ इतिहासकथोद्भूतमितरद्वा सदाश्रयं ॥ चतुर्वर्गफलोपेतं चतुरोदात्तनायकं ॥ १५ ॥ नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ॥ उद्यानसलिल-क्रीडामधुपानरतोत्सवैः ॥ १६ ॥ विप्रलंभैर्विवाहैश्च कुमारोदयवर्णनैः । मन्त्रदूतप्र-याणाजिनायकाभ्युदयैरपि ॥ १७ ॥ अलंकृतमसंक्षिप्तं रसभावनिरंतरम् ॥ स-र्गैरनविस्तीर्णैः श्रव्यवृत्तैः सुसंधिभिः ॥ १८ ॥ सर्वत्रभिन्नवृत्तान्तैरुपेतं लोकरंजकं ॥ काव्यं कल्पांतरस्थायि जायेत सदलंकृति ॥ १९ ॥

The Sáhitya Darpana is even more precise in the enumeration of the requisites of a Máhàkavya. It says:—

एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः । नातिस्वल्पा नातिदीर्घाः सर्गा अष्टा-धिका इह । सर्गबन्धो महाकाव्यं तत्रैकोनायकः सुरः । सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः । शृंगारवीरशान्तानामेकोऽङ्गी रस इष्यते । अंगानि सर्वेऽपि रसाः सर्वे नाटकसंधयः । क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनं । नानावृत्त-मयः क्वापि सर्गः कश्चन दृश्यते । सर्गांते भाविसर्गस्य कथायाः सूचनं भवेत् । संध्यासूर्येन्दुरजनीप्रदोषध्वांतवासराः । प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः । सं-भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः । रणप्रयाणोपयनमन्त्रपुत्रोदयादयः । वर्ण-नीया यथायोगं सांगोपांगा अमी इह ।

The Buddhacharita is a narration of the deeds of a hero who is सद्वंशः and धीरोदात्तगुणान्वितः. The main *Rasa* running through the poem is शांतरस. The poem is नानावृत्तमय. It is made up of sargas which are neither too long nor too short. It is made agreeable by सर्वत्रभिन्नवृतान्ताः; it has कुमारोदयवर्णन as well as नगरवर्णन. As to

सर्गान्ते भाविसर्गस्य कथायाः सूचनं the notes on the concluding stanzas of each Canto may be consulted. The Kávya, so far as has yet been discovered, does not contain more than eighteen Cantos yet there are good reasons to believe that the original did contain more than the required number. Taken all in all, it can safely aspire to a place among the Mahàkàvyas and contribute to increase the number of the popular "Pancha Máhá Kàvyas." It opens with नमस्क्रिया *viz*: वन्दितोऽर्हत्, which is one of the three forms of benedictions. Moreover, the use of the words श्रियं, चन्द्रमा etc in the first stanza is itself auspicious according to "देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्दास्युर्लिपितो गणतोऽपि वा."

ॐ—This sacred syllable called *Pranava* is uttered as an exclamation at the commencement of a prayer. It is explained in the *Ma'ndukya Upanishad* as made up of अ, उ, and म. "अश्च उश्च मश्च तेषां समाहारः" 'अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः । मकारस्तु स्मृतो ब्रह्मा प्रणवस्तु त्रयात्मकः ॥' In the Vedas it is said to comprehend all the gods. It is एकाक्षरं ब्रह्म. It is said to signify the three spheres of the universe, the three holy fires, the three steps of Vishṇu, and the three Vedas—ओमित्येतत्त्रयोवेदास्त्रयो लोकास्त्रयोऽग्नयः । विष्णुक्रमास्त्रयस्त्वेते ऋक्सामानि यजूंषि च. ॥ The various results that its meditation produces are:—

इत्येतदक्षरं ब्रह्म परमोंकारसंज्ञितम् । यस्तु वेदयते सम्यक् तथा ध्यायाति वा पुनः ॥ संसारचक्रमुत्सृज्य मुक्तसांचितवंधनः । अचलं निर्गुणस्थानं शिवं प्राप्नोत्यसंशयं । ओंकारं परमं ब्रह्म सर्वमन्त्रेषु नायकं । प्रजापतेर्मुखोत्पन्नं तपःसिद्धस्य वै पुरा ॥ यथा पर्णं पलाशस्य शङ्कुनेकेव धार्यते । जपेन दहते पापं प्राणायामैस्तथामलं ॥ ध्यानेन जन्मनिर्वाणं धारणाभिस्तु मुच्यते ॥

It is in short ब्रह्मन् in a single sound. For further information see *Aitareya Bràhman* V. 32, *Manu.* II, 76 and *Gough's Upani.* pp. 68–74. रत्नत्रयाय—रत्नत्रय according to *Nágárjuna* is बुद्धो धर्मःसंघश्चेति=the Buddha, the Law and the clergy, *Vide* 'Sacred Books of the East', Vol. XIII, 83 *f.* and pp. 97–102.

———:o:———

1. Prose Con.—यस्य न उपमा स पराध्यां श्रियं विदधत् [अतः] विधातृजित्, तमो निरस्यन् [अतः] अभिभूतभानुभृत्, निदाघं नुदन् [अतः] जितचारुचन्द्रमाः [एतादृशः] अर्हत् इह वन्दितः ।

Notes—उपमा—Comparison, semblance, parallel. पराध्यां—immense, plentiful. 'परार्ध्याग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम्' *Amara*; for the use of the word *cf. Ja'naki* I. 1. श्रियम्—श्रीः affluence, wealth. I

would take the word in this sense instead of 'happiness' as has been done by Prof. Cowell, since the poet is describing the wealthy condition of the city. Moreover, I find no authority for 'happiness' as the meaning of the word. **विधातृजित्**—विधातारं जयति सः one who surpasses *Vidha'ta'*—the creator. **तमोनिरस्यन्**—तमः निरस्यते सः one who dispels darkness. The word तमस् *n.* signifies 'darkness' as opposed to light; *Cf. Meg.* I. 37. It is also used to signify 'ignorance or mental illusion'. "अत्यागश्चाभिमानश्च मोहो मन्युस्तथाऽक्षमा। मत्सरश्चैव भूतेषु तामसं वृत्तमिष्यते" ॥ *Cf.* मम च मुक्तमिदं तमसा मनः Sha. VI. 7. तस्मै स्मरणमात्रेण तुभ्यं सद्यस्तमोनुदे। नमः *Jánaki* II. 16. **अभिभूतभानुभृत्**—भानून् (किरणान्) बिभर्ति सः भानुभृत् one possessing rays (भानुरश्मिदिवाकरौ *Amara. Cf.* सहस्रभानुः, अभिभूतः पराजितः भानुभृत् येन सः अभि०-भृत् one who has thrown the sun in the shade *i. e.* excelled the sun. भृत् is used at the end of a word in the sense of 'possessing,' 'having' *Cf. Kir.* II. 44. **निदाघ**—heat, *fig.* worldly anxieties. **नुदन्** *pre. part.* of नुद् *Ubh* 1st Conj. to dispel, to drive away. *Cf.* अदस्त्वयानुन्नमनुत्तमं तमः *Ma'.* I. 27; *Rag* VI. 68. निदाघकालोऽयमुपागतः प्रिये *Ritu* I. **जितचारुचन्द्रमाः**—जितः चारुचन्द्रमाः येन सः जित०—चन्द्रमाः one who has excelled the pretty moon. **अर्हत्**—a perfected saint, a Buddha; one belonging to the highest rank in the Buddhistic hierarchy; see *Sarvadarshana Sangraha* p. 33.

The metre of the stanza is वंशस्थ.

Translation.-Here is saluted that Arhat who has no equal, who, in consequence of conferring abundance of wealth, surpasses the Creator—Brahmá—who, as dispeller of darkness has excelled the sun; and who has put into insignificance the pretty moon by destroying all heat.

2. Prose Con.—महर्षेः कपिलस्य वास्तु पयोदपङ्क्त्या विशालोन्नतसानुलक्ष्म्या इव परीतपार्श्वं गगने अवगाढं उदग्रधिष्ण्यं पुरम् आसीत्।

Notes.—महर्षेः=महांश्चासौ ऋषिश्च, तस्य The Rishis are classified as Ra'jarshi, Rishi, Maharshi and Bramharshi. A Rajarshi is a King or one belonging to the Military class who rises gradually step by step by continuous practice of religious austerities. For a more detailed information see *Ra'ma'yana* I. 57 to 65. **कपिलस्य**—Kapila was a great sage said to have been the founder of the *Sa'nkhya* philosophy. **वास्तु**—Dwelling-place, residence. *Va'stu* is primarily the plinth on which a house is erected. *Amarasinha* gives this word to signify 'the site on which a house is erected. 'वेश्मभूर्वास्तुरस्त्रियाम्.' In the *Manusmriti* III. 17, it is used in

Notes.—**व्याधि०...फेनात्**—व्याधयः (physical ailments as opposed to आधि. *cf.* आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते *Vair.* 105) एव विकीर्णफेनः यस्मिन् तस्मात्. **जरातरंगात्**—जरा एव तरंगः यस्मिन् तत् *cf.* तृष्णातरंगाकुला *Vai.* 45. **मरणोग्रवेगात्**—उग्रश्चासौ वेगश्च उग्रवेगः; मरणस्य उग्रवेगः यस्मिन् तस्मात्. **दुःखार्णवात्**—दुःखस्य अर्णवः (ocean अर्णांसि सन्ति यस्मिन्. The dropping of स and its replacement by व is accord. to *Vârtika.* अर्णसो लोपश्च on केशाद्वान्यतरस्याम्. *Pani.* V, ii, 109. 'उदन्वानुदधिः सिन्धुः सरस्वान्सागरोर्णवः' *Ama.* Sanskrit poetry abounds in expressions where अर्णव and its synonyms are used to express profusion or greatness; *cf.* संसारार्णव, शोकसागर; मोहार्णव etc.) तस्मात्. **उह्यमानं**—*Pre. pas. par.* of वह् to bear. **आर्तम्**—Distressed, afflicted; *cf.* क्रोधरोधार्तचेतसि *Ja.* II, 46. **ज्ञानमहाप्लवेन**—महान् चासौ प्लवश्च महाप्लवः; (प्लव a boat उडुपं तु प्लवः कोलः *Ama. cf.* सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यति *Bha. G.* IV, 36) ज्ञानं एव महाप्लवः तेन.

Translation.—He will carry across this distressed world which deserves to be delivered by the knowledge-boat from the ocean of misery which is covered with foam in the form of sickness, old age for its waves, and the dreadful rushing onflow in the form of death.

76. Prose Con.—अस्य प्रज्ञांबुवेगां स्थिरशीलवप्रां समाधिशीलां व्रतचक्रवाकां प्रवृत्तां उत्तमां धर्मनदीं तृष्णार्दितः जीवलोकः पास्यति ।

Notes.—**प्रज्ञा०...वेगा**=प्रज्ञा (intelligence, wisdom) एव अम्बु (water) तस्य वेगः (rush, flow) यस्यां तां. **स्थिर०...वप्रां**=स्थिरं च तत् शीलं (*n.* good disposition, character, शीलं स्वभावे सद्वृत्ते *Ama. cf.* शीलं परं भूषणं *Niti.* 82) च; तत् एव वप्रः (embankment; the side of a river-basin. वप्रः प्राकाररोधसोः *Vai. cf.* वप्रान्तः स्खलितविवर्तनं पयोभिः *Ki.* VII, 11) यस्याः

सा तां. **समा०...शीतां**=समाधिना (समाधिः [from समाधा 3rd Con. Ubha. to concentrate, fix steadily]—perfect absorption of thought into the one object of meditation *i. e.* the supreme spirit) शीता, तां. **व्रत०...वाकां**—व्रतानि (religious observances) एव चक्रवाकाः यस्याः तां. The Chakravâka is supposed to be the red-goose (*Anas casarka*). The male and female of these birds keep together during the day and are looked upon as patterns of constancy and connubial affection; but the legend is that they are doomed to pass the night apart. Accordingly as soon as night commences, they take up their station on opposite banks of a river and call to each other in pitious cries." **प्रवृत्तां**—unimpeded *cf. Bhag. G.* XVII, 24. **धर्मनदीं**=धर्म एव नदी तां. **तृष्णार्दितः**—तृष्णया अर्दितः (afflicted, tormented; from अर्द् 1st *conj. Pa.*) **जीवलोकः**—the animal world. Compare with this आशा नाम नदी etc. *Niti.*

Translation.—The animal world, tormented with thirst, will drink of the unimpeded excellent stream of the Law rushing with the water of wisdom, enclosed within the banks of steady good disposition, cool with contemplation, having religious observances for ruddy geese.

77. Prose Con.—हि एषः मार्गप्रनष्टेभ्यः अध्वगेभ्यः इव संसारकांतारपथस्थितेभ्यः दुःखार्दितेभ्यः विषयावृतेभ्यः विमोक्षमार्गं आख्यास्यति।

Notes.—**अध्वगेभ्यः**—अध्वानं (अध्वन् m. a way,) गच्छति असौ अध्वगः (अध्वनीनोऽध्वगोऽध्वन्यः *Ama*). **संसा०...स्थितेभ्यः**=संसारः एव कांतारः (a dense forest; महारण्ये दुर्गपथे कान्तारः पुंनपुंसकम् *Ama.*) तस्य पन्था (पथिन् a path. The word पथिन् becomes पथ at the end of a compound). सं०—पथः; तस्मिन् स्थिताः, तेभ्यः. This compound belongs to that class which is technically known as the आहिताग्न्यादि. **विष...तेभ्यः**—विषयैः (by sensual pleasures, objects of sense) आवृताः (surrounded), तेभ्यः **विमोक्षमार्गम्**—the path of liberation.

Trans.—This (child) will proclaim the way of deliverance to those standing on the path of the forest of worldly existence, tormented with troubles, and surrounded by sensual pleasures, as (is done) to travellers who have lost their way.

78. Prose Con.—लोके विषयेन्धनेन रागाग्निना विदह्यमानाय जनाय आतपांते वृष्ट्या महामेघ इव अयं धर्मवृष्ट्या प्रह्लादं आधास्यति।

Notes.—**लोके**—in this world लोकस्तुभुवने जने *Ama.* **विषये०**—विषयाः (worldly or sensual objects. There are five विषयs corresponding to the five organs of sense) एव इन्धनानि (faggots, fuel

इन्धनं त्वेध इध्म *Ama.*) यस्य तेन. **रागाग्निना**—रागः (passion, pleasure, *cf.* एको रागिषु राजते *Bhar.*) एव अग्निः, तेन. **आधास्यति**—will produce, will impart. (आधा 3rd *conj. Ubha.*) in this sense the verb governs the dative, genitive, or locative.

Translation.—In this world this (child) will engender excessive delight by showering (his) law among the masses who are being burnt with the fire of desire enkindled by the fuel of sensual objects as a great cloud does (with its shower) at the close of the hot season.

79. Prose Con.—अयं दुरासदेन उत्तमेन सद्धर्मताडेन प्रजानां अपयानहेतोः तृष्णार्गलं मोहतमः कपाटं द्वारं विपाटयिष्यति ।

Notes.—**दुरासदेन**—दुःखेन आसाद्यते असौ (unapproachable, difficult to be gained at *cf.* स बभूव दुरासदः परैः *Ra.* VIII, 4. **सद्धर्मताडेन**—सद्धर्मः एव ताडः (a blow, a knock.) **अपयानहेतोः**— (अपयान–Escape, flight ; अपयानस्य हेतुः (object, motive) तस्य *cf.* अल्पस्य हेतोर्बहु हातुमिच्छन् *Ra.* II, 47. **तृष्णार्गलं**—तृष्णा (thirst or greed of gain *cf.* तृष्णां छिंदि *Bhartṛi.* न भोगतृष्णया *Ra.* VIII, 2) एव अर्गलः (a wooden bolt or long spar of wood which can be laid across the shutters and thus secure them). **मो०...कपाटं**—मोहः एव तमः मो०—तमः; मो०—तमः एव कपाटः or मोहश्च तमश्च मोहतमसि, ते एव कपाटौ (panels, shutters *cf.* दलितदलकपाटः *Ma.* XI, 60) यस्य तत्. **द्वारं**—a gate, a door-way; *cf.* द्वारं द्वारं प्रवृत्तो वरमुदरदरीपूरणाय *Bhartṛi.*). **विपाटयिष्यति**=Will open *cf.* with this stanza *Bhartṛi's* line स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपिनोपार्जितः.

Trans.—This (child) will open, by the excellent stroke of the good Law which is so hard to get, for the escape of the people, that door whose shutters are delusion and ignorance, and the bolt is cupidity.

80. Prose Con.—एषः धर्मराजः संबोध्य दुःखाभिभूतस्य निराश्रयस्य प्रमोहपाशैः परिवेष्टितस्य लोकस्य बंधनमोक्षं करिष्यते ।

Notes.—**संबोध्य**—By instructing. **दुःखाभिभतस्य**—दुःखैः अभिभूतः (defeated, overcome), तस्य. **बंधनमोक्षं**—बंधनात् मोक्षं (deliverance). Deliverance from the trammels of this world.

Translation.—This King possessing Dharma will, by preaching, achieve the deliverance from its bonds that world, which, is circumvented by webs of its own delusion, which is helpless and which is overcome by misery.

81. Prose Con.—तत् इमं प्रति शोकं मा कृथाः । हे सौम्य मनुष्यलोके मोहेन वा कामसुखैः वा मदात् यः अस्य नैष्ठिकं धर्मं न श्रोष्यति सः शोच्यः हि ।

Notes.—**माकृथाः** *vide Sta.* I. 72. **वा**=or; an alternative conjunction. "वा समुच्चय एवार्थे उपमानविकल्पयोः". **नैष्ठिकं**—*a.* highest, perfect. **शोच्यः** *Pot. Pas. Par.* by the addition of य conveying the sense of 'must' or 'necessity'. For fuller explanation *vide* Ap. G. § 155.

Translation.—Therefore, do not be sorry for him. Oh good lord ! He who will not give his ear to the most perfect Law of his either through illusion or the pleasures of desire or through arrogance in this mortal world should be pitied.

82. Prose Con.—अतः तस्मात् गुणात् भ्रष्टस्य मे ध्यानानि लब्ध्वा अपि अकृतार्थता एव। तस्य धर्मस्य अश्रवणात् त्रिदिवे अपि वासं विपत्तिं अहं मन्ये हि।

Notes.—**तस्मात् गुणात्** *i. e.* the acquisition to be gained from धर्म. **भ्रष्टस्य**—Fallen. **अकृतार्थता**—the condition of not having fulfilled (my) purpose. **त्रिदिवे**—त्रिदिव The heaven. "ब्राह्मवैष्णवरौद्रभेदेन सात्त्विकराजसतामसभेदेन वा त्रिविधो दीव्यति व्यवहरति, प्रकाशते वा." तिसृष्वप्यवस्थासु त्रयो ब्रह्मविष्णुरुद्रा वा दीव्यन्त्यत्रेति त्रिदिवः.

Translation.—Therefore, since I have fallen from the acquisition to be gained from it (Dharma), although I have secured the various contemplations yet mine is the condition of not having fulfilled my purpose. In consequence of not having heard his Law I consider my residence even in the Heaven to be nothing but misery.

83. Prose Con.—इति श्रुतार्थःससुहृत् सदारः नरेंद्रः विषादं त्यक्त्वा मुमुदे। एवंविधः अयं मम तनयः इति सः स्वां सारवत्तां मेने हि।

Notes.—**श्रुतार्थः**—श्रुतः अर्थः (explanation) येन. **ससुहृत्**—(सुहृत्= शोभनं हृदयं अस्य) सुहृद्भिः सह इति ससुहृत्. सह forming the first member of a compound becomes स by *Pāṇ.* VI. iii. 78-80. **सदारः**=दारैः सह इति. The word दार is always in the plural. **विषाद** Dejection, depression of spirits. *cf.* विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदं *Bhar.* **एवंविधः** (एवं an *ind.* frequently used in the sense of 'in this manner' ' एवं प्रकारोपमयोरंगीकारेऽवधारणे '.)

Translation.—Having heard this explanation, the king, with his friends and his queens, abandoned all dejection and was rejoiced; and thinking 'such is my son' he considered that excellence was his own.

84. Prose Con.—आर्येण मार्गेण सः यास्यति न खलु असौ अप्रियधर्मपक्षः इति नरेंद्रः हृदये सत्यं चकार संताननाशात् तु भयं ददर्श।

Notes.—**आर्येण**=आर्यः *adj.* honourable, worthy of or becoming

to an Arya. आर्य is " कर्तव्यमाचरन् कार्यमकर्तव्यमनाचरंस्तिष्ठति प्रकृताचारे सवै आर्य इति स्मृतः ". **यास्यति** This use of the 2nd or simple future is noteworthy. The use of the second Future refers to a future time generally or indefinitely as also to a near future action *cf.* यास्यत्यद्य शकुंतलेति *Sha.* IV. For further information see *Ap. G.* § 214. **अ०...पक्षः**—न प्रियः अप्रियः disagreeable, unbecoming; अप्रियश्चासौ धर्मश्च अ०धर्मः; स एव पक्षः (state condition, adherence) यस्य सः. **तु**—however, on the other hand. तुपादपूरणे भेदे समुच्चयेऽवधारणे। पक्षांतरे वियोगे च प्रशंसायां विनिग्रहे *Medi.* It may be borne in mind that तु is never used in the beginning of a sentence while परंतु, किंतु always stand first. **सं०नाशात्**—The use of the ablative is according to the rule भीत्रार्थानां भयहेतुः *Paṇi.*

Translation.—The king was convinced in his mind that he would follow an honourable path and that he would never adhere to any unbecoming rules of conduct; however, he evinced fear about the loss of his child.

85. Prose Con.—अथ असितः मुनिः सुतविक्लवाय राज्ञे सुतनियतं तत्त्वं निवेद्य सबहुमतं उदीक्ष्यमाणरूपः [सः] पवनपथेन यथा आगतं जगाम।

Notes.—**सुतविक्लवाय**—सुतस्य विक्लवः (fright, alarm) यस्य तस्मै सुतविक्लवाय. **सुतनियतं**=सुतस्य नियतं fixed, positive, definite; *cf.* प्रकृतिनियतत्वादकृतार्थः *Utta.* VI, 14. **तत्त्वं**—True state or condition, fact; *cf.* वयं तत्वान्वेशान्मधुकरहताः *Sha.* I, 24. **सबहुमतं**=बहुमतेन सह यथा स्यात्तथा (बहुमत great estimation or respect). **उदीक्ष्यमाणरूपः**—उदीक्ष्यमाणं (*Pre. Pass. Par.* formed by adding मान to the passive base in य) रूपं येन सः. **पवनपथेन**—पवनस्य पन्था पवनपथः (note the change of पथिन् at the end of a compound *vide* st. 62.) तेन. **यथा** by itself means 'in the manner mentioned.' 'यथा निदर्शने' *Abhidhâ.*

Translation.—Then the sage Asita, having narrated the correct state about the boy to the King, who was alarmed about him, departed by the ariel route by which he had come, as described, while his figure was being watched with great veneration.

86. Prose Con.—सः साधुः अनुजासुतं दृष्ट्वा मुनिवचनश्रवणे च तन्मतौ च कृतमतिः (सन्) बहुविधं अनुकंपया प्रियसुतवत् विनियोजयांचकार।

Notes.—**साधुः** refers to the elder brother of Mâyâ Devi. " This was Naradatta, see Lalitvistara chap. VII, pp. 103–110 " *Cowell.* **अनुजासुतं**=अनुजायाः (अनुजा younger sister. अनुजाता अनुजा accord. to *Pâṇi.* III. ii. 99) सुतः, तं. **तन्मतौ**—तस्य मतिः (knowledge). **कृतमतिः**—कृता मतिः (mind) येन सः. **बहुविधं**—बह्वयः विधाः (sorts) यथा स्यात्तथा. **अनुकम्पया**—out of tenderness, or sympathy.

Translation.—That good person, having seen the son of his younger sister, and having made up his mind with regard to the listening of the words of the sage and with regard to the knowledge about him (boy) enjoined him with sympathy in various ways, as if he were his own son.

87. Prose Con.—पुत्रजन्मतुष्टः नरपतिः अपि प्रियतनयः (सन्) विषयमतानि बंधनानि विमुच्य तनयस्य जातकर्म यथावत् कुलसदृश अचीकरत्।

Notes.—**पुत्र०...तुष्टः**=पुत्रस्य जन्म, तेन तुष्टः. **विप०—तानि**...विषयाः एव मतानि येषां तानि. **प्रिय—तनयः**=प्रियः तनयः यस्य सः प्रि०—तनयः. **जात-कर्म**—a ceremony performed at the birth of a child when the naval-string is divided. It consists in touching the infant's tongue thrice with ghee after appropriate Mantras; see *Prayoga Ratnakara* and *Raghu.* III, 18.

Translation.—The monarch also, being well pleased at the birth of a son, and to whom he was very dear, having cast aside all mundane bonds, caused the birth-ceremony of the child to be gone through as enjoined and in a manner suited to the family.

88. Prose Con.—एव च दशसु अहःसु परिणतेषु (सत्सु) प्रयतमनाः परया मुदा परीतः सः सुतस्य जपहोममंगलाद्याः परमतमाः देवतेज्याः अकुरुत।

Notes.—**परिणतेषु**—Fully elapsed. The construction is *loca. absolute.* **प्र०—मनाः** =प्रयतं (curbed, restrained, purified by austerities or religious observances ; *cf.* समादिदेश प्रयतां तनूजां *Ku.* I, 58) मनः यस्य सः. **परया**—(पर highest, greatest). **मुदा** *instru. Sing.* of मुद् *f.* joy, delight; मुत्प्रीतिः प्रमोद *Ama.* **परीतः** enveloped in (from परी 2nd *Par. cf.* कोपपरीतमानसं *Ki.* II, 25) **परमतमाः** =परा मा शोभा यस्य सः परमः excellent. The addition of the superlative termi. तम gives it a still higher degree and may be rendered by 'most excellent.' **जप०—द्याः**=जपः (repeating prayers in an undertone; counting the beads of a rosary) च होमः (a sacrifice) च मंगलं च ज०—मंगलानि; ज०—मंगलानि आदि यासां ताः ज०—द्याः. **देवतेज्याः** =देवतानां इज्याः (sacrifices, *cf.* सोऽहमिज्याविशुद्धात्मा *Ra.* I, 68.)

Translation.—After the expiration of ten days, in this manner, the king, with his thoughts kept under restraint and drowned by excessive joy, offered for his son most splendid sacrifices to the gods with muttered prayers, sacrifices, and all kinds of auspicious ceremonies.

89. Prose Con.—अपि च सुतवृद्धये शतसहस्रपूर्णसंख्याः स्थिरबलवत्तनयाः सहेमशृंगीः अनुपगतजराः पयस्विनीः गाः स्वयं द्विजेभ्यः अदात्।

Notes.—द्विजेभ्यः Mark the use of the dative of the indi. object in the sense of *Sampradâna*. **स्थिर०नयः**—स्थिरं च तत् बलं च स्थिरबलं steady strength; स्थिरबलं अस्यास्तीति स्थिरबलवान्; स्थि०—बलवन्तः तनयाः यासां ताः. **सहेमशृंगीः**=हेम्रा खचितानि शृंगाणि हेमशृंगाणि हेमशृंगैः सहिताः सहेमशृंगीः. Those who had horns coated with gold. **अनु०जराः**—न उपगता (प्राप्ता) जरा. The change of न to अन् before a word beginning with a consonant has already been alluded to. अनुपगता जरा यासां ताः. **पयस्विनीः**—पयः आसां अस्तीति पयस्विनी. **गाः** accu. plu. of गो *fem.* a cow. **अदात्** *Aorist.* 3rd sing. of दा to give.

Translation.—Likewise he (the king) himself gave hundreds and thousands of milch cows who had powerful calves whose horns were coated with gold and who were young.

90. Prose Con.—ततः बहुविधविषयाः स्वहृदयतोषकरीः क्रियाः विधाय यतात्मा मुदितः सः गुणवति दिवसे शिवे मुहूर्ते पुरप्रवेशे मतिं अकरोत् ।

Notes.—ब०विषयाः—बहुविधाः विषयाः (subject-matter, details) यासां ताः **स्व०तोषकरीः**—स्वस्य हृदयं तस्य तोषः तं करोतीति स्व०—करः the feminine of it is formed by adding ई. **यतात्मा**=नियतचित्तः self-restrained यतः आत्मा (mind) येन सः *cf.* स कृत्तिवासास्तपसे यतात्मा *Ra.* I, 54. **गुणवति दिवसे**=पंचांगशुद्ध्यादि गुणयुक्ते दिवसे. The five Angas of an auspicious day are तिथिर्वारश्च नक्षत्रं योगः करणमेव च. **शिवे**—(शिवं भद्रं कल्याणं *Ama.*) **मुहूर्ते**–मुहूर्त is technically an auspicious moment.

Translation.—That delighted king, who had his mind under control, performed various rites in full detail, which gave satisfaction to his heart, and he made up his mind to enter his city at an auspicious moment on a propitious day.

91. Prose Con.—अथ तनयवती देवी देवताभ्यः प्रणिपत्य शिवाय द्विरदरदमयीं महार्हां सितसितपुष्पभृतां मणिप्रदीपां शिबिकां अभजत ।

Notes.—तनयवती—तनयः यस्याः अस्ति सा. The use of the मतुप् termi. has been so often explained that it need not be detailed here except the fact that the म of मत् is changed to व when affixed to words ending in म् or अ short or long or having either for their penultimate " मादुपधायाश्च मतोर्वोऽयवादिभ्यः " *Pâṇi.* VIII ii, 9. **देवी**—The queen माया. **देवताभ्यः** Verbs meaning to salute प्रणिपत् may govern the Dative or Accusative *cf.* प्रणिपत्यसुरास्तस्मै शमयित्रे सुरद्विषां *Ra.* X, 15. **शिवाय**—for the purpose of, with the object of, securing welfare. **द्विरदरदमयीं**=made of ivory ; (by the addition of मयट् in the sense of ' made of ' is according to *Pani.* IV, iii, 143). द्विरदानां (द्वौ रदौ अस्य इति द्विरदाः) रदाः (रदना दशना दन्ता रदाः *Ama.*) द्वि०—रदाः द्विरदरदानां विकारः द्विरदरदमयः. The *femi.* is

formed by the addition of ई. **महर्हां**—महान् अर्हः price, (*cf.* महार्हशय्यापरिवर्तनच्युतैः *Ku.* V. 12). यस्याः सा, तां. **सितसितपुष्पभृतां**—सितेभ्यः सितानि सितसितानि, white among the white *i. e.* pure white, तानि च तानि पुष्पाणि भ्रीयते सा, तां. **मणिप्रदीपा**=मणयः एव प्रदीपाः यस्याः तां. **शिबिकां** A palanquin. **अभजत**—resorted to, entered.

Translation.—The queen with her son, having saluted the goddesses for good future, entered a costly palanquin made of elephant's tusks (ivory), decorated with pure white flowers, and blazing with gems.

92. Prose Con.—अथ स्थविरजनानुगतां अपत्यनाथां पत्नीं पुरतः प्रवेश्य अमरैः अर्च्यमानः मघवान् दिवं इव पौरसंघैः अर्च्यमानः नृपतिः पुरं जगाम.

Notes.—**स्थवि०...गतां**—स्थविराश्च ते जनाश्च, तैः अनुगतां followed, attended upon. **अपत्यनाथां**—अपत्यस्य नाथा=possessor of child or अपत्येन नाथा as in सनाथीक्रियतां इदं आसनं *Shaku.* **पुरतः**—in front of, as opposed to पश्चात् *cf.* पश्यामि तामित इतः पुरतश्च पश्चात् *Mal.* I, 43. **मघवान्**—Indra. The form मघवान् of Nom. sing. may appear strange to the general reader. There is a long discussion about it in the भाष्य but for the form there is an instance in the Bhatti-Kavya "हविर्जक्षति निःशंको मखेषु मघवानसौ. by the *Sûtra* मघवा बहुलम् *Pâṇi.* VI. iv. 128. The Nomi. of the word has three forms मघवा, मघवन् and मघवान्. **पौरसंघैः**=पुरे भवाः पौराः (citizens *cf.* पुरः पौराणां समुच्चरति चर्चरीध्वनिः *Ratna.* I, L. 80.) पौराणां संघाः, groups, तैः.

Translation.—Having caused his wife, with her child, first to enter the city, the King himself, welcomed by multitudes of citizens, entered it like Indra welcomed by the immortal gods in the heavens.

93. Prose Con.—शाक्यराजः षण्मुखजन्मना भव इव प्रतीतः भवनं विगाह्य हर्षपूर्णवक्त्रः (सन्) इदं इदं इति बहुविधपुष्टियशस्करं व्यधत्त ।

Notes.—**षण्मुखजन्मना**—षण्मुख is "the Hindu Mars or God of War, generated from the vivifying principle of Shiva cast into Agni," see note on अग्निसूनु I. 66. Another account of his birth says that Shiva emitted sparks of fire from his eyes which being thrown into the lake Saravaṇa became six infants who were nursed by the wives of Rishis. When Pârvati saw the children she was so transported that she embraced all of them so forcibly that their six bodies became one while their six faces and twelve arms remained. **भव**—the God Shiva; व्योमकेशो भवो भीमः *Ama.* **प्रतीतः**—(pleased, delighted *cf.* पतिः पतीतः प्रसवोन्मुखीं प्रियां ददर्श काले

दिवमश्रितामिव *Ra.* III, 12). **हर्ष०—वक्त्रः**=हर्षेण पूर्णं (विकसितं) वक्त्रं यस्य सः. **इदं इदं**—This and this. The repetition of the pronoun is noteworthy. *e. g.* आर्येण खलु तेषु तेषु विरागकारणेषु परिहीयमाणेषु *Mudra.* I. p. 38. **बहु०—स्करं**=पुष्टिः च यशः च पुष्टियशसि, ते करोति तत् पुष्टियशस्करं, बहुविधं च तत् पुष्टियशस्करं च ब०—स्करं.

Translation.—The Shâkya king, highly gratified like Bhava by the birth of the six-faced one, entered his palace and with his face full of joy performed this and that thing (various things) calculated to impart vigour and renown.

94. Prose Con.—इति नरपतिपुत्रजन्मवृध्द्या सजनपदः कपिलाव्हयं तत् पुरं नलकूबरप्रसूतौ अप्सरोऽवकीर्णं धनदपुरं इव मुदितं अभूत्।

Notes.—**नर०.. वृद्ध्या**—नरपतेः पुत्रः तस्य यत् जन्म तेन वृद्धिः तया. **सजनपदः**—जनपत् 'the country as opposed to the town *cf.* ब्रह्मावर्तं जनपदमथच्छायया गाहमानः *Me.* 51 and जनपदवधूलोचनैः पीयमानः *ibd* 16. It is not to be taken here in the sense of जनपद=subjects as in जनपदहितकर्ता त्यज्यते पार्थिवेन. **कपिलाव्हयं**=named *Kapila.* आव्हय in the sense of 'named', forms the last member of a compound *e. g.* 'रामायणाव्हयं.' **धनदपुरं**=(धनं दयते पाल्यते असौ धनदः Kubera, the god of wealth; मनुष्यधर्मा धनदो राजराजो धनाधिपः *Ama.*) धनदस्य पुरं *viz.* अलका the city of the god of wealth. **नलकू०प्रसूतौ**—नलकूबरस्य (नलकूवर also नलकूबर the son of Kubera (नलः a kind of reed, कूवरः the pole of a carriage, यस्य सः) प्रसूतिः birth; तस्यां. **अप्स०—कीर्णं**=अप्सरोभिः (अप्सरस् *fem.* the singing damsel of heaven अप्सरसः स्ववेंश्या उर्वशीमुखाः This is an irregular word. The word अप्सरा is also allowed according to the Bhâsyakâra on the strength of "अनचि च" *Pâṇi.* VIII, iiii. 47). **अवकीर्णम्**—scattered over, filled *cf.* किमपैति रजोभिरौर्वरैरवकीर्णस्य मणेर्महार्घता *Ma.* XVI, 27. The celebration of joy at the birth of a son by singing parties and other festivities among Oriental princes is well-known.

Translation.—Then, by the addition to the family of the king in consequence of the birth of a son to him, that city, known as Kapila together with the country, was delighted as was the city of the God of wealth full of heavenly damsels at the time of the birth of Nalakûbara.

Canto II.

1. **Prose Con.**—सः राजा जन्मजरांतकस्य आत्मविदः तस्य आत्मजस्य आजन्मनः सिंधुः अंबुवेगैः इव अहनि अहनि अर्थगजाश्वमित्रैः वृद्धिं ययौ ।

Notes.—**जन्म०...कस्य**= (*see* I, 54 *supra.*) जन्म च जरा च; तयोः अंतकस्य (अंतं करोति इति अंतकः destroyer; *cf.* स्वयमिह जगतामंतकस्यांतकोऽहं *Veni.* III, 30). **आत्मविदः** *gene. sing.* of आत्मविद्=आत्मानं वेत्ति इति. The word आत्मन् is one of the mysterious words in Sanskrit metaphysics, and it has been so variously and vaguely used in literature that it is not quite easy to give its precise meaning. 'One who knows आत्मन्' may be taken to signify 'one who has grasped what (*a*) One *himself* is, (*b*) one who has realised the principle of life and sensation, or (*c*) one who has comprehended the Supreme Deity and Soul of the universe. 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च' *Ama.* The reading **आत्मजितः** may be explained to be 'who has subdued himself' or 'who has surpassed him *i. e.* the king'. In the latter case the use of आत्मा in the sense of 'myself' meaning the king, who may be said to be the speaker, may be noted. **आजन्मनः**= from the time of birth. The preposition आ is used with the ablative in various senses "आङ् मर्यादाभिविद्धयेः" *Pâṇi.* III, i. 13. Here it is used in the sense of अभिविधि 'limit inceptive' as opposed to मर्यादा 'limit exclusive or conclusive' *cf.* आजन्मनः शाठ्यमाशिक्षितो यः *Sha.* III, 25. **अहनि अहनि**= From day to day, every day. The repetition वीप्सा of the word अहन् here indicates gradual progress. *cf.* दिने दिने सा परिवर्धमाना *Ku.* I, 25. **सिंधु**=नद a large river which receives numerous tributaries along its course and increases in size as opposed to a stream. सिंधुः समुद्रे नद्यां च नदे देशभेदानयोः *Vishva.* **अर्थ०...मित्रैः**—अर्थ (wealth) च गजाश्च अश्वाश्च मित्राणि च; तैः The *instru.* here is in the sense of करण 'means'. **ययौ**—3rd *Sing.* of the *Perf.* of या to go.

Translation.—The king, ever since the birth of that son—who had cut short all birth and old age, who had comprehended what the Supreme Deity and the Soul of the universe was,—rose in greatness from day to day by [the acquisition of] riches, elephants, horses, and friends.

2. **Prose Con.**—तस्य तस्य धनस्य रत्नस्य च कृताकृतस्य कांचनस्य एव च एकात्मनिधिः अपि [सः] मनोरथस्य अतिभारभूतान् नव अपि निधीन् जिगाय ।

Notes.—तस्य तस्य—Various, several. The repetition of a word to convey the sense of 'variety' 'intensity' *etc.* is by the general rule नित्यवीप्सयोः *Pâṇi.* VIII, i, 4; *cf.* तेषु तेषु रम्यतरेषु स्थानेषु तया सह तानि तान्यपरिसमाप्तानि...सर्वसुखानि अनुभवंतः *Kadam.* p. 369. **कृताकृतस्य**=wrought as well as unwrought. हेमरूप्ये कृताकृते *Ama.* कृतं च अकृतं च कृताकृतं, तस्य; This is a *Samahâra Dwanda.* **एकात्मनिधिः**=आत्मनः निधिः (treasure नितरां दधाति or निधीयते असौ); एकः आत्मनिधिः यस्य सः. **मनोरथस्य**—मनोरथः=मनः एव रथः अत्र or मनः रथः इव a wish, a desire, इच्छा कांक्षा स्पृहेहा तृड्वांछा लिप्सा मनोरथः *Ama. cf.* मनोरथानामगतिर्न विद्यते *Ku.* V, 64. Mark the play upon the word मनोरथ in its literal sense in conjunction with अतिभारभूतान्. **अति०...तान्**—अतिशयितश्चासौ भारश्च अतिभारः तं भूतान्. **नव**=nine. The treasures of Kubera are said to be nine 'महापद्मश्च पद्मश्च शंखो मकरकच्छपौ। मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव'. The reading of J makes a very good sense when बहु च तत् अर्थं च बह्वर्थं, तस्य निधयः तान्. **अवापि** *Ao.* 3rd *Sing.* of आप् to obtain. नैक appears to have been construed by Prof. Cowell in the sense of 'manifold'; **जिगाय**—*Perf.* 3rd *Sing.* of गा 3rd Conj. Par. 'to obtain' to acquire.

Translation.—He, the possessor of one single treasure consisting of various sorts of coin, jewellry, and wrought and unwrought gold, came into the possession of nine treasures which were even too great to be longed for (*lit.* too heavy for the mind vehicle to conceive).

3. Prose Con.—यैः पद्मयुक्तैः परद्विपेंद्रैः अदः मंडलं अभियातुं न शक्यं ते मदोत्कटाः हैमवताः गजाः यत्नात् विना अपि एनं उपतस्थुः।

Notes.—पद्मयुक्तैः—पद्मैः युक्ताः (Padmas are the rings put as decorations on the tusks of elephants; they are made either of some precious metal or of brass; or (2) the decoration on the trunks of elephants. Whenever elephants are taken out their tusks are adorned with rings and their trunks and foreheads are painted. Prof. Cowell takes पद्म as the elephant guarding the southern quarter. I have not been able to trace this meaning. **परद्विपेंद्रैः**—परेषां (पर a person greater than oneself दूरानात्मोत्तमाः पराः *Amara.* Some lexicographers give पर in the sense of 'an enemy' only, परः श्रेष्ठारि दूरान्योत्तरे *Medi.* It is used in the latter sense in *Ra.* III, 21 and in various other places. Here it may be taken in the sense of 'superior or more powerful enemies.' पर and अपर are literally indicative of the position of a locality. *Kaiyata* observes "वस्तुतस्तु परापरशब्दयोर्देशान्तरनिष्ठत्वादिकमेवार्थः। शत्रुत्वादिकं त्वार्थिकोऽर्थः"); द्विपेंद्राः (द्वाभ्यां शुंडातुंडाभ्यां पिबति असौ द्विपः, द्विपानां इंद्राः द्विपेंद्राः

large powerful elephants) तैः. अदः—*n. accu. sing.* of अदस् this *i.e.* belonging to Shuddhodana. The demonstrative pronouns तत्, एतत्, and अदस् strictly refer to the degree of distance from the speaker. अदस् is used in reference to the nearest object. **मण्डलं**=country, dominion, मण्डलं देशबिंबयोः *Ama.* The word is used in the sense of बिंब in Canto IV and in the sense of a 'ring' or 'course' in canto V. 23. **अभियातुं**=to attack. **मदोत्कटाः**—मदेन उत्कटाः (उद्भिन्नौ कटौ यस्य सः मदोत्कटः) furious on account of the flow of rut. मदोत्कटो मदकलः *Ama.*, see also *Raghu.* VI, 7. **हैमवताः**—हिमवति भवाः born on the Himâlaya. **यत्नात् विना**—The prepo. विना governs the *ablative* as well as the *accusative* and *instrumental.* **उपतस्थुः**=stood ready in service.

The idea is—The enemy's elephants came into the possession of the king without an effort.

Translation.—This country was not possible to be attacked by the large elephants, who were decorated with Padma ornaments, and who belonged to powerful enemies: [but] the same furious Himâlaya-born elephants stood [came] ready before him without any effort (on his part).

4. Prose Con.—अस्य पुरं बलेन मैत्र्या च धनेन आप्तैः नानांकचिन्हैः नवहेमभांडैः तथा अन्यैः अभूषितैः लंबसटैः तुरंगैः संचुक्षुभे.

Notes.—बलेन—धनेन etc. **आप्तैः** obtained either by force, or money, or friendship. **नानांकचिन्हैः**=नानाश्च ते अंकाश्च (नाना an *adj.* at the begining of a compound), ते एव चिन्हानि येषां ते, तैः. The marks on the different parts of a horse's body are viewed as auspicious or otherwise according to their position by all people in India. **नवहेमभांडैः**=हेम्नः भांडानि (भांड a horse's ornament भांडं पात्रे वणिङ्मूलधने भूषाश्वभूषयोः *Medi.*); नवानि हेमभांडानि येषां तैः. **लंबसटैः**=लंबाः सटाः (सटा is specially the long matted hair on the head of an ascetic or the mane on the neck of a lion सटा जटा केसरयोः *Medi.* By analogy it is here applied to the mane of a horse) येषां तैः. **संचुक्षुभे** = *Perf.* 3rd *per. Sing.* of क्षुभ् 1st Conj. *Atma.* with सम्.

Translation.—The metropolis of this (king) was astir with horses, having numerous (auspicious) marks, and decorated with new golden ornaments, acquired either forcibly or by friendship or by (payment of) money, as well as with horses having no ornaments [but] having long flowing manes.

5. Prose Con.—तदा अस्य राज्ये पुष्टाः च तुष्टाः च साध्व्यः च अरजस्काः च गुणवत्पयस्काः च उदग्रवत्सैः सहिताः च बह्वयः बहुक्षीरदुहः गावः बभूवुः।

Notes.—**अरजस्काः** (रजः अस्यास्तीति रजस्का, one having the *Rajoguṇa i. e.* anger and unsteadiness. *Rajas* is supposed to be the cause of passions and emotions and of the great activity seen in creatures; रागद्वेषौ रजः स्मृतं *Manu.*) अरजस्काः gentle, docile. **गु०...यस्काः**—गुणवत् पयः यासां ताः गु०—स्काः The suffix क is added in the sense of 'having' when पयस् forms the latter member of a *Bahuvrihi* compound according to उरः-प्रभृतिभ्यः कप् *Pâṇi.* V, iiii. 151. **उदग्रवत्सैः**—उदग्राः (tall, large) च ते वत्साश्च, तैः. **बहु०...दुहः**—बहु च तत् क्षीरं च (क्षीर milk: दुग्धं क्षीरं पयःसमम्.) तत् दोग्धि इति ब०दुह्, ताः. **गावः** *nom. plu.* of the *irreg.* word गो.

Translation.—At that time, in the dominion of this king, there were many well-fed and happy cows who were gentle, steady, yielding plenty of milk of a rich quality, and had big-sized calves.

6. Prose Con.—तस्य रिपुः मध्यस्थतां जगाम, मध्यस्थभावः सुहृत्वं प्रययौ, मित्रं विशेषतः दार्ढ्यं इयाय; अस्य द्वौ पक्षौ अपरः तु न आसीत्।

Notes.—**मध्यस्थता**—मध्ये स्थितः one standing in the middle neither to one side nor another. मध्यस्थस्य भावः मध्यस्थता the condition of being indifferent, passive. *cf.* वयमत्र मध्यस्थाः. **सुहृत्त्वं**—friendship. **दार्ढ्यं**—दृढस्य भावः दार्ढ्यं, strength, intensity. **द्वौ पक्षौ** *viz.* सुहृत्त्वं and मध्यस्थता. *cf.* सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु *Bh.Gi.* VI,9.

Translation.—His enemies became passive; passiveness grew into friendship; and friends became specially united. He had only two parties—there was no other.

7. Prose Con.—तथा अस्य मंदानिलमेघशब्दः सौदामनीकुंडलमंडितांगः देवः वर्षाशनिपातदोषं विनाश्य काले च देशे च प्रववर्ष।

Notes.—**तथा**—Likewise. **अस्य** The peculiar use of the Genitive may be noted. It is something like the Dative 'for him' or the Locative 'in his case.' **मंदा०...शब्दः**—अनिलाश्च मेघाश्च अनिलमेघाः, तेषां शब्दाः अ०—शब्दाः; मंदाः अ०—शब्दाः यस्मात् सः or मन्दश्चासौ अनिलश्च मंदानिलः; मंदानिलश्च मेघश्च एतद्वयं शब्दः यस्य सः. **सौदा०—तांगः**= सौदामनी (flash of lightening, तडित्सौदामनी विद्युत् *Ama.* सुदाम्नि मेघे भवा or सुदाम्नाद्रिणैकदिक् सौदामनी (since सुदामा तु पुमान्वारिधरपर्वतभेदयोः) सा एव कुंडले, ताभ्यां मंडितं अंगं यस्य सः. The reading सौदामिनी is not incorrect. **देवः**—(1) A cloud, देवस्तु नृपतौ तोयदे सुरे *Ama.* or (2) Indra, as the god of rain. *Malli.* explains the word as rain in *Ki.* I, 17.

वर्षा०—दोषं=अशनेः (अशनि lightening, वज्राशनिर्द्वयोः *Ama.*) पाताः (falling, the falling of lightening causes very serious losses a fact too well-known) अ०—पाताः; ते एव दोषः अ०—दोषः; वर्षासु or वर्षणे अ०-दोषः वर्षा०—दोषः, तं. **काले च देशे च** at the proper season and at the proper place.

The reading of C. **विनाश्म०—दोषैः**= अश्मानि (अश्मन् a stone, refers perhaps to the falling of meteoric stones) च वर्षासु अशनयः च अश्मवर्षाशनयः तेषां पाताः स एव दोषः. The falling of meteoric stones is quite independent of the rainy season and, therefore, there is no great propriety of the word अश्मन्; moreover, the word hangs loosely on the rest of the compound.

Translation.—For him at the due season and proper place did come down rain, attended with a light sound of breeze and of clouds and its parts adorned with circles of flashes of lightening, having supressed (*i. e.* without) the drawback of the falling of lightening during showers.

8. Prose Con.—तदा अकृते कृषिश्रमेण अपि ताः एव ओषधयः यथर्तु फलवत् सम्यक् रुरोह, रसेण सारेण च अभ्यधिकाः एव बभूवुः ।

Notes.—**कृषिश्रमेण**—कृषेः श्रमः तेन. **ओषधयः**—(ओषधी or ओषधि corn etc: although it is generally understood in the sense of 'an herb,' a medicinal plant; ओषधिः फलपाकान्ता *Ama.* In its most extended sense it may be taken to be vegetation in general. **यथर्तु** *an ind.*—according to season. **रसेन**=with sap, juice. **सारेण**=with substance *cf.* पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः *Bhag. Git.* XV, 13. **अभ्यधिकाः**—अभितः सर्वतः अधिकाः this is an instance of a *Prâdi.* compound. The Gaṇaratna Mahodadhi enumerates the senses in which अभि is used: they are "अभि पूजाभृशार्थेच्छा सौम्याभिमुख्यसौरूप्यवचनाहारस्वाध्यायेषु".

Translation.—Then, even without the labour of ploughing being done, there grew all vegetation at the proper season with fruit and in a proper manner and it developed with sap and marrow.

9. Prose Con.—गर्भधराः नार्यः संग्रामसंमर्दे इव शरीरसंदेहकरे काले प्रवृत्ते अपि स्वस्थाः [सन्त्यः] सुखं च निरामयं च एव प्रजज्ञिरे ।

Notes.—**गर्भधराः**=गर्भं धारयन्ति ताः. **संग्रामसंमर्दे**=संग्रामस्य संमर्दः stampede, treading) तस्मिन्. **शरीर०—करे**=शरीरस्य संदेहः (risk, danger *cf.* जीवितसंदेहदोलामारोपित *Kada.*) तं करोति तत् श०—करं, तस्मिन्. **प्रवृत्ते** Having arrived. **सुखं**—*adv.* easily, without difficulty. **निरा-**

मयं—*vide* I, 25 *supra.* प्रजज्ञिरे—*Perf.* 3rd plu. of जन् to beget, to deliver with प्र.

Translation.—Even at the approach of the period which threatens danger to the body, as in the collision of battle, women in travail were quite easy and delivered without difficulty as well as without ailment.

10. Prose Con.—यत्र नराः परेभ्यः प्रभुभ्यः विभवे लभ्ये अपि न प्रार्थयन्ते स्म केचित् सूक्ष्मधनाः अभ्यर्थिताः अपि तत्र कदा विमुखाः न बभूवुः ।

Notes.—**परेभ्यः प्रभुभ्यः**—from rich but unknown persons. **विभवे**—विभव= wealth, *cf.* अतनुषु विभवेषु ज्ञातयः किंतु नाम *Sha.* V, 8. **लभ्ये**=लब्धुं शक्यं लभ्यं, तस्मिन्. **प्रार्थयन्ते**—The verb प्रार्थ् to solicit or beg is both *Paras.* as well as *Atma.* The latter form is used here very aptly since the favour is for the persons asking it. **स्म**—The particle स्म when used with the present tense imparts to it the force of the past tense *cf.* क्रीणंति स्म प्राणमूल्यैर्यशांसि *Ma.* XVIII, 15. इति स्म तर्कादिव पश्यतस्तौ॥ *Jâ.* I, 34 **सूक्ष्मधनाः**=सूक्ष्मं (slender little) धनं येषां ते. **अभ्यर्थिताः** solicited *cf.* नाभ्यर्थितो जलधरोऽपि जलं ददाति *Niti.* 73. **विमुखाः**—with turned faces. *cf.* प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः *Me.* 17.

Translation.—Here people did not ask for money from the unknown rich although it was obtainable from them; for no individuals turned their faces when applied to, although they had little money.

11. Prose Con.—नाहुषस्य ययातेः इव तदा तस्य राज्ञः राज्ये बंधुषु कश्चन अनृजुः द्वेष्यः न, अदाता अपि न, अव्रतः एव न, अनृतकः न, हिंस्रः न आसीत् ।

Notes.—**नाहुषः**—नहुषस्य अपत्यं पुमान्. *Yayâti* was the son of *Nahusha.* In the *Vishṇu Purâṇa* it is mentioned that this prince conducted the affairs of state for the good of the people. He belonged to the lunar race. **द्वेष्यः**—an enemy, see *Bha. Gi.* VI, 9. **बंधुषु**—among kinsmen. सगोत्रबांधवज्ञातिबंधुः स्वः स्वजनाः समाः *Ama.* **अनृजुः**—न ऋजुः *Mallinâth* explains ऋजुता by अवक्रत्वं, अकुटिलबुद्धित्वं hence. **अनृजुः**=not upright or not straightforward *accord.* to *Pâṇi* I. iv, 15. निकृतस्त्वनृजुः शठः *Ama.* **अनृतिकः**—I do not find this form in any dictionary but Vâchaspatya gives the form अनृतक for 'one accustomed to speak lies;' quoting लुब्धा अनृतकाश्चैवतिष्ये जायन्ति भारत. *Maha. Bha.* The word as it stands in the text with the क suffix also makes the same meaning.

Translation.—At that time, in his kingdom, as in the days of Yayâti, son of Nahusha, there was no crooked-minded enemy among kinsmen, no ungenerous person, no one who did not adhere to religious observances, nor was there a liar, nor a murderous person.

12. Prose Con.—तत्र धर्मकामाः प्रत्यक्षतः स्वर्गं अभिलक्ष्य इव उद्यानदेवायतनाश्रमाणां कूपप्रपापुष्करिणीवनानां क्रियाः चक्रुः ।

Notes.—**धर्मकामाः**—धर्म एव कामः ("इष्टविषयाभिलाषः" इच्छामनोभवौ कामौ *Ama.*) येषां ते. **प्रत्यक्षतः** an *inde.* used adverbially in the sense of 'clearly, distinctly', formed by the termination तसिल् to प्रत्यक्ष=अक्ष्णः प्रति (an *avya.* com.) प्रत्यक्षं which has come into the language as a *rūḍha* word. **अभिलक्ष्य**—Having directly in view, having a definite aim from लक्ष्य a goal, a mark. *cf.* इषवः सिध्यन्ति लक्ष्ये चले *Sha.* or दर्पण कौतुकवता मयि बद्धलक्ष्यः *Uttar.* V, 11. **उद्या०—श्रमाणां**=उद्यानानि च देवतायतनानि (आयतन a sanctuary, the inner part of a temple where the idol is generally installed, चैत्यमायतनं तुल्ये *Ama.*) च आश्रमाः च; तेषां. **कूप०—वनानां**=कूपाश्च प्रपाः (प्रपा a water-shed *i. e.* a small shed erected by the road-side where water is given to people to drink free of charge. *Marathi* पाणपोई. प्रपा पानीयशालिका *Ama.*) च पुष्करिण्यः. पुष्करिणी is a small pond or masonery trough generally kept filled for cattle to drink) च वनानि (the word वन is to be taken in its restrictive sense of 'a cluster of trees' 'a grove'. These were planted as resting-places *cf.* श्यामायमानानि वनानि पश्यन् *Ra.* II, 8) च तेषां. In tropical countries, such as India, the construction of works like the above were looked upon as works of great merit (पुण्य), and they were of great use to travellers when there were no rapid means of communiaction. **क्रियाः**—works as an enjoinment.

Translation.—Those who sought religious merit, having that firmly in their view undertook the construction of gardens, sanctuaries, and hermitages, as well as wells, watering-sheds, cisterns and groves as works which must be done.

13. Prose Con.—दुर्भिक्षभयामयेभ्यः मुक्तः च हृष्टः जनः स्वर्गे इव अभिरेमे पतिः पत्नीं वा महिषी पतिं वा परस्परं च न व्यभिचेरतुः ।

Notes.—**दु०...मयेभ्यः**=दुर्भिक्षात् (दुर्भिक्ष drought, scarcity) भयं. The abla. is to be taken by the *sūtra* पंचमी भयेन *Pāṇi.* II, i, 37. दुर्भिक्षभयं च आमयं (आमय=disease रोगव्याधिगदामयाः *Ama.*) च or the compound may be taken दुर्भिक्षं च भयं (fear from thieves and marauders etc. as a consequence of drought) च आमयं च. **अभिरेमे**

lived in comfort; for the use of अभि in the sense of ' excess *see.* II, 8. *supra.* **पतिः** = पाति इति one who protects. The husband is always looked upon as the protector. **पत्नीं** = (पतिः अस्याः इति पत्नी.) The न comes in by the *sûtra* पत्युर्नो यज्ञसंयोगे *Pâṇi.* IV. i, 33. **व्यभिचेरतुः** = 3rd per. dual of the Perf. of व्यभिचर् to transgress.

Translation.—(Here) people, rescued from the fear of drought and from plague [or from drought, fear, and disease] were happy and enjoyed (life) as if in heaven; husband transgressed not against wife nor wife against husband mutually.

14. Prose Con.—कश्चित् रतये कामं न सिषेवे, कश्चित् कामार्थं अर्थं न जुगोप, कश्चित् धनार्थं धर्मं न चचार, कश्चित् धर्माय हिंसां न चकार ।

Notes.—**कामं**—love; the feeling of attraction for the opposite sex. **रतये** = for the sake of carnal gratification. The idiomatic use of the Dative is noteworthy "A noun expressive of the purpose for which a thing is done or of the result to which anything leads or of the effect for which anything exists is put in the Dative तादर्थ्ये चतुर्थी वाच्या । क्लृपि संपद्यमाने च. **सिषेवे**—*Perf.* of सेव्. *cf.* आचारपूतं पवनः सिषेवे *Ra.* II, 13. **कामार्थं**—The word काम is used here in the sense of इष्टविषय् a desired object and is different from that in which it is used above. कामाय इति कामार्थं अर्थ in the sense of 'for the purpose of' at the end of a compound is always compounded with the noun in the dative according to the *Vârtika* अर्थेन तु नित्यसमासो विशेष्यनिघ्नता च. **अर्थ** = wealth, riches. *cf.* अर्थानामीशिषे त्वं" *Vaira* 30. **धर्म**—The observance of religious regulations. The accusative is noteworthy ; verbs having the sense of motion, real or metaphorical, govern the accusative. *cf.* चरतः किल दुश्चरं तपः *Ra.* VIII, 79.

Translation.—None pursued love merely for sensual gratification, none took care of wealth for the sake of desired objects, none behaved according to religious rules for the sake of wealth, and none killed living beings for religious purposes alone.

15. Prose Con.—स्तेयादिभिः अभितः स्वचक्रं न त्रस्तं, परचक्रमुक्तं [च] स्वस्थं, तस्य पुरेषु अरण्येषु तथैव राष्ट्रे क्षेमं सुभिक्षं च, बभूव ।

Notes.—**स्तेयादिभिः** = स्तेनस्य कर्म स्तेयं. The न् of स्तेन is dropped according to " स्तेनाद्यन्नलोपश्च " *Pâṇi.* V. i, 125. स्तेयं (theft, चौरिका स्तैन्य चौर्यं च स्तेयम् *Ama.*) आदिः (foremost) येषां तानि [कर्माणि] तैः स्ते०—भिः. **अभितः** = 'on both sides, from which it is extended to ' on all sides.' *cf.* च्युताः प्रभावादभितः प्रसारिणः *Ki.* VIII, 10. It is

used as an adverb or prepo. with the accusative of the noun. **स्वचक्रं**—स्वस्य चक्रं (realm ; dominion चक्रं राष्ट्रेऽपि च *Ama.*) **पर°...मुक्तं**—परस्य (पर an enemy, अभिघाति परारातिः *Ama. vide* note on पर in St. 3 *supra.*) चक्रं (army चक्रः कोके पुमान् क्लीबं व्रजे सैन्यरथांगयोः । राष्ट्रे दंभांतरे *Medi.*) तेन मुक्तं. This is one of the six calamities spoken of as ईतयः which are अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः। प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥.

Translation.—His dominion was not harassed on any side by theft and similar troubles and was in peace on account of being free from foreign invasion; there was prosperity and plenty in his towns and forests, as also in his whole kingdom.

16. Prose Con.—आदित्यसुतस्य मनोः इव तस्य राज्ञः राज्ये तदा तज्जन्मनि हर्षः चचार, पाप्मा प्रणनाशधर्मः जज्वाल कलुषं शशाम ।

Notes.—आदित्यसुतस्य मनोः—आदित्यस्य (of the sun, सूरसूर्यार्यमादित्य *Ama.*) सुतः, तस्य मनोः. मनु—the seventh Manu called Vaivaswat Manu is supposed to have been born from the sun and is regarded as the founder of the solar race of kings who ruled at Ayodhyâ, *vide Uttar.* VI, 18. **तज्जन्मनि**—तस्य जन्म, तस्मिन् when he—the prince—was born; or more accurately, in consequence of his birth. This is an instance of what is technically called निमित्तसप्तमी. **पाप्मा**—sin, wickedeness (पाप्मन् *m.* अस्त्री पंकं पुमान् पाप्मा पापं किल्बिषकल्मषं *Ama. cf.* पाप्मभ्यश्च पुनातु *Malati.* V, 26. **कलुष** also means 'sin, wickedness'. I would however take कलुष to signify 'discontent, dissatisfaction' as in अपि च कलुषं विप्रियवशात् *Utta.* I, 13.).

Translation.—As in the time of Manu, the son of Sun, so now at the birth [of a son], in the reign of this monarch, joy went round, wickedness disappeared, righteousness blazed forth, and discontent subsided.

17. Prose Con.—यतः राजसुतस्य तस्य एवंविधा सर्वार्थसिद्धिः बभूव ततः सर्वार्थसिद्धः अयं इति नृपः तस्य सुतस्य नाम प्रचक्रे ।

Notes.—एवं='so, in this manner' "एवं प्रकारोपमयोरंगीकारेऽवधारणे." **विधा**=kind, sort, विधा विधौ प्रकारे च *Ama.* **स°—सिद्धिः** = सर्वेषां अर्थानां (objects) सिद्धिः (accomplishment, fulfilment, *cf.* सिद्धिः साध्ये सतां *Hito.* **सर्वार्थसिद्धः** name of Gautama Buddha सशाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः *Ama.*

Translation.—Since there came about the fulfilment of all desired objects at the birth of his son the king caused the prince to be named Sarvârthasiddha.

18. Prose Con.—मायादेवी तु विबुधर्षिकल्पं विशालं तनयप्रभावं दृष्ट्वा जातं प्रहर्षं वोढुं न शशाक ततः विनष्टा त्रिदिवं जगाम ।

Notes.—विबु०—कल्पं...विबुध इव ऋषिः or विबुधानां ऋषिः, ईषदूनः विबुधर्षिः विबुधर्षिकल्पः, तं वि०—कल्पं according to ईषदसमाप्तौ कल्पब्देश्यदेशीयरः *Pâṇi* V, iii. 67. The termi. कल्पप्, देश्य, and देशीयर are added to nouns and adjectives in the sense of 'a little less than,' 'nearly equal to' *cf.* कुमारकल्पं सुषुवे कुमारं *Ra.* V, 36, महेन्द्रकल्पस्यमहायदेव्याः *Jan.* I, 27. **विनष्टा**=perished; *p. par.* of विनश् 4th *Conj. Par.* to disappear, to die. **त्रिदिवं**—Heaven; ब्राह्मवैष्णवरौद्रभेदेन सात्विकराजसतामसभेदेन वा त्रिविधो दीव्यति व्यवहरति प्रकाशते वा.

Translation.—But queen Mâyâ observing the glory of her son which was almost equal to that of a deified saint was unable to sustain the excessive joy which it produced and as a consequence she expired and went to heaven.

19. Prose Con.—ततः मातृसमप्रभावा मातृष्वसा तदानीं तं सुरगर्भकल्पं कुमारं पूर्णेन स्नेहेन मुदा पुत्रवत् संवर्धयामास ।

Notes.—ततः—in the sense of the ablative of तद् with the तसिल् termination is primarily indicative of place, but is generally used as indicative of time, as ' from that time forward. **मातृसमप्रभावा**—मातुः समः प्रभावः यस्याः सा. **मातृष्वसा** = मातुः स्वसा (स्वसा *nom.* sing. of स्वसृ a sister) maternal aunt. **तदानीं**=then, तदा तदानीं *Ama.* **मुदा**=*ins.* of मुत् *vide* I, 88 *supra. cf.* स मुदाऽस्मै समुदाहृतप्रियः *Jâna.* IV, 29. **पुत्रवत्**=पुत्रेण तुल्यं पुत्रवत् by तेन तुल्यं क्रियाचेद्वतिः *Pâṇi* V, i. 115.

Translation.—From that time the queen's sister having a mother's influence then brought up the prince who was almost like a heaven-born child, with great affection and pleasure.

20. Prose Con.—ततः उदयस्थः बालार्कः इव अनिलेन समीरितः वन्हिः इव अतमस्के पक्षे ताराधिपः इव क्रमेण कुमारः सम्यक् ववृधे ।

Notes.—उदयस्थः=उदये तिष्ठत्यसौ. उदय is the eastern mountain. Its geographical position is as vague as the mountain itself. The popular belief of there being two mountains, one in the East and one in the West, finds a very prominent place in Sanskrit literature. *cf.* उदयगूढशशांकमरीचिभिः *Vikra.* III, 6; *Jan.* III, 81. The vagueness can be palpably perceived in the Smriti यैर्यत्र दृश्यते भास्वान् स तेषां उदयः स्मृतः. I am inclined to think that these mountains mean nothing more beyond the spherical segment of the earth from behind which the two luminaries are observed to rise up or behind which they are seen to go

down in the west. **बालार्कः**—बालश्चासौ अर्कश्च the newly risen sun, *cf.* बालार्कप्रतिमेवाप्सु *Ra:* XII, 100. **समीरितः**—Shaken, hence fanned from ईर् 1st. *Conj. Paras.* with सम् to move violently, to agitate; *cf.* अपरागसमीरितः *Ki.* II, 50. **अतमस्के**—नास्ति तमः यस्मिन्, तस्मिन् During the period when there is no darkness *i. e.* During the bright half. When the final word of a Bahuvrihi compound does not undergo any change it takes the क optionally. **पक्षे**—पक्ष is the half of a month, a fortnight; पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ *Ama.* **ताराधिपः**—ताराणां अधिपः The moon is looked upon as the 'ruler of the stars'. The moon has been the theme of numerous legends. Her names are highly significant *e. g.* हिमांशुः; कुमुदबांधव, ओषधीश, नक्षत्रेश, क्षपाकर etc. The boy gradually developing and increasing like the moon during the brigh half of a lunar month finds expression in various places *e. g.* पुपोष वृद्धिं, हरिदश्वदीधितेरनुप्रवेशादिव बालचंद्रमाः *Ra.* III, 22. दिने दिने सा परिवर्धमाना लब्धोदया चांद्रमसीव लेखा *Ku.* I, 25.

Translation.—Then like the rising sun on the Eastern horizon (mountain), or the fire fanned by the wind, or like the moon during the bright fortnight the prince gradually grew up.

8. Prose Con.—ततः सः जांबूनदभांडभृद्भिः चतुर्भिः निभृतैः तुरंगैः युक्तं अक्लीबविद्युच्छुचिरश्मिधारं हिरण्मयं स्यंदनं आरुरोह ।

Notes.—जां०...भृद्भिः *see* II, 4. निभृतैः steady, gentle. अक्ली०—धारं = न क्लीबा (not weak; hence, powerful, strong) अक्लीबा चासौ विद्युत् च तद्वत् शुचिः (bright) अ०—शुचिः; रश्मिणां धारा (a continuons line of rays) रश्मिधारा; अ०—शुचिः रश्मिधारा यस्य सः, तं; agreeing with स्यंदनं. Mr. Cowell takes रश्मि in the sense of 'reins', किरणप्रग्रहौ रश्मी *Ama.* I prefer the first sense of the word, since the whole chariot being made of gold is likely to have a bright dazzling lustre like that of a flash of lightening. If the chariot had been in motion the reins would be shaking and then perhaps their comparison with flashes of lightening would have been more appropriate. हिरण्मयं—*see* II, 22. स्यंदनं a war-chariot, याने चक्रिणि युद्धार्थे शतांगः स्यंदनो रथः *Ama.*

The metre is उपजाति.

Translation.—Then he mounted the golden chariot, emitting continued radiance like that of strong powerful flashes of lightening, to which were harnassed four steady horses having golden trappings.

9. Prose Con.—ततः सनक्षत्रः चन्द्रः अंतरिक्षं इव प्रकीर्णोज्ज्वलपुष्पजालं विषक्तमाल्यं प्रचलत्पताकं मार्गं सदृशानुयात्रः (सः कुमारः) प्रपेदे ।

Notes.—**सनक्षत्रः** नक्षत्रैः सह accompanied by stars. **अंतरिक्षं**= the intermidiate region between heaven and earth (नभोंतरिक्षं गगनं *Ama.* According to Nirukta अंतरा द्यावा पृथिव्योः क्षांतं अवस्थितं भवति॰ according to Sâyana अंतरा द्यावा पृथिव्योर्मध्ये इक्ष्यमाणं व्योम). **प्रकी॰...जालं**=उज्ज्वलानि च तानि पुष्पाणि च उज्ज्वलपुष्पाणि, तेषां जालानि उज्ज्व॰—जालानि; प्रकीर्णानि (scattered, spread out ; *cf.* प्रकीर्णः पुष्पाणां अंजलिः *Veṇi.* I, 1) उज्ज्व॰—जालानि यस्य सः; तं, agreeing with मार्गं the road on which wreaths of flowers, probably in the form of trellis-work or festoons, were hung. **वि॰—माल्यं** = विषक्तानि (hung, suspended, *cf.* विटपविषक्तजलार्द्रवल्कलेषु *Shak.* I) माल्यानि (garlands *cf.* शिरोभिरुह्यते नराधिपैर्माल्यमिवास्यशासनम् *Ki.* I, 21.) यस्मिन् सः, तं along which festoons of flowers were suspended. **प्र॰—पताकं** = प्रचलंत्यः पताकाः यस्मिन् सः, तं=along which there were fluttering flags and buntings. **सदृशानुयात्रः** = सदृशा (suitable, befitting) अनुयात्रा (a following, retinue, train) यस्य सः

The metre is उपजाति.

Translation.—The prince, with a suitable retinue, like the moon with the stars entering the sky, came on the road, which was adorned with trellis-work of bright flowered wreaths, which had festoons suspended, and along which were fluttering flags.

10. Prose Con.—कौतूहलात् पौरैः स्फीततरैः नेत्रैः समंतात् अभिवीक्ष्यमाणः नीलोत्पलैः किन्नु विकीर्यमाणः सः शनैः शनैः राजपथं जगाहे ।

Notes.—**कौतुहलात्**—through curiosity, or eagerness. **पौरैः**—by the citizens पुरे भवाः पौराः. **स्फीततरैः**—Excessively joyous. The suffix तर imparts the sense of excessiveness. **नीलोत्पलैः**—नीलानि च तानि उत्पलानि च, तैः The blue-lotus *Nymphæa Cerulia* is a variety of the lotus-kind almost invariably used by poets as an object of comparison for the eyes. **किन्नु** = नु which has an interrogative sense involving some doubt or uncertainty is very often compounded with the interrogative pronoun and its derivatives in the sense of '*indeed*'. *A. G.* § 285. **विकीर्यमाणः**—विकीर्यन्ते इति *pre. par.* from कॄ *Atma.* to scatter. **समंतात्**—all round, from all sides. **अभिवीक्ष्यमाणः**—carefully seen. **शनैः शनैः**—slowly, step by step;

cf. शनैः. शनैः उदिते भगवति सवितरि *Kâda.* also शनैः शनैः शांतरयेण वारिणा *Ki.* IV, 5. **राजपथं**—*vide* III, 4. The word पथिन् at the end of a compound becomes पथ.

The metre is उपजाति.

Translation.—Gazed at from all sides by eager citizens with eyes beaming with delight, he was, as it were, showered with blue-lotuses: thus he graduully passed along the royal road.

11. Prose Con.—केचित् सौम्यगुणेन तं तुष्टुवुः तथा अन्ये दीप्ततया ववन्दिरे, केचित् तु अस्य सौमुख्यतः श्रियं आशंसिषुः च आयुषः वैपुल्यं [आशंसिषुः]।

Notes.—**सौम्यगुणेन**—सौम्यः (agreeable, charming) चासौ गुणश्च. **तुष्टुवुः**—were gratified; hence, praised. **ववन्दिरे**=saluted, bowed. **सौमुख्यतः** सुसुखस्य भावः सौमुख्यं, तस्मात्. **आशंसिषुः**—*Perf.* 3rd *per. plural* of आशंस् to praise. **आयुषः** *gen. sing.* of आयुस्. **वैपुल्यं**—विपुलस्य भावः वैपुल्यं plentifulness. [**आशंसिषुः**] wished, hoped for.

The metre is इंद्रवज्रा.

Translation.—Some were gratified with his gentle disposition, others paid him respect on account of his majestic appearance; others, however, praised the beauty of his fine countenance and wished him a long life.

12. Prose Con.—नार्यः महाकुलेभ्यः कुब्जाः च कैरातकवामनानां व्यूहाः च कृशेभ्यः निवेशनेभ्यः निसृत्य देवानुयायिध्वजवत् प्रणेमुः ।

Notes.—**महाकुलेभ्यः**—from great houses (कुल a house कुलं... भवने च तनौ क्लीवं *Medi.*; *cf. Ra.* XII, 25) महन्ति च तानि कुलानि च, तेभ्यः. The word महत् is generally changed to महा when it forms the first member of a Karmadhâraya or a Bahuvrihi compound. **कुब्जाः**—the hump-backed. They are described as:—येषां शिरोधि पृष्ठिपादं लक्षणोपेतं न भवति पृष्ठ्युदरहृदयं च सुलक्षणं स्यात्ते कुब्जाः **कै०—वामनानां**=कैरातकाश्च वामनाश्च, तेषां. कैरातकाः=किराताः एव कैराताः by the rule प्रज्ञादेराकृतिगणत्वात् स्वार्थेऽण्. कुत्सिताः किराताः कैरातकाः. The word किरात may be derived from कॄ to scatter, which becomes किर् according to इगुपधज्ञाप्रीकिरः *Pâṇi.* III, i, 135 and अतन्ति गच्छन्ति सततं इति अताः wanderers. किरः (scattered about, dispersed) च अताः च किराताः The Kirâtas belonged to one of the mountain-tribes who lived on the outskirts of the countries taken possession of by the Aryans and were perhaps one of the aboriginal races of the country. They subsisted by hunting and led a wandering life in consequence of having been driven away and compelled to

recede from the more fertile parts of the country by the invaders. They appear to have been of service to the new-comers as watch-men and guards. **वामन**=a dwarf, a pigmy, अथ वामने न्यग्नी च खर्वह्रस्वा स्युः *Ama.* **व्यूहाः** crowds. **कृशेभ्यः**—small, poor; *adj.* to **निवेशनेभ्यः**=from places of residence. **दे०...ध्वजवत्**= देवं अनुयाति इति देवानुयायी, स चासौ ध्वजश्च; स इव दे०...ध्वजवत्.

The metre is उपजाति.

Translation.—Women came out from the large mansions (while) the hump-backed, and the crowds of poor foresters and dwarfs, came out of their poor tenements, and bowed (to him) like the banner-cloths of the flags (in a procession) of the gods.

13. Prose Con.—ततः कुमारः गच्छति खलु इति प्रैष्यजनात् प्रवृत्तिं श्रुत्वा मान्येन जनेन कृताभ्यनुज्ञाः स्त्रियः दिदृक्षया हर्म्यतलानि जग्मुः ।

Notes.—**खलु**—a particle used in the following senses:—निषेधवाक्यालंकारजिज्ञासानुनयनियमनिश्चयहेतुविषादेषु. Here it conveys the sense of निश्चय. **प्रैष्यजनात्**—प्रैष्यः एव जनः तस्मात्; प्रैष्य also प्रेष्य a follower, a servant नियोज्य किंकरप्रैष्यभुजिष्यपरिचारकाः *Ama.* The addition of जन in the singular may be viewed as indicative of a class or body. **प्रवृत्ति**=news, intelligene; *cf.* जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिं *Me.* I, 4. प्रवृत्तिर्वृत्तवृत्तांतप्रवाहेषु प्रवर्तने *Haima.* **मान्येन**= मानं अर्हतीति मान्यः, तेन जनेन by the elder persons or by those who deserve respect. **कृ०...ज्ञाः**—*see* III, 6. **दिदृक्षया**=द्रष्टुमिच्छया with the desire of seeing. **हर्म्यतलानि** the terraces or flat roofs of the palaces.

The metre is उपजाति.

Translation.—Then, hearing from the attendants that the prince was certainly going out, the women, eager to have a view of him, hastened to the terraces of the mansions with the permission of their elders.

14. Prose Con.—ताः स्रस्तकांचीगुणविघ्निताः च सुप्तप्रबुद्धाः कुल-लोचनाः च कौतूहलेन अपि भृताः वृत्तान्तविन्यस्तविभूषणाः ताः परेयुः ।

Notes.—**स्रस्त०...विघ्निताः**—स्रस्ताः (slipped down) च ते कांचीनां गुणाः (the tying strings of the girdle) च; तैः विघ्निताः hindered, impeded. The use of the कांची or girdle appears to have, at one time, been very common among Indian women and is to be seen even in these days in southern India and among the Mârvâdees. **सुप्त०... लोचनाः**—सुप्तात् प्रबुद्धाः अतएव आकुलानि लोचनानि यासां ताः. **अपि**=and, also. **वृ०...भूषणाः**—विरुद्धं न्यस्तानि विन्यस्तानि; वृत्तांतेन विन्यस्तानि वृ०—स्तानि; वृ०—स्तानि विभूषणानि याभिः ताः.

The metre is इंद्रवज्रा.

Translation.—Impeded by the strings of the girdles which had slipped down, with their eyes distressed in consequence of thus being awakened from sleep, and also on account of being filled with an eager curiosity, with their ornaments wrongly put on (in the hurry) at the news, they crowded together.

15. Prose Con.—प्रासादसोपानतलप्रणादैः च कांचीरवैः च नूपुरनिस्वनैः अन्योन्यवेगात् समाक्षिपंत्यः गृहपक्षिसंघान् विभ्रामयंत्यः (ताः भवंति)।

Notes.—**प्रासा०...प्रणादैः**—प्रासादानां सोपानानि (flights of steps, especially made of flag-stones), तेषु तलानां (of the soles of the feet) प्रणादाः (sounds), तैः the instrumental denotes 'accompanying circumstances'. **कांचीरवैः**—कांचीनां रवाः (ध्वनिध्वानरवस्वनाः *Ama.*) तैः **समाक्षिपंत्यः**—jostling, elbowing. **अन्योन्यवेगात्**—अन्याः च अन्याः च अन्योन्याः, तासां वेगात्. **गृह०...संघान्**—गृहाणां पक्षिणः (The Hindus as a class have a great prediliction for birds and small animals. Giving corn in plentifuls to pigions and doves etc. and allowing them to pick it in the quadrangles of houses is to be seen in many places even in these days of 'civilization'); तेषां संघाः (flocks, multitudes संघसार्थौतुजंतुभिः *Ama.* The Amarakosha gives a separate term for each class of collections but the distinction does not appear to be kept in view in literature). **विभ्रामयन्त्यः**—scaring away.

The metre is इंद्रवज्रा.

Translation.—With the sounds of their feet on the flights of steps of the mansions, the jingling of their girdles, and that of their anklets, those women come out jostling each other in their hurry and scaring away the birds attached to the houses.

16. Prose Con.—कासांचित् आसां उत्सुकानां (अतएव) जातत्वराणां अपि वराङ्गनानां तु विशालाः श्रोण्यः तथा पीनपयोधराः गुरुत्वात् गतिं जगृहुः।

Notes.—**कासांचित्**—The addition of चित् to the forms of interrogative pronouns imparts to them an indefinite sense and may be rendered by 'some', 'certain.' **उत्सुकानां**—eagerly striving, anxiously desirous; इष्टार्थोद्युक्त उत्सुकः *Ama.* **जातत्वराणां**=जाता त्वरा यासां, तासां. **वरांगनानां**—वराश्च ताः अंगनाश्च (प्रशस्तानि अंगानि limbs अस्याः इति अंगना. This is formed according to the *Gana sutra* अंगात् कल्याणे on *Pâṇi.* V. ii. 100). तासां. **गुरुत्वात्**—on account of heaviness *cf.* गृष्टिर्गुरुत्वात् *Ra.* II. **गतिं जगृहुः**—held back in going.

The metre is उपजाति.

Translation.—The large hips and full bosoms of some of these pretty women checked their progress notwithstanding their anxious desire (to have a look of the prince) and the (consequent) precipitate haste.

17. **Prose Con.**—अन्या (स्त्री) तु शीघ्रं गन्तुं समर्था अपि रहः प्रयुक्तानि प्रगल्भानि विभूषणानि ह्रिया निगूहमाना (सती) गतिं निजग्राह तूर्णं न ययौ ।

Notes.—**रहस्**—*ind.* in secret. **प्रयुक्तानि**—put on. **प्रगल्भानि** remarkable, specially noticable: hence beautiful. **ह्रिया** through a sense of shame *vide Ratnā.* I, 1. **निगूहमाना**—*Pre. Par.* of निगूह् (*Atm.*) to conceal.

The metre is उपजाति.

Translation.—Another woman, though quite able to go fast checked her pace and did not come hastily, concealing through shame the noticeable ornaments which she had put on in seclusion.

18. **Prose Con.**—परस्परोत्पीडनपिंडितानां संमर्दसंशोभितकुंडलानां सस्वनभूषणानां तासां तदा वातायनेषु अप्रशमः बभूव ।

Notes.—**प०.. डितानां**—परस्पराणां उत्पीडनं, pressing तेन पिंडिताः (formed into a mass or heap) तासां. **सं०...लानां**—संमर्देनेन (संमर्द thronging together) संशोभितानि कुंडलानि यासां तासां. **सस्व०...णानां**= स्वनेन सहितानि स०—नानि; स०नानि भूषणानि यासां तासां. **वातायनेषु** in the windows *cf.* सौधवातायनस्था *Mâlati.* **अप्रशमः**=uneasiness.

The metre is उपजाति.

Translation.—Then, there was uneasiness at the windows among the women, who had [as it were], heaped themselves (there) by pressing upon each other, whose ear-rings gleamed in the thronging and whose ornaments jingled.

19. **Prose Con.**—परस्परोपाश्रितकुंडलानि वातायनेभ्यः विनिःसृतानि स्त्रीणां मुखपंकजानि तु हर्म्येषु सक्तानि पंकजानि इव विरेजुः ।

Notes.—**पर०कुंडलानि**=परस्परेषु उपाश्रितानि (depending, *fig.* holding) कुंडलानि येषां तानि. The word परस्पर is not to be looked as a compound. For an explanation see note on **अन्योन्य** stanza 21 *infra.* **विनिःसृतानि**=issuing out. **सक्तानि** = fixed, fastened. **पंकजानि**—(पंके जातानि पंकजानि, lotuses).

The metre is उपजाति.

Translation.—The lotus-like faces of the women, supporting each others' ear-rings, appearing out at the windows, gleamed like so many actual lotuses stuck on the palaces.

20. Prose Con.—ततः कौतूहलोद्घाटितवातायनैः युवतीकलापैः विमानैः श्रीमत् नगरं समन्तात् साप्सरोभिः विमानैः वियत् इव बभासे ।

Notes.—**कौ०...यनैः**—कौतूहलेन उद्घाटितानि (opened) वातायनानि (windows) येषां तानि; तैः. **यु०लापैः**—युवतीनां कलापाः (bands, कलापः संहतौ बर्हे कांच्यां भूषणतूणयोः *Ajaya.*) येषु तैः an instance of a Vyadhikarṇa Bahuvrihi. **विमानैः**—see II, 32. **समंतात्**—*ind.* round. **साप्सरोभिः**—अप्सरोभिः सहितानि साप्सरांसि, तैः साप्सरोभिः. **वियत्**=sky, वियद्विष्णुपदं वातु पुंस्याकाशविहायसि *Ama.*

The metre is उपजाति.

Translation.—With the lofty palaces (astir) with crowds of damsels, with every window thrown open in eager curiosity, the magnificent city shone on every side like the very heaven with its celestial cars thronged with heavenly damsels.

21. Prose Con.—वातायनानां अविशालभावात् अन्योन्यगंडार्पितकुंडलानि प्रमदोत्तमानां मुखानि पंकजानां बद्धाः कलापाः इव रेजुः ।

Notes.—**अविशालभावात्**—न विशालं अविशालं, अविशालस्य भावः तस्मात्. **अन्यो०—लानि**=अन्योन्यानां गंडाः cheeks *cf.* गंडस्वेदापनयनरुजा etc. *Me.* I, 37.) तेषु अर्पितानि कुंडलानि येषां तानि. अन्योन्य is not a compound 'असमासवद्भावे पूर्वपदस्य सुपः सुर्वक्तव्यः' and is to be declined as a nominal word *e. g.* अन्योन्येषां पुष्करैरामृशंतः *Ma.* For a further discussion see Sidd. Kau. and commentary. **प्रमदोत्तमानां**—प्रमदः (हर्षः) आसां अस्तीति प्रमदाः; ताश्चताः उत्तमाश्च, तासां. **बद्धाः कलापाः**—formed into boquets or bundles. **रेजुः** = shone.

The metre is उपजाति.

Translation.—The faces of the delighted pretty women shone like lotuses formed into boquets—faces which in consequence of the narrowness of the windows were so packed together that the ear-rings on them looked as if transferred to each other's cheeks.

22. Prose Con.—तस्मिन् पथि कुमारं वीक्ष्यमाणाः स्त्रियः गां गन्तुकामाः इव बभुः एनं च उर्ध्वोन्मुखाः उदीक्ष्यमाणाः नराः द्यां गन्तुकामाः इव बभुः ।

Notes.—**वीक्ष्यमाणाः**—pass. part. of ईक्ष् with वि. **गां**=to the ground 'गौरिला कुंभिनी क्षमा' *Ama. cf.* दुदोह गां स यज्ञाय *Ra.* I, 26. "as the women were looking down from the terraces with such

eagerness straining their necks that they may be said to be eager to throw themselves down. गन्तुकामा: the infinitive with the final म् omitted is used with the words काम and मनस् in the sense of 'wishing' or 'desiring' what is indicated by the root according to 'तुंकाममनसोरपि'. ऊर्ध्वोन्मुखा: having upturned faces. द्यां—to the sky द्योदिवौ द्वे स्त्रियां *Ama.*

The metre is उपजाति.

Trans.—The women, gazing down upon the prince on the road, appeared as if longing to throw themselves down on the earth; while the men gazing at him with upturned faces seemed as if longing to rise up towards heaven.

23. **Prose Con.**—ताः च स्त्रियः वपुषा श्रिया च जाज्वल्यमानं तं राजसुतं दृष्ट्वा अस्य भार्या धन्या इति शुद्धैः मनोभिः न खलु अन्यभावात् अवोचन्।

Notes.—**जाज्वल्यमानं** *past par.* of the *fre.* of ज्वल् to shine. **धन्या** fortunate, happy *cf.* धन्या केयं स्थिता ते शिरसि *Mudra.* I, 1. **अन्यभावात्**—out of jealousy or ill-feeling. **अवोचन्**—aorist of वच्.

The metre is इंद्रवज्रा.

Translation.—Beholding the King's son thus radiant in body and beauty those (women) said with pure hearts and no ill-feeling 'happy and fortunate is his wife.'

24. **Prose Con.**—व्यायतपीनबाहू रूपेण साक्षात् पुष्पकेतुः इव अयं श्रियं त्यक्त्वा धर्मं उपैष्यति किल इति स्त्रियाः गौरवं एव चक्रुः।

Notes.—**व्या०बाहू**=विशेषेण आयतौ-व्यायतौ (long, *cf.* युवा युगव्यायतबाहुरंसलः *Ra.* III, 34) च पीनौ च व्या०पीनौ; तौ बाहू यस्य सः. **साक्षात्** *ind.* in actual bodily form. **पुष्पकेतुः**—Madana, the God of love. पुष्पाणि एव केतुः (mark) यस्य सः. **श्रियं** regal splendour. **धर्मं** the Law, "The word धर्म is etymologically equivalent to the Latin *Forma* with its implied connotation of the English phrase 'good form.' Law did not in the early times mean legislation. It was rather custom or established precedent; and a sense of duty to the established order of things included and implied a reverential attitude towards the Gods" *R. Davis.* **उपैष्यति**—*fu.* 3rd per. *Sing.* of उपे 2nd *Conj. Para.* to undergo, to practise. **किल**='as is reported,' 'as it is said' वार्तासंभाव्ययोः किल. **गौरवं**—Respect, regard; तथापि यन्मय्यपि ते गुरुरित्यस्ति गौरवं *Ma.* II, 71.

The metre is उपजाति.

Translation.—This (prince), with long full-developed arms

and in figure like that of the flower-armed god himself, abandoning all regal splendour, will devote himself to religion: at this report the women paid him respect.

25. **Prose Con.**—तथा तत्पूर्वं राजपथं शुचिधीरवेषैः विनीतैः पौरैः कीर्णं आलोक्य कुमारः किंचित् जहर्ष पुनः च आत्मनः भावं इव मेने ।

Notes.—**तत्पूर्वं**=in his front, before him तस्य पूर्वं; or it might be taken in the sense of 'for the first time' स एव पूर्वः तत्पूर्वः तं. **राजपथं**—see III, 4 and 10. **शु०वेषैः**=धीरः (agreeable, sober) चासौ वेषश्च (वेष dress, apparel. The word is also written वेश) धी०वेषः; शुचिः (pure white *cf.* अथ हिमशुचिभस्मभूषितं *Ki.* XVIII, 15) धीरवेषः येषां तैः. **विनीतैः**—respectable, decent, gentlemanly. **कीर्णं**—covered, filled. **किंचित्**—a little *cf.* यदा किंचित्किंचिद्बुधजनसकाशात् *Niti.* 3. **आत्मनः भावं**=The condition of his own mind आत्मा is used here in the sense of चित्त. 'आत्मा कलेवरे यत्ने स्वभावे परमात्मनि। चित्ते धृतौ च बुद्धौ च परव्यावर्तनेऽपि च'.

The metre is इंद्रवज्रा.

Translation.—Then, beholding the high road before him crowded with respectable citizens dressed in white sober garments, the prince felt a slight pleasure; again, however, he thought of the whole scene like the condition of his own mind.

26. **Prose Con.**—शुद्धाधिवासाः देवाः तु तत् पुरं स्वर्गं इव प्रहृष्टं समवेक्ष्य क्षितिपात्मजस्य प्रयातुं संचोदनार्थं जीर्णं नरं निर्ममिरे ।

Notes.—**शुद्धा०साः**—शुद्धाः अधिवासाः (अधि वासः अधिवासः an *avyayî bhâva* comp, places of residence) येषां ते. **प्रहृष्टं**=प्रकर्षेण हृष्टं प्रहृष्टं highly delighted, full of joy. **क्षि०जस्य**=क्षितिं पालयतीति क्षितिपः, तस्य आत्मजः (आत्मनः जातः) तस्य. **संचोदनार्थं** for the purpose of urging. **जीर्णं** emaciated; *cf.* जराजीर्णैरंगैः *Vai.* 112.

The metre is उपजाति.

Translation.—But then the gods, whose abodes were pure, on beholding that city full of joy like the very heaven, created an emaciated man for the purpose of stirring the son of the king to depart.

27. **Prose Con.**—ततः जरया अभिभूतं नरेभ्यः पृथगाकृतिं तं दृष्ट्वा आगतास्थः तत्र एव निष्कंपनिविष्टदृष्टिः कुमारः संग्राहकं उवाच ।

Notes.—**अभिभूतं**—overcome. *vide* I, 1 *supra.* **पृ०कृतिं**=पृथक् (*indecli.* separate, different [from others and himself]) आकृतिः (form, appearance) यस्य सः, तं. **आ०स्थः**—आगता (arisen) आस्था (consideration, thought; *cf.* मर्त्येष्वास्था पराङ्मुखः *Ra.* X, 43) यस्य सः.

निष्कं०—दृष्टिः=निविष्टा (fixed) चासौ दृष्टिश्च नि०दृष्टिः; निष्कंपा निविष्टदृष्टिः यस्य सः. **संग्राहकं**=संग्राहं (collecting together, grasping; मुष्टिबंधस्तु संग्राहः *Ama.*) करोतीति संग्राहकः one who holds together the reins; hence, a charioteer, inasmuch as he holds the reins of the horses.

The metre is उपजाति.

Translation.—Then on beholding that man overcome with decrepitude and different in form from other men, the prince, with his gaze intently fixed on him and with a thought that struck him, said to the driver.

28. Prose Con.—भोः सूत एषः अभ्युपेतः नरः सितैः केशैः यष्टिविषक्तहस्तः भ्रूसंवृताक्षः शिथिलानताङ्गः एषः कः एषा विक्रिया किं प्रकृतिः (वा) यदृच्छा (वा)

Notes.—**यष्टि०...हस्तः**—यष्ट्यां (यष्टि a staff, a long stick) विषक्तः (stuck, attached to; *cf.* विटपविषक्तजलार्द्रवल्कलेषु *Sha.* I) यष्टिविषक्तः; सः हस्तः यस्य सः. **भ्रूसंवृताक्षः**—भ्रूभ्यां संवृते (shaded) अक्षिणी यस्य सः. **शि०-तांगः**=शिथिलानि च आनतानि (bent down) च शि०तानि; शि०तानि अंगानि यस्य सः. **विक्रिया** change, alteration. *cf.* श्मश्रुप्रवृद्धिजनिताननविक्रियान् *Ra.* XIII, 71. **प्रकृतिः**=natural condition. **यदृच्छा**=chance, accident.

The metre is उपजाति.

Translation.—Oh charioteer! who is this man that has come here with white hair, his hand resting on a staff, his eyes hidden under his eyebrows, his limbs hanging loose and bent down. Is this a change produced in him or is it a natural condition or a mere accident ?

29. Prose Con.—इति एवं उक्तः सः रथप्रणेता तैः एव देवैः कृतबुद्धिमोहः अदोषदर्शी संरक्ष्यं अपि अर्थं नृपात्मजाय निवेदयामास ।

Notes.—**तैः देवैः** see st. 26 *supra.*—**कृ०मोहः** बुद्धेः मोहः (delusion of the intellect) बु०मोहः; कृतः बु०मोहः यस्य सः **अदो०दर्शी**=दोषं न दर्शयति इति अदोषदर्शी one who does not see anything amiss. **रथप्रणेता**=the driver of the chariot. **संरक्ष्यं**=संरक्षितुं योग्यं that which ought to be concealed or withheld.

The metre is उपजाति.

Translation.—Thus addressed the charioteer, having his intellect bewildered by the same gods, (who had put forward the old man on the road) not feeling anything amiss declared to the king's son that secret which should have been carefully kept from him.

30. Prose Con.—रूपस्य हर्त्री बलस्य व्यसनं शोकस्य योनिः रतीनां निधनं स्मृतीनां नाशः इन्द्रियाणां रिपुः एषा जरा नाम यया एषः (नरः) भग्नः ।

Notes.—**व्यसनं**—destruction *cf.* स्वबलव्यसनेऽपि पीड्यमानं *Kir.* XIII, 15. व्यसनं विपदि भ्रंशः *Ama.* **योनिः**—generating cause, source; *cf.* सा योनिः सर्ववैराणां *Utta.* V, 30. **रतीनां**—of pleasures, of enjoyments; see stanza 37 *infra.* **निधन**—loss, destruction, *cf.* कल्पांतेष्वपि न प्रयाति निधनं विद्याख्यमंतर्धनं *Niti.* 16. **भग्नः**—broken down, *cf.* समारम्भा भग्नाः कति etc. *Vai, Mis.* 39. **नाम**—certainly, forsooth; *cf.* विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम *Sha.* I.

The metre is इंद्रवज्रा.

Translation.—This is forsooth old age—the ravisher of beauty, the annihilator of strength, the source of sorrow, the destroyer of enjoyments, the bane of memories, and the enemy of the senses. It is by this [old age] that this man has been broken down

31. Prose Con.—अनेन शिशुत्वे पयः अपि पीतं हि कालेन उर्व्यां भूयः परिमृष्टं क्रमेण च वपुष्मान् युवा भूत्वा क्रमेण तेन एव जरा उपेतः ।

Notes.—**अनेन** By this old man. **अपि** brings in the sense of his having drunk milk, just as he did other juvenile actions, such as crawling, prattling, etc. **कालेन** in course of time *cf.* कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं· **उर्व्यां** on this earth. **भूयः** *ind.* moreover, besides, or it may be taken as the *geni. sing.* of भू the ground. **परिमृष्टं** stroked. **वपुष्मान्** one having a well-developed body. Compare with this generally क्षणं बालो भूत्वा क्षणमपि च युवा कामरसिकः क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ॥ जरा जीर्णैरंगैर्नट इव वलीमंडिततनुर्नरः संसारांते विशति यमधानीजवनिकाम् ॥ १ ॥

The metre is उपजाति.

Translation.—By this (individual) in his childhood was milk also drunk; in course of time, in this world, did he, further, crawl on the ground; and having gradually developed into a youth with well-formed body, he has by the same course reached an old age.

32. Prose Con.—इति एवं उक्ते (सति) सः चलितः राजात्मजः इदं किंचित् सूतं बभाषे किं एष दोषः मम अपि भविता इति, ततः अस्मै सारथिः अभ्युवाच ।

Notes.—**भविता**—*nom. sing.* of भवितृ about to become *cf.* समादिदेशैकवधूं भवित्रीं *Ku.* I, 50. **अस्मै**—(the dative of the indirect

object is used in the case of the roots कथ्, ख्या, शंस्, and चक्ष्, the causal of विद् with नि and other roots having the same sense) to the Prince. दोषः defect, evil.

The metre is उपजाति.

Translation.—Being thus addressed, the prince with a start spoke a few words to the charioteer 'what, is this evil to befall me too?' Then to him did the charioteer say.

33. Prose Con.—आयुष्मतः (भवतः) अपि वयोपकर्षः एषः कालवशेन निःसंशयं भावि एवं; एषः लोकः रूपविनाशयित्रीं जरां जानाति इच्छति एव च।

Notes.—**आयुष्मतः**—आयुष्मन् *lit.* one having life; hence, long-lived one. According to the Sahitya Darpana VI, 148 a charioteer is to address his master as आयुष्मन्. **वयोपकर्षः**—वयसा अपकर्षः (going down); according to the reading वयःप्रकर्षः=वयसः प्रकर्षः (increase): this reading is preferable. **कालवशेन**—being dependent on time, hence; in course of time *cf.* कालवशान्मेदिनीपृष्ठे *Veni.* I, 13. **रू॰ यित्रीं**=रूपं विनाशयतीत्यसौ रू॰यित्री, तां. The formation of the word is by the addition of the suffix तृच् in the sense of 'an agent'. **च**—The use of this particle with एव brings in the sense of 'still',

The metre is इंद्रवज्रा.

Translation.—Even to thee, my long-lived lord, will come, without doubt, in course of time, the going down of years. This world knows old age to be the destroyer of beauty still it longs for it.

34. Prose Con.—ततः पूर्वाशयशुद्धबुद्धिः विस्तीर्णकल्पाचितपुण्यकर्मा सः महात्मा जरां श्रुत्वा अंतिके महाशनेः घोषं (श्रुत्वा) गौः इव उद्विविजे।

Note.—**पूर्वा॰...बुद्धिः**—पूर्वः (former, previous) चासौ आशयः (effect, impression) च; तेन शुद्धा बुद्धिः यस्य सः. **वि॰ कर्मा**=विस्तीर्णाश्च ते कल्पाश्च, तेषु आचितानि (accumulated, collected) पुण्यकर्माणि (पुण्यानि च तानि कर्माणि च) येन सः. **महात्मा**= महान् आत्मा (mind, see III, 25) यस्य सः. **अंतिके** near, in the vicinity. *cf.* न त्यजंति ममांतिकं *Hito.* I, 46 or कर्णांतिकचरं *Sha.* I, 25. **महाशनेः**=महांश्चासौ अशनिः (thunder.) च, तस्य. **घोषः** sound of thunder in particular; any noise in general घोष आभीरपल्यां स्याद्गोपाल ध्वनि घापके। कांस्ये चांबुदनादे ना.

The metre is उपजाति.

Translation.—Then the generous (prince), whose mind was purified by the effect of former deeds, and who had accumulated meritorious actions through long-extending ages, was, when he heard of old age, troubled like a bull who hears the crash of a heavy thunder near him.

35. Prose Con.—सशिरःप्रकंपं दीर्घं निश्वस्य तस्मिन् च जीर्णे चक्षुः विनिवेश्यतां च सहर्षां जनतां दृष्ट्वा एव सः इदं संविग्नं वाक्यं जगाद ।

Notes.—**सशिरःप्रकंपं**=शिरसः प्रकंपः, तेन सहितं यथास्यात्तथा. **जीर्णे** refers to the man in stanza 26 *supra*. **जनता**=जनानां समूहः जनता. The addition of ता (तल् is according to the rule ग्रामजनबंधुभ्यस्तल् *Pâṇi.* IV, ii, 43; *cf.* छाया। मागामिनीं जगृहिरे जनतास्तरूणां *Ma.* V, 14. **संविग्नं**=full of melancholy.

The metre is इंद्रवज्रा.

Tranaslation.—With a tremulous nodding of the head [indicative of uneasiness] and heaving a long sigh at finding the exultant multitude gazing at that broken man he gave vent to this melancholy expression.

36. Prose Con.—एवं जरा स्मृतिं च रूपं च पराक्रमं च निर्विशेषं हन्ति ईदृशं प्रत्यक्षतः ईक्षमाणः लोकः न च एव च उद्वेगं उपैति ।

Notes.—**निर्विशेषं** = निर्गतः विशेषः यस्मिन् कर्मणि तत्तथा equally, indiscriminately; *cf.* सम इह परितोषो निर्विशेषो विशेषः *Vai.* 50. **प्रत्यक्षतः**= अक्ष्णोः प्रति प्रत्यक्षः, तस्मात् प्रत्यक्षतः before, in front, directly. **लोकः** the world people in general; लोकस्तु भुवने जने *Ama.* **न एव च** the addition of the particle च imparts an emphasis to the idea conveyed by the verb (here) उपैति, Its use is different from that in St. 32 *supra.*

The metre is उपजाति.

Translation.—Thus then does old age strike down memory, comliness, and valour; although the world sees this before it yet it is not perturbed!!

37. Prose Con.—हे सूत एवं गते अश्वान् निवर्तय शीघ्रं गृहाणि एव भवान् प्रयातु जराभवे चेतसि वर्तमाने (सति) कुतः मे उद्यानभूमौ रतिः हि ।

Notes.—**एवं गते** such being the state. **जराभवे** जरा एव भवः (state of existence) तस्मिन्. **चेतसि वर्तमाने सति** the mind being in. **रतिः** fondness pleasure. In this sense it is used with the *locative. cf.* पापे रतिं मा कृथाः *Niti.* 77.

The metre is उपजाति.

Translation.—Oh charioteer! such being the state turn back the horses, do go home quickly; my mind being (wrapped up) in an existence which is (nothing but) old age whence can there be pleasure for me in garden-grounds.

38. Prose Con.—अथ भर्तृसुतस्य तस्य आज्ञया नियंता रथं निवर्तयामास ततः चिंतावशः कुमारः तदेव भवनं शून्यं इव प्रपेदे ।

Notes.—भर्तृसुतस्य=The son of the master; this is, of course, शौद्धोदनिः *vide* canto II. नियंता=नियंतृ the driver. चिंतावशः—चिंतायाः वशः influenced by, under the influence of. शून्यं—really speaking the king's house was not शून्य, but the mind of Shauddhodana being distracted, the palace had no charm for him; hence, it was as it were शून्य, or vacant, to him.

The metre is उपजाति.

Translation.—Then the charioteer by order of (his) master's son turned back the chariot; and the prince, under the influence of anxiety, entered the house even as if it were vacant.

39. Prose Con.—जरा जरा इति प्रपरीक्षमाणः यदा तु तत्र एव शर्म न लेभे तदा नरेंद्रानुमतः सः भूयः तेन एव क्रमेण वहिः जगाम।

Notes.—जरा जरा—The repetition or वीप्सा indicates continuity in the meditation of the prince. प्रपरीक्षमाणः—*Pre. Par.* of ईक्ष् with परि and प्र=scrutinising; hence, reflecting. शर्म—happiness, pleasure, शर्मशातसुखानि च *Ama. cf.* त्यजंत्यसून् शर्म च. *Naisha.* I, 50. नरें॰...नुमतः—नरेंद्रेण अनुमतः permitted. *cf.* अनुमतगमना शकुंतला *Sha.* III. भूयः—*inde.* again.

The metre is उपेंद्रवज्रा.

Translation.—Continuously reflecting about old age, when the prince found no happiness there (in the palace) then, again, with the permission of the king, he went out with the same arrangement as before.

40. Prose Con.—अथ ते एव देवाः अपरं व्याधिपरीतदेहं मनुष्यं ससृजुः तं च दृष्ट्वा तद्गतदृष्टिः एव शौद्धोदनिः सारथिं आवभाषे।

Notes.—व्या॰...देहं—व्याधिभिः परीतः (surrounded by; hence, seized, taken possession of, *cf.* कोपपरीतमानसं *Ki.* II, 25; *Mudra.* III, 30.) देहः यस्य सः; तं. तद्गतदृष्टिः—तस्मिन् गता दृष्टिः यस्य सः.

The metre is उपजाति.

Translation.—Now, those same deities created another man with his body all afflicted by disease; when his eye fell on him Shaudhodani said to the charioteer.

41. Prose Con.—स्थूलोदरः श्वासचलच्छरीरः स्रस्तांसबाहुः कृशपांडुगात्रः परं समाश्लिष्य अंब इति करुणं वाचं ब्रुवाणः एषः नरः कः।

Notes.—स्थू॰ दरः—स्थूलं उदरं यस्य सः one having a bloated belly श्वा॰शरीरः=श्वासेन (on account of breathing) चलत् श्वा॰चलत्; श्वा॰ चलत् शरीरं यस्य सः स्रस्तां॰बाहु—अंसौ (shoulders स्कंधो भुजशिरोंसोऽस्त्री

Ama. cf. स्रस्तांसावतिमात्रलोहिततलौ etc. *Sha.* I) च बाहू (arms भुजबाहू प्रवेष्टो दोः arm. The word (also बाहु)—appears to be used rather loosely in literature sometimes for the arm, at others for the hand; but after the use of the word by Kalidâsa—a poet who has always been precise in the choice of his words, the word बाहु may be taken to signify 'shoulder' *cf.* स्फुरति च बाहुः कुतः फलमिहास्य *Sha.*) च अंसबाहू a *Samahâra Dwandwa* by द्वंद्वश्च प्राणितूर्यसेनांगानाम् *Pâṇi.* II, iiii, 2; स्रस्तः (drooped down, hanging loose) अंसबाहुः यस्य सः. **कृ०गात्रः**=पांडु pale, sallow, च तत् गात्रं च (गात्र body, the human frame; अथ कलेवरं गात्रं वपुः *Ama.*) पां० गात्रं; कृशं पां०गात्रं यस्य सः कृ०गात्रः, तं. **परं** another person. **अंब**=vocative of अंबा mother: the usual cry of an ailing person.

The metre is उपजाति.

Translation.—This man having a bloated belly, his body shaking on account of breathing, his arms and shoulders drooping down, his body sallow and weak, and embracing a stranger he is cries out 'oh ma!' Who is this man?

42. Prose Con.—ततः सारथिः अब्रवीत् सौम्य अस्य धातुप्रकोपप्रभवः प्रवृद्धः एषः रोगाभिधानः सुमहान् अनर्थः येन शक्रः अपि अस्वतंत्रः कृतः

Notes.—**सौम्य** (*voca.* good sir, gentle, my lord: generally an expression of address, of respect. *cf.* प्रीतास्ति ते सौम्य चिराय जीव *Ra.* XIV, 59.) **धा० भवः**=धातूनां (of the humours of the body *viz.* वात, पित्त, कफ. Indian pathology traces many of the systematic ailments to the preponderance of one or other of these three humours, प्रकोपः (excitement, inflamation) स एव प्रभवः (source, origin.) यस्य सः **रो० धानं**—रोगः अभिधानं (name, अभिधानं च नामधेयं च नाम च *Ama.*) यस्य सः. **अनर्थः** (an evil, a calamity). **शक्रः** (Indra, the ruler of the gods. जिष्णुलेखर्षभः शक्रः *Ama.*). **अ० तंत्रः**=(स्वस्मिन् तंत्रं (dependence subscience) यस्य सः स्वतंत्रः, न स्वतंत्रः अ०तंत्रः.

The metre is उपजाति.

Translation.—Then the charioteer said, good my lord! this is a great evil called 'disease' which has increased on account of having originated in the inflamation of the three humours. by this even Indra is made helpless.

43. Prose Con.—इति सः राजसुतः तं नरं सानुकंपं ईक्षमाणः भूयः ऊचिवान् अस्य एव दोषः एषः पृथक् जातः (अथवा) प्रजानां सामान्यतः रोगभयं (किं)।

Notes.—**सा०...कंपं**—अनुकंपया (with compassion; *cf.* भक्त्या गुरौ मय्यनुकंपया च *Ra.* II, 63.) सहितं यथा स्यात्तथा. **ऊचिवान्**—*nom. Sing.*

of the *perf. par.* of वच् to speak. दोषः—see III, 32. पृथक्—special. प्रजानां—प्रजा mankind, the human species. सामान्यतः—*ind.* समानस्य भावः सामान्यं (general, common; *cf.* सामान्यमेतत्पशुभिर्नराणां) तस्मात् सामान्यतः generally, commonly.

The metre is इंद्रवज्रा.

Translation.—Then the prince eying that man with commiseration said once more—Is this calamity peculiar to this individual or is the danger of disease common to mankind.

44. Prose Con.—ततः सः रथप्रणेता बभाषे हे कुमार एषः दोषः साधारणः एवं रोगैः परिपीड्यमानः रुजातुरः लोकः हर्षं उपैति ।

Notes.—रथप्रणेता—रथस्य प्रणेता (नीयते असौ नेता with प्र, guider; hence, charioteer). साधारणः—common, universal, general. रुजातुरः—रुग्भिः (रुक् disease, स्त्रीरुग्रुजा चोपतापरोगव्याधिगदामयाः *Ama.*) आतुरः (diseased, distressed, troubled आतुरोऽभ्यमितोऽभ्यांतः *Ama. cf.* आतुराणां चिकित्सकाः *Pancha.* I, 155). लोकः—mankind. उपैति—derives, obtains, runs after.

The metre is उपजाति.

Translation.—Then the charioteer replied—Oh prince this is calamity universal; though tortured in this manner by diseases, and distressed by ailments, man runs after pleasure.

45. Prose Con.—इति श्रुतार्थः विषण्णचेताः सः अंबूर्मिगतः शशी इव प्रावेपत करुणान्वितः सन् किंचित् मृदुना स्वरेण इदं वाक्यं प्रोवाच ।

Notes.—श्रुतार्थः—श्रुतः अर्थः (meaning, purport, account) येन सः वि०चेतः—विषण्णं (dejected, despondent) चेतः यस्य सः. अं०गतः—अंबुनः (of water नीरक्षीरांबुशंवरम् *Ama.*) ऊर्मयः (ripples भंगस्तरंग ऊर्मिः *Ama. cf.* पयो वेत्रवत्याश्चलोर्मि *Me.* I, 25.), तासु गतः. क०न्वितः—करुणया (करुणा pity, tenderness) अन्वितः (seized with, overpowered.)

The metre is उपजाति.

Translation.—The prince, who heard this account was dejected at heart and trembled like the reflection of the moon on a ripple of water; being overpowered with pity he softly spoke the following words.

46. Prose Con.—इदं च प्रजानां रोगव्यसनं पश्यन् लोकः विश्रम्भं उपैति यत् रोगभयैः अमुक्ताः अपि हसन्ति (अतः) नराणां अहो विस्तीर्णविज्ञानम् ।

Notes.—प्रजानां see III. 43. रोगव्यसनं रोगाः एव व्यसनं (calamity distress). लोकः see III. 44. विश्रंभं = rest, relaxation. उपैति

see III, 44. **यत्** since. **रोगभयैः** रोगाणां भयानि or रोगाः एव भयानि तैः. **अमुक्ताः** न मुक्ताः not free. **वि०विज्ञानं** विस्तीर्णं च तत् विज्ञानं च (विज्ञान is worldly knowledge or knowledge derived from worldly experience as opposed to ज्ञान knowledge of the supreme spirit *vide Bhagwatgîta* Chap. VII).

The metre is उपजाति.

Translation.—While beholding this calamity of sickness among mankind the world is calm. Although not free from danger or disease still do people (enjoy) laugh on. Oh! how profound is the knowledge of the people.

47. Prose Con.—हे सूत बहिः प्रयाणात् रथः निवर्ततां नरेंद्रसद्म एव प्रयातु रोगभयं च श्रुत्वा मे चेतः रतिभ्यः प्रत्याहतं संकुचति इव ।

Notes.—**बहिः** *ind.* out. **प्रयाणात्** (प्रयाण going out from या with प्र). **प्रयातु** The Imperative of निवर्त् and प्रया is used in the sense of a gentle command. **रतिभ्यः** see III, 30. **प्रत्याहतं** repelled *cf.* प्रत्याहतास्त्रो गिरिशप्रभावात् *Ra.* II, 41. **संकुचति इव**—contracts as it were, shrinks; compare stanza 35 from the Vairâgyashataka of Bhartrihari with this.

The metre is उपजाति.

Translation.—Oh charioteer! Let the chariot be withheld from going out and do go straight to the Royal palace: having heard this danger of sickness my mind, repelled from pleasures, shrinks, as it were, into itself.

48. Prose Con.—ततः सः निवृत्तहर्षः प्रध्यानयुक्तः निवृतः सन् सद्म प्रविवेश तं च तथा द्विः संनिवृत्तं प्रेक्ष्य भूमिपतिः पुर्यागमं चकार ।

Notes.—**नि०हर्षः**—निवृत्तः (gone, vanished) हर्षः यस्य सः. **प्र०युक्तः** प्रकर्षेण ध्यानं प्रध्यानं (contemplation) तस्मिन् युक्तः (engrossed, absorbed) **निवृत्त** returned. **द्विः** *adv.* twice. **संनिवृत्तं** returned, as mentioned in stanzas 37 and 47. **पुर्यागमं**—पुर्यां आगमं पुर्यागमं returning, coming.

The metre is उपजाति.

Translation.—Then, that prince with all his joy vanished, and himself absorbed in thought entered the palace; seeing him thus returned twice, the king himself returned to the city.

49. Prose Con.—निवर्तनस्य निमित्तं तु श्रुत्वा नृपः आत्मानं अनेन संत्यक्तं इति मेने मार्गस्य च शौचाधिकृताय चुक्रोष एव रुष्टः अपि च उग्रदंडः न (आसीत्)।

Notes.—**अनेन संत्यक्तं**—abandoned by this *i. e.* by the prince

because of the sights beheld by him which produced a feeling of aversion for this world in his mind, *vide* stanzas 26 to 47. the sight of (1) an old man ; (2) of a diseased man ; (3) and of a dead body. **शौ०कृताय** = शौचेषु अधिकृतः (one who was appointed to keep the road clean *i. e.* free from all disagreeable sights) तस्मै. The dative is used according to the sûtra क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः *Pâṇi.* I, iiii, 37. **रुष्टःअपि** = though angry. **उग्रदंडः** = उग्रः (severe, harsh) चासौ दण्डः (punishment) च.

The metre is इंद्रवज्रा.

Translation.—On hearing the cause of the return (of the prince) the king came to the conclusion that he was deserted by the prince : he got angry with him who was appointed to keep the prince's path clear, though he was angry yet he did not inflict any harsh punishment on him.

50. Prose Con.—अस्मान् न विजह्यात् इति नाथमानः (नृपः) चलेन्द्रियत्वात् अपि न अतिशक्तः (इति) भूयश्च तस्मै सुताय विशेषयुक्तं विषयप्रकारं विदधे ।

Notes.—**विजह्यात्** the potential is here used to convey the sense of 'hope, wish.' **नाथमानः** see II. 54. **चलेंद्रियत्वात्** = चलानि च तानि इंद्रियाणि च; तेषां भावः चलेंद्रियत्वं, तस्मात् on account of the unsteadiness of the senses. **अतिशक्तः**—extremely strong ; therefore, 'firm,' ; Prof. Cowell suggests, the reading अपि नाम शक्तः which would make a good sense. **वि०युक्तं** = विशेषैः युक्तं full of specialities, full of special things. **वि०प्रकारं**—विषयाणां (of enjoyments) प्रकारः (variety), तं. **विदधे**—gave, arranged.

The metre is उपजाति.

Translation.—'Would that the prince does not leave me'; wishing this, and further, since the prince was not extraordinarily firm through the unsteadiness of the senses, the king once more arranged for his son a special form of worldly enjoyment.

51. Prose Con.—यदा च शब्दादिभिः इन्द्रियार्थैः अस्य सुतः अंतःपुरे न एव रेमे तदा रसान्तरं स्यात् मन्यमानः बहिः यात्रां व्यादिशतिस्म ।

Notes.—**शब्दादिभिः**—शब्दाः आदिर्येषां तैः. **इंद्रियार्थैः**—इंद्रियाणां अर्थाः तैः. **रसान्तरं**=रसानां (रस pleasure, enjoyment) अंतरं (change, alteration). **व्यादिशति स्म**—ordered ; for the use of स्म see II, 10.

The metre is उपजाति.

Translation.—When the son did not derive any pleasure in the various objects of the senses, such as speech, etc: in the harem,

the king, (under the impression that a diversion in enjoyment might amuse the prince), ordered another travel.

52. Prose Con.—तनयस्य भावं बुद्धा कांश्चित् संवेगदोषान् अविचिन्त्य स्नेहात् कलासु अभिज्ञाः योग्याः वारमुख्याः तत्र समाज्ञापयति स्म ।

Notes.—**भाव**—the feeling of the heart; mind. **सं०पान्**—संवेगस्य दोषाः (the evils inherent in excitement and irritation) तान्. **अविचिन्त्य**=not taking into consideration. **कलासु**—in arts such as wiles and blandishments, and in music, singing etc. **अभिज्ञाः**—अभिजानन्ति ताः well-versed, proficient. **वारमुख्याः**—notable public women 'अथ सा जनैः सत्कृता वारमुख्या स्यात्' *Ama.* **समाज्ञापयति स्म**—deputed. For स्म see III, 51.

The metre is उपजाति.

Translation.—Understanding the mental condition of the prince, the king, without taking into consideration any of the evils of irritation, ordered suitable leading courtezans skilled in all (their) arts to be in attendance on the prince.

53. Prose Con.—ततः विशेषेण स्वलंकृते च परीक्षिते च नरेन्द्रमार्गे सूतं च रथं च अत्यास्य कुमारं वहिः प्रस्थापयामास ।

Notes.—**विशेषेण** profusely, abundantly *cf.* आसीद्विशेषा फलपुष्पवृद्धिः *Ra.* II, 10. **स्वलंकृते** सुष्ठु अलंकृतः, तस्मिन्. **परीक्षिते**—examined. This was for the purpose of keeping away loathsome sights such as those mentioned in stanzas 26 and 41. **अत्यास्य** bringing out in readiness. according to the reading [illegible] 'he changed the charioteer and the chariot.'

The metre is उपजाति.

Translation.—Then, having the road profusely decorated and having called up the charioteer and the chariot, [the king] sent out the prince [on a journey.]

54. Prose Con.—ततः तथा राजपुत्रे गच्छति (सति) तैः एव (देवैः) मार्गे गतासुः विहितः, तं च मृतं एव ऊह्यमानं सूतः कुमारः च ददर्श अन्यः न (ददर्श)।

Notes.—**तैः देवैः**—see stanzas 26, and 40 *supra*. **गतासुः**—गताः असवः (The five vital breaths or life-winds in the body पुंसि भूम्न्यसवः प्राणाः *Ama. cf.* तेजस्विनः सुखमसूनपि संत्यजंति *Niti.* 110. The five vital airs said to constitute life are "प्राणापानः समानश्चोदानव्यानौ" of which हृदि प्राणः, गुदे अपानः, नाभौ समानः, कंठदेशे उदानः and सर्वशरीरगः व्यानः. **विहितः** *Past. Par.* of धा with वि. **ऊह्यमानं**—*per. par.* of वह् to bear.

The metre is उपजाति.

Translation.—Then the prince having set out as above, the same deities placed a lifeless [body] on the road; the dead body borne along was seen only by the charioteer and the prince and by none else.

55. **Prose Con.**—अथ स राजसुतः सूतं अब्रवीत् दीनैः मनुष्यैः अनुगम्यमानः यः भूषितः अश्वासी अवरुध्यते च (सः) नरैः चतुर्भिः ह्रीयते एषः कः ।

Notes.—**दीनैः**—Distressed, agreeing with मनुष्यैः. **अश्वासी** (अश्वासिन् not breathing) **अवरुध्यते**—*pass.* 3rd *per. sing.* of अवरुध् to cover, to shroud.

The metre is उपजाति.

Translation.—Then the prince said to the charioteer,—"Who is this followed by distressed persons, though decorated is without breath, has been shrouded, and is being borne by four men.

56. **Prose Con.**—ततः सः अर्थवित् नियंता शुद्धाधिवासैः शुद्धात्मभिः देवैः एव अभिभूतचेताः(सन्) इमं अवाच्यं अपि अर्थं ईश्वराय प्रव्याजहार।

Notes.—**शु०वासः**—शुद्धे (शुद्ध holy, pure) अधिवासः (residence, abode; *cf.* लक्ष्मीभृतोंभोधितटाधिवासान् *Ma.* III, 71) येषां तैः; **शुद्धात्मभिः** शुद्धाः आत्मानः येषां तैः. **अभि०चेताः**—अभिभूतं (overpowered) चेतः यस्य सः **अर्थवित्**—अर्थं (meaning, purport) वेत्ति असौ. **ईश्वराय**—to the master *i. e.* to the prince. **प्रव्याजहार**—spoke; from हृ with प्र, वि, and आ.

The metre is उपजाति.

Translation.—Having his mind influenced by the same deities—dwellers in a holy place and of pure minds—the charioteer who knew the purport of this spoke out the truth which was not to be disclosed.

57. **Prose Con.**—बुद्धींद्रियप्राणगुणैः वियुक्तः तृणकाष्ठभूतः विसंज्ञः सुप्तः एषः कोऽपि यत्नवद्भिः प्रियाप्रियैः संवध्य संरक्ष्य च त्यज्यते ।

Notes.—**बुद्धीं०...गुणैः**—बुद्धिश्च इंद्रियाणि च प्राणाश्च गुणाश्च, तैः. **वियुक्तः** devoid of. **तृ०-भूतः**—तृणस्य काष्ठं, तत् इव भूतः, or तृणं च काष्ठं च, ते इव भूतः. **विसंज्ञः**—विगता संज्ञा (consciousness) यस्य सः. **यत्नवद्भिः**—यत्नानि अस्ति येषां ते यत्नवंतः, तैः agreeing with **प्रियाप्रियैः**=those who are friendly and those who are not friendly *i. e.* friends and stangers.

The metre is उपजाति.

Translation.—This is some one, abandoned by intellect, the senses, the vital airs, and all qualities—who being unconscious and asleep lies stretched like a piece of dried straw (or, like blade of grass and a log of wood): he is abandoned alike by struggling friends and strangers "after they have carefully swathed and guarded him."

58. **Prose Con.**—इति प्रणेतुः वाक्यं निशम्य सः चुक्षुभे, एनं च सः किंचित् उवाच किं एकाकिनः तु एव जनस्य अयं नाशः [वा] सर्वप्रजानां ईदृशः अंतः ।

Notes.—**प्रणेतुः**—*gen.* sing. of प्रणेतृ *lit.* a leader; hence, a driver. **चुक्षुभे**—was agitated. **एकाकिनः**—(एकाकिन् alone, single). **सर्वप्रजानां**—of all mortals.

The metre is उपजाति.

Translation.—On hearing these words of the driver he became excited and spoke a little to him as follows:—Is the destruction of this man alone special or is such the end of all mankind ?

59. **Prose Con.**—ततः प्रणेता तस्मै वदति स्म सर्वप्रजानां अयं अंतकर्ता लोके हीनस्य मध्यस्य महात्मनः वा सर्वस्य नियतः विनाशः ।

Notes.—**तस्मै**—Note the use of Dative. **स्म**—This particle with the present tense imparts the sense of the Imperfect. **अंतकर्ता**—अंतं करोति असौ. In the reading अंतकर्मा the word may be dissolved as अंतः एव कर्म यस्य सः one whose act is that of nothing else but destroying. **लोके**—in this world. **हीनस्य**—of the low. **महात्मनः**—महान् आत्मा (mind) यस्य तस्य. **नियतः**—certain, inevitable.

The metre is उपजाति.

Translation.—Then the charioteer said to him:—this is the destroyer of the whole human race; in this world the destruction of all, whether low, middling, or the great, is inevitable.

60. **Prose Con.**—ततः सः धीरः अपि नरेंद्रसूनुः मृत्युं श्रुत्वा एव सद्यः विषसाद, अंसेन च कूबराग्रं संश्लिष्य निह्रादवता स्वरेण प्रोवाच ।

